नीरवस्वनः

बनमाली बिश्वालः



नीरवस्वनः

(Silent Voice)

कथाकारः

वनमाली बिश्वालः

पद्मजा-प्रकाशनम्

प्रयागः

1998

स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकम् ।
रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव ॥

(बाणभट्टः)

प्रकाशिका—पद्मावती बिश्वाल
द्वारा—डॉ० वनमाली बिश्वाल
गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ
चन्द्रशेखर आजाद पार्क
इलाहाबाद–211002

प्रथम संस्करणम्—1998

मूल्यम्—१०० रुप्यकाणि

मुद्रक :—अरविन्द प्रिण्टर्स
२०, डी बेली रोड, इलाहाबाद

NIRAVASVANAḤ
An anthology of sanskrit short stories

□**समर्पणम्**..............

..........यस्याः नीरवः स्वन इदानीमपि
अस्मान् उपदिशन्नस्ति..........

(स्वर्गादपि गरीयसी बिश्वालोपाह्वा सत्यभामा देवी)

आविर्भावः	**तिरोभावः**
1933	**1998**

........कुपुत्रो जायेत क्वचिदपि कुमाता न भवति........

—आशिषः प्रार्थी वनमाली

समाशंसा

राधावल्लभ त्रिपाठी

विंशशतके संस्कृत-साहित्य-रचनाया सर्वथा अस्पृष्टा अक्षुण्णाश्च केचन पन्थान उद्घाटिता इति न संशीतिः। ललितनिबन्ध-शास्त्रवृत्त-ग़ज़लगीति-ब्रजभाषाच्छन्दांसि संस्कृते उपक्रममाणोऽस्य युगस्य प्रवर्तकः साहित्यकारो भट्टमथुरानाथशास्त्री आधुनिकरीत्या लघुकथा अपि संस्कृते व्यरचयत्। तस्य परम्परामग्रे नयन्तः पश्चादवतीर्णाः क्षमाराव-गणेशरामशर्म-राजेन्द्रमिश्राद्याः कथाकाराः। तथापि पद्यकाव्यस्य यथा समृद्धिर्दृश्यते साम्प्रतिके संस्कृतसाहित्ये, न तथा नवीनरीत्या रचितानां गद्यगुम्फितानां लघुकथानाम्। प्रस्तुतो लघुकथासङ्ग्रहोऽभावस्यास्य पूर्तये स्वागतयोग्य उपक्रम इति मे मतिः।

सुकवेः श्रीवनमालिनो विश्वालस्य संस्कृतकथासङ्ग्रहोऽयं नीरवस्वनो नाम मया सतृणमास्वादितः। सङ्ग्रहेणानेन बिश्वालो विरचयति समकालिक-संस्कृतसाहित्यस्य नवीनां प्रतिष्ठासरणिमिति प्रत्यैमि। तत्कृताः कथाः सर्वथा आधुनिकसाहित्ये प्रचलिताया लघुकथाया मानदण्डमङ्गीकृत्य प्रवर्तिताः। लक्ष्यते चात्र नूतनः कश्चनार्थप्ररोहः। तद्यथा— कथानामेतासां पात्राणि चम्पी-धोयीदास-सनिआऽगणिसदृशानि भारतीयग्रामेषु बसता निम्नवर्गेन सम्बद्धानि। कथाकारस्याकृत्रिमा सहानुभूतिरेतादृशदलितपीडितनिम्नवर्गजनतां प्रति स्पन्दते। रेलयात्रा तथा मे सहयात्री, हसुरा बावा, स्वर्गे मम प्रथमः परिचित इत्यादिकथासु विलक्षणं व्यङ्ग्यं शिष्टनर्मवचोवितानचातुरी च मनोहरति। वस्तुवैविध्यमासां कथानां सर्वथा श्लाघनीयम्। बिश्वालो विशदयतीह विस्तारं वर्ण्यविषयाणां, निरूपयति च निरुपमं चायं कथासंसारम्। ग्रामजीवनं महानगरजीवनं चायं कथाकारो युगपन्नैपुण्येन विवृणुते। तथैव कथास्वासु विषयनिष्ठताया विषयिनिष्ठतायाश्च वरीवर्ति विशेषोऽन्वयः। अपमृत्योः पुनर्जन्म, चक्रव्यूह इत्यादिकथासु नारीजीवनस्य व्यथा सममंदारणं कथाकारेणोद्घाटिता।

कथास्वासु सर्वत्र प्राञ्जलं प्रासादिकं प्रकृष्टं गद्यं हृद्यं निरवद्यं च लसति। कथाकथनभङ्गी बलादाकृष्य चेतः कथाजगति नयति। मनोभावानां शीलने बिश्वालस्य लेखनी प्रकटयति कामपि पटुताम्, विच्छित्तिं च वर्णनायाः।

युवानममुं कथाकारमाशीर्भिर्वर्धयन् विश्वसिमि विश्वकथासाहित्यावगाहनपुरस्सरमयं भविष्यत्काले उत्कृष्टतरेणोदात्ततरेण कथासाहित्येन समृद्धतरं विधास्यति संस्कृतसाहित्यभाण्डारमिति।

=×=

प्राक्कथनम्

जगन्नाथ पाठकः

संस्कृतस्य समसामयिकं साहित्यं न केवलं प्राचीनात् साहित्यात् सर्वथाऽऽत्मानं पृथक्तया भिन्नतया वा प्रमाणयितुं समर्थमिव प्रतिभाति, प्रत्युत आधुनिके कालेऽपि निर्मितात् साहित्यात् सुतरां भिन्नमिव प्रतीतिपथमेति । संस्कृतसाहित्यमद्यत्वेऽपि गतिशीलमिति भूतार्थव्याहृतिः। यद्यपि कतिपये संस्कृतरचनाकारा अद्यत्वेऽपि तमेव प्राचीन-पन्थानमनुसरन्तो गतानुगतिकतामवलम्बन्ते तथापि तादृशाः कालक्रमेण क्षीयमाणप्रभावा उपेक्ष्यमाणाश्च तिष्ठन्ति । साहित्यस्य महाकाव्यादिषु पद्यमयीषु विधासु काचिदेतादृशी स्थितिः परिलक्ष्यते, परन्तु लघुकथारूपायां विधायां विशेषेण पाश्चात्यप्रभाव एवातिशेते । आधुनिके काले यैः संस्कृतलघु-कथासाहित्यं संवर्द्धितं तेषु पण्डिता क्षमा (रावोपाह्वा), भट्ट-मथुरानाथशास्त्रिणश्च विशेषेणोल्लेख्याः सन्ति । नवदिल्लीस्थसाहित्याकादेमी-पत्रिकायाः **संस्कृतप्रतिभायाः** प्रकाशनेन नैके कथाकाराः प्रतिष्ठामलभन्त । एतच्च सुविदितमेव सुधियां यन्मूलतः स्ववैदुष्येण संस्कृतजगति सुप्रतिष्ठितैः **पं० चन्द्रधरशर्मगुलेरिमहाशयैर्**हिन्द्यां लिखिता 'उसने कहा था' इति शीर्षकं विभ्राणा लघुकथाऽद्यत्वेऽपि हिन्दीसाहित्यजगति प्रतिष्ठापदवीं भजतीति ।

समकालिके संस्कृतसाहित्याकाशे कतिपये लघुकथाकारा देदीप्यमानाः सन्ति–**शत्रू मित्रे ?**, **दिग्भ्रान्तिः**, **अस्पृश्यताया रहस्यम्**, **दम्भज्वर**, **मर्यादा**-इत्यादीनां नैकासां लघुकथानां लेखकाः **कलानाथशास्त्रिणः**, इक्षुगन्धेत्याख्यस्य कथासंग्रहस्य लेखका अभिराजोपाह्वा **राजेन्द्रमिश्राः**, नैकासां लघुकथानां प्रसिद्धा लेखकाः **केशवचन्द्रदाशाः**, **राधावल्लभत्रिपाठिनश्च** । मध्यप्रदेशसंस्कृताकादेम्याः पत्रिकायां **दूर्वायामपि** प्रकाशिता नैका लघुकथाः स्मरणोयाः पुनः पुनराकलनीयाश्च सन्ति ।

भारतस्यान्यासां भाषाणां साहित्येषु नैके लघुकथाकारा अद्यत्वे स्वदेशसीमानमुल्लंघ्य विदेशेष्वपि महतीं ख्यातिं भजन्त इति नाविदितं विदुषाम् । किन्तु नाद्यत्वे तादृशी ख्यातिः संस्कृतस्य लघुकथाकारैर्लब्धा । तत्र कारणं यत्तेषां पाठकानां संख्या न्यूना । अद्यापि कतिपये लघुकथाकारा हिन्द्यादिषु स्वभाषासु लिखन्तः समकालमेव संस्कृतेऽपि लिखन्ति ।

एतेष्वन्यतमस्य लघुकथाकारस्य **वनमालिनो बिश्वालस्य** नवोनो लघुकथासंग्रहः **नीरवस्वनः** इत्याख्यः प्रकाश्यमानोऽस्तीति प्रमोदस्य विषयः । प्रायः सर्वेऽपि साहित्यजगति रचनायां प्रवर्तमाना इदम्प्रथमतया पद्यवद्धां कवितामारभन्त इति सामान्योऽनुभवः । बिश्वालस्य स्थितिरपि नैनं नियममपवदति । अस्य काव्यद्वयं **सङ्गमेनाभिरामा** (१९९६ वर्षे), **व्यथा** (१९९७ वर्षे) च प्रकाशितम् । प्रथमं प्राचीनेषु नानाछन्दःसु निर्मितं विलसति, द्वितीयं च छन्दोविरहिताभिः कविताभिराधुनिकीं शैलीं स्पृशदिव प्रतिभाति । अस्य काव्यबन्धः नूतनतयाऽस्य कवित्वस्य परिस्फोरणे समुचितः समर्थश्चेति वक्तुं शक्यते । श्री बिश्वालेन स्वगता समाजगता च व्यथैव मन्ये '**व्यथे**' ति काव्यसंग्रहगतानां नानाशीर्षकेषूपनिबद्धानां कवितानां **नीरवस्वनः** इत्याख्य-लघुकथासंग्रहगतानां लघुकथानाञ्च निर्माणे हेतुतां भजत इति । **व्यथाख्य**-काव्यसंग्रहस्य **मुखशालायां** तेनोक्तमपि—"कवेर्व्यथा तु सार्वजनीनव्यथातोऽभिन्नाऽपि

कामपि भिन्नतां धत्त" इति। परन्तु सैव व्यथा लघुकथानां लेखकत्वेन लिखितुं प्रवृत्तस्य बिश्वालस्य लेखनीतो निःसरन्ती लोकसमाजगताया विसङ्गतेर्वैषम्यस्य विडम्बनानाञ्चाभिव्यञ्जने भिन्नामेव पद्धतिमङ्गी-कुर्वाणाऽभिव्यक्तिमेति। सङ्ग्रहेऽस्मिन् निबद्धासु कथासु सर्वास्वेव वैविध्यकलिता काचिदभिनवेव कथोपस्थापनकला स्फुरतीति कथामर्मज्ञा अनुभविष्यन्तीत्यस्माकं विश्वासः। केनचिल्लघुकथानां समीक्षकेण लिखितम्—"लघुकथानां कुशलशिल्पिनां साफल्यस्य रहस्यं तस्य कथा-कथनाश्रितायां कलायामथवा वस्तुवर्णनक्षमतायां भवति, अथवा वस्तुस्थि-तीनां मनोदशानाञ्च चित्रणे भवति। त्रयाणामेषां पूर्णसामञ्जस्यं केवलं कल्पयितुं शक्यते, किन्तु एषा दुर्लभा स्थितिरिति"। मन्ये बिश्वालस्य लघुकथाः दुर्लभां स्थितिमेनां सुलभां कर्तुं विहितस्य प्रयत्नस्य यत्किञ्चित् प्रमाणमिति। नैतेन कथनेन बिश्वालस्य कृतित्वं तादृशीं प्रौढिमारम्भ एव भजतीति नस्तात्पर्यं केनचिदवगन्तव्यम्। किन्तु केवलमेष विश्वास एवा-स्माकं यत् यद्येवमेव बिश्वालेन लघुकथानां लेखनसाधनाऽग्रेऽपि प्रवर्त्येत ततः कामपि तादृशीं प्रौढिमवश्यमेव भजेदिति।

कथाप्रसङ्गात् सम्प्रति सुप्रसिद्धस्य दिवङ्गतस्य चलचित्रजगतः कलाकारस्य बलराजसाहनीमहाशयस्य, स्वानुजस्य भीष्मसाहनी महोदयस्य (हिन्द्याः प्रख्यातस्य लघुकथाकारस्य) विषये वक्तव्यमेकं स्मृतिपथमायात्यस्माकम्—"भीष्मस्य स्वभावगतमेकमन्यन्मया वैशि-ष्ट्यमाकलितम्। तस्मिन् (भीष्मे) त्वरा किञ्चिन्नासीति। स विश्रान्त्या स्वकार्यं निर्वहति, सुचिन्त्यं मितञ्च वदति। कदाचिदपि हठधर्मितां नाश्रयति। स्ववक्तव्यमश्राव्य अन्यस्य शृणुते। लघुकथायाः कथावस्तु-नश्चयनमपि महता धैर्येण विधत्ते। साधारणानां जनानां जीवनगतान् विषयान् स्वदृशाऽऽकलयति, तेषां सामाजिकीर्व्यक्तिगताश्च प्रतिक्रिया अधीते, पात्राणि च न कल्पनातः किन्तु जीवनतोऽन्विष्यति, चिनुते च,

...... भीष्मः कस्मिंश्चिदपि साहित्यिके विवादे नात्मानं पातयति न च किञ्चित् सिद्धान्तमाश्रित्य लिखति। स तदेव लिखति यत् तस्मै रोचते, यत् तस्य स्वयं विदितं भवति" (सारिका, अगस्त १९६५; ३५तम पृष्ठ-गतस्य संस्कृतानुवादः)। मन्ये संयोगात् बिश्वालस्यापि कश्चिदीदृश एव स्वभावः। प्रायस्तस्य वाग्मिता, श्रीहर्षानुसारेण मितञ्च सारञ्च भवति। ईदृशोऽन्तर्मुखप्रकृतयश्चिन्तनशीला न केवलं कवितायाः, लघुकथानामपि निर्माणे सफला भवन्ति, इति नायं नियमः। तथापि यावदिदृशी स्थितिः क्वचिद् घटते तावत् साहित्यं सहजमिव प्रस्फुटतामेति।

व्यथायां या बिश्वालस्य स्वगताभिव्यक्तिः सा तस्य लघुकथास्वपि भङ्ग्यन्तरेण स्फुटीभवति। **निरुद्दिष्टहृदयम्** इत्याख्य-लघुकथाया लाघवं विनयञ्चावलम्ब्य स लिखति—"कथां लिखितुमहं न जानामि। तथापि कथालेखने मेऽदम्या प्रवृत्तिः ......लिखामीति तु सत्यम्, किन्तु लेखनं कुत्रारभ्य कुत्र समापयामीति स्वयमपि न जनामि।......न जाने एतत् सत्यमुत मिथ्या, मम एकैव धारणा वर्तते यत् कवितापेक्षया कथां लिखित्वा लेखकस्त्वरितमेव प्रतिष्ठितो भवितुमर्हति लेखकसमाजे।" अत्र लघुकथागतो लेखकस्त्वरितप्रतिष्ठामवाप्तुमस्ति, किन्तु बिश्वाले नास्ति तादृशी त्वरेति शक्यते वक्तुम्। अथापि लघुकथाः केन विधिना लिख्यन्ते इति स सम्यग् जानाति। कथाया आरम्भः कुत्र क्रियते, कुत्र च समाप्यते इत्यस्मिन् विषयेऽपि स जागरूकः प्रतिभाति। स स्वदृष्टान्येव पात्राणि, स्वानुभुतांश्च जीवन-व्यापारान् स्वीयासु लघुकथासु निबध्नाति। एवं यथार्थपक्षावलम्बिनो बिश्वालस्यानुभवे किमप्यतिरिक्तमेव प्रामाण्यमुल्लसति। अत्र कानिचित्तस्य लघुकथागतान्युदाहरणानि शक्यन्ते प्रस्तोतुम्—

तस्य लघुकथा **नीरवस्वनः** एव पूर्वमत्र शक्यत उद्धर्तुम्। स्वग्रामं पत्न्या, कन्यया च समं गतेन लेखकेन मूका, बधिरा चैका ग्रामीणा 'काली'

नाम्नी बालिका कथाविषयीकृता । तस्याश्च लेखकस्य कन्यायां सहजमाकर्षणम् । काल्या व्यथा, तस्या नीरवस्वनः, यदभिधातव्यं तत्सर्वमभिदधाति । अत्र बिश्वालो लिखति—"...ममाशयमवबुध्य प्रफुल्लितायाः तस्याः मनः भृशं विषादग्रस्तमभूत् । मत्सविधे मौनमभियोगं प्रस्तुतवती केवलम् । न जाने किमर्थं मम हृदयं भृशं व्यदारयत् तस्याः स नीरवस्वनः । अहं किन्तु निरुपाय एवासम् । तस्या नीरवस्वनस्य कृते ममापि नीरवा एवासीत् सहानुभूतिः ।" कथाया अस्या अन्ते च तस्य लेखनीतो निर्गतमिदम्—"मया जीवने प्रथमवारमनुभूतं यन्मुखरस्वनान्नीरवस्वन एव बलवान् भवति । कदाचिन्मनुष्यः नोरवः सन्नपि अधिकं वक्तुं शक्नोति, पक्षान्तरे स समस्तशक्त्या चीत्कुर्वन्नपि स्वाभिप्रायं प्रकटयितुमसमर्थो भवति ।" केचिदाधुनिका आलोचनानिपुणा अत्र लेखकस्य भावुकतामतिशायिनीमाकलयन्तो वदन्तु नाम यत् किञ्चित् । परमत्र सहजतया बिश्वालेन सूचितः कश्चन स्वानुभूतो मानवीयः स्पर्शः । सः कस्यापि पाठकस्य हृदयं क्षणमार्द्रतां नेतुं प्रभूयादिति मामकीनो विश्वासः । अन्यास्वपि बिश्वालस्य लघुकथासु कश्चिदीदृशो मानवीयः स्पर्शः अनुभवितुं शक्यते ।

समाजे व्याप्तस्य नैतिकत्वविषयस्य ह्रासस्य सङ्केतः चम्पीत्याख्यायां प्रथमलघुकथायां नार्याः यौवनशोषणं विषयीकरोति । अत्र कथारम्भे स्वाभाविकी पृष्ठभूमिः,सुतरां सहजतया चित्रणमयी प्रस्तुता । नरिमिश्रेण ब्राह्मणेन कृता तारिणी देव्या अर्चना । प्रसङ्गेऽस्मिन् लेखकः प्रस्तौति—"सूर्योदयात् प्रागेव स एतद् देवताकार्यं समापयति । प्रथमतः प्रस्तरखण्डस्य स्नानम्, अनन्तरं चन्दन-सिन्दूरलेपनम्, पुष्पार्पणम् । ततः किञ्चिद् भोगनैवेद्यम् । देव्यै प्रसादरूपेण किं समर्प्यते इत्येतन्न कोऽपि जानाति । कदाचित् जानीयात् स मार्गकुक्कुरः, यः नरिमिश्रस्य पूजाकर्मणि चिरसहचरोऽस्ति । देवीसेवाकाले स तत्रैव लाङ्गुलचालनपूर्वकं भूमौ लुठति । अकस्माद् यदि कश्चिदन्यः कुक्कुरस्तत्रायाति स तं समस्त-

शक्त्या आक्रामति।" अत्र यद्यपि कथागतं किमपि तथ्यं सङ्केतितं न भवति तथापि कथा-पृष्ठभूमिः सुतरां स्फुरन्ती प्रतीता भवति। वस्तुतः स मार्गकुक्कुरः अत्र कस्यचन कामवामनाग्रस्तस्य यून उपस्थितिमग्रे निर्दिष्टमभिव्यनक्ति। स्पृहणीयः स्वाभाविकश्चायं कथोपक्रमः। अत्रत्र नवजातस्य शिशोरेकस्योपलब्धिः। जनानामाशङ्काकुलितानां पुरः अकस्मात् शिशोः मातुरागमनम्……… । एवं शनैः-शनैः कथापात्राणां कथारङ्गस्योपरि साङ्केतिकः समागमः । अत्रैव लेखकः प्रसङ्गतो निर्दिशति—"चम्प्याः क्षुधा शान्ता परन्तु विवर्द्धिता प्रकाशस्य क्षुधा"। अत्रैव कस्यचिदाक्षेपकस्य प्रश्नः—"कोऽस्त्यस्य जनकः ?" चम्प्याः सहजमुत्तरम्—"त्वम्" । मितञ्चेदमुत्तरं वस्तुतः समाजस्य कपोले चपेटाप्रहारः। केवलमेकं प्रश्नमुत्थाप्य कथाकारः कथामिमां समाप्तिं नयति ।

बिश्वालस्य प्रायः सर्वासु कथास्वस्माकं सुपरिचितान्येव पात्राणि चित्रितानि लभ्यन्ते। बिश्वालनाम्ना दर्पणेनैकेन मन्ये ग्रामेषु, नगरेषु वा भ्रमता स्वकथाविषया आत्मसात्कृताः सन्तीति। **हसुराबाबा** इत्याख्यं पात्रं आरम्भत एव जनान् हसितुं (परिहसितुं वा) विवशीकरोति। एवमेव **टिन्-टिन्-वृद्धः** इत्याख्यं चरित्रं सम्पूर्णायां कथायां जनानाम् (विशिष्य बालानाम्) उपहासपात्रतां व्रजति परन्तु कथान्ते तस्य मर्मन्तुदं मरणं किञ्चिच्चिन्तितुमपि प्रेरयति। अमाङ्गलिकस्य **धोइदासस्य** जीर्णाङ्गोच्छया मुखमावृत्य मरणमपि क्रूरस्य समाजस्याभद्रव्यवहाराणां कृते अकथितं कथयितुमीष्टे । **चित्रप्राण** इत्यस्यां लघुकथायां यादृशं चिरित्रं चत्रितं तादृशमधिश्रितं स्व० राजकपूरस्य चलचित्रमस्ति यस्मिन् स्वयमेव तेनाभिनीतम्। रेलयात्रायां द्वयोः सहयात्रापरायणयोः अन्योऽन्यस्य अन्धत्वाज्ञानं किमप्याश्चर्यमुत्थापयति पठतश्चेतसि। मन्ये प्रायः संग्रहगताः सर्वा अपि लघुकथाः प्रवर्तमानस्य जगतो जीवनस्य च जागरूकतयाऽऽकलने समर्थस्य लेखकस्य लेखनीतो निर्गताः सन्तीति। संस्कृतस्य लघुकथाकारत्वेन सर्वथा नवीनोऽपि श्री वनमालि बिश्वालः स्वीयाभिराभिर्लघुकथाभिः स्वीयं विशिष्टं स्थानं परिचयञ्चार्जयितुं क्षमो भवेत्। अथ च एवंविधानन्यान् संग्रहान् प्रस्तोतुं सफलप्रयत्नो भूयादिति कामयमानो विरमामि।

= × =

PREFACE

(By the Author)

Before introducing this anthology of Sanskrit short stories titled नीरवस्वनः to the galaxy of story-lovers I would like to look behind to analyse the historical developments of the tradition of Sanskrit stories. The Indian tradition of stories had a long background to be remembered in the form of पञ्चतन्त्र, हितोपदेश, वेतालपञ्चविंशतिः सिंहासनद्वात्रिंशिका, अवदानशतकम्, आर्यशूरजातकम्, कथासरित्सागर, तिलकमञ्जरी, उदयसुन्दरी, कादम्बरी, हर्षचरितम्, दशकुमारचरितम्, वासवदत्ता, शिवराजविजयम्, बृहत्कथा, भोजप्रबन्ध, जातककथाऽ, नर्मदासुन्दरी-कथा, कथारत्नसागर, कथासग्रह, कथामहोदधि, सप्तव्यसनकथा, सम्यक्त्वकौमुदी, पुरुष-परीक्षा and शुकसप्तति etc. In fact, the tradition of Indian story may find its origin well in the vedic texts (पुरुरवोर्वशी etc.) followed by Brāhmaṇic (शौनःशेपम् etc), Upaniṣadic (यमनचिकेत etc.) as well as Purāṇic texts. The Sanskrit poetological literature records and defines different types of story and fiction such as कथा, कथानक, कथानिक, आख्यान, आख्यायिका, आख्यानक, खण्डकथा and परिकथा etc. In modern Indian languages one may find the terms like गल्प, काहाणी (Oriya); कहानी (Hindi) etc. to denote story.

कथा and लघुकथा are the common terms in modern times to represent story or rather short story. The concept of लघुकथा ows its origin to European literature in general and English literature in particular. Writing story in Sanskrit is not new as I have pointed

out earlier, but one may clearly visualise certain fresh developments in its trend during these days. So far as Sanskrit-लघुकथा is concerned, I feel, it ows to other Indian languages, the literature of which is marching neck to neck with that of any other language of the world. Therefore, there is nothing to be astonished about if Sanskrit-लघुकथाs or their writers are found influenced by their respective regional languages.

In all, 30 short stories are embodied under this title नीरवस्वनः denoting 'silent sound'. In fact, the title itself speaks volums of the contents of this collection which is based on the observance of the uncommon characters of thc common surroundings. The stories which have got fresh approach towards the age-old problems of the society, always have something extra to express in addition to what appear from their vocabulary. The characters which are made the objects of the subjects of the stories, speak a lot even when they are silent. The justification of the title, indeed, lies in this fact.

The language and style of this collection are simple but suggestive. The themes roam around rural civilization but they leave enough scope for satiric expressions meant for the artificial stereo-type-life-pattern of urban society. The stories indirectly demand due recognition for such characters who are being neglected in this selfish society.

The outo-oriya-versions of many of these stories are read and appreciated in the weekly literary meetings of उत्कलचित्तनिका at Pune, which are generally held in the evening of every week-end. I will certainly fail in my duty if I do not remember all my friends of उत्कलचित्तनिका on this occasion who used to be my main sources of inspirations through their appreciation as well as criticism. The Oriya versions as well as the Sanskrit versions of many of these stories are later published in several literary periodicals and some of them have been awarded by some prestigious organisations and *Akādamis* I feel honoured to thank them all on this auspicious occasion.

I am obliged to Dr. K. N. Jha who has been kind enough to go through with the press copy and to suggest necessary amendations here and there. It is also my pleasure to express my gratitude towards Prof. R. V. Tripathi and Prof. Jagannath Pathak for their generosity to write a few words for this collection. I have every respect in remembering Prof. S. K. Mishra in this occasion whose constant and consistent inspirations encouraged me throughout. At last but not the least, I thank the owner as well as the workers of Arvind Printers for facilitating its smooth accomplishment.

I regret for the errors that have crept in, in this collection. Far that, may I request the learned readers to kindly consult the Errata as well as the corrigenda appearing at the end of the book !

कथानुसन्धानम्

चम्पो

पत्रपुर-चतुष्पथम् । चतुःपार्श्वं प्रसृताः चत्वारः पन्थानः । एवं प्रतीयते यथा सरलरेखाद्वयं परस्परं विच्छेद्य चतुरः समकोणान् सृजति । जातीय-राजपथस्योभये पार्श्वे मुखरिता काचित् क्षुद्रा विपणिः । तत्र चाधिक्यं चायताम्बूलापणयोः । ततः परं भोजन-उपाहारगृहयोः । विशिष्य 'ट्रक'-चालकानां कृते उद्दिष्टं मुक्ताङ्गनं भोजननिलयम् (ढावा) यत्र भोजनैः साकं मद्यमपि मुक्ततया परिवेष्यते । एकश्च औषधालयः । ड्राक्तर-अनुपामहान्तेः चिकित्साकेन्द्रम् । विपण्याः एकस्मिन् प्रान्ते उच्चइंराजी विद्यालयः । पञ्च, सप्त वा वस्त्रापणानि तथा विविधापणानि । एकं फलापणं, द्वे च 'स्टेसनरी''-आपणे । पुरातनः कश्चित् पत्रालयः । तत्सविधे वटवृक्षः । वटवृक्षस्य चतुःपार्श्वे नवनिर्मितं प्रस्तरपीठम्, यस्योपरि विराजतेतरां तारिणीदेवी । तत्रत्या प्रत्यक्षदेवता । यस्याः पीठोपरि एका मञ्जूषा (हुण्डी) स्थापिताऽस्ति मन्दिर-निर्माण-सहाय-तार्थम् । देवीस्थाने दृश्यते एकं सिन्दूरजर्जरितं प्रस्तर-पिण्डम् । अकस्माद् आगताः साधवः, सन्तः योगिनश्चास्य वृक्षस्याधः विश्रामकामाः रात्रौ तिष्ठन्ति । इयमेव पत्रपुर-विपण्याः संक्षिप्ता भौगोलिकी स्थितिः, ऐतिहासिकी च पृष्ठभूमिः ।

पत्रपुरग्रामस्य पूजको ब्राह्मणः नरिमिश्रः प्रत्यहं प्रातरुत्थाय स्नानादिकं समाप्य सर्वप्रथमं प्रस्तरमय्यास्तस्याः तारिणीदेव्याः ध्यानार्चनार्थम् तत्रागच्छति । सूर्योदयात् प्रागेव स एतद् देवसेवाकार्यं समापयति । प्रथमतः प्रस्तरखण्डस्य स्नानम्, अनन्तरं चन्दनसिन्दूरलेपनम्, पुष्पार्पणम्, ततः किञ्चित् भोगनैवेद्यम् । देव्यै प्रसादरूपेण किं समर्प्यते इत्येतत् न कोऽपि जानाति । कदाचित् जानीयात् सः मार्गकुक्कुरः यः नरिमिश्रस्य पूजा-कर्मणि चिरसहचरोऽस्ति । देवीसेवाकाले सः तत्रैव लाङ्गूलचालनपूर्वकं भूमौ लुठति । अकस्मात् यदि कश्चिद् अन्यः कुक्कुरस्तत्रायाति स तं समस्तशक्त्या आक्रामति ।

देवी तारिणी नूतनपीठमन्विष्यन्ती अत्रैवागता वर्तते इति नरिमिश्रस्याभिमतम्। एतद्विषये नरिमिश्राय स्वप्नादेशोऽभवत् । ततः नरिमिश्रस्य वचनानुसारं ग्रामवासिभिः विपणीवणिग्भिश्च एतत् प्रस्तरपीठं निर्मापितम् । आगामिनि वर्षे तस्याः मन्दिरं निर्मापयिष्यते इति कृत्वा तत्रत्ययुवकसंघस्य युवकाः वंशखण्डेन यानान्यवरुद्ध्य "चन्दां" संगृह्णन्ति । मातुः तारिण्याः मन्दिरं भविष्यति । तत्र विरोधस्य धृष्टतां को वाचरिष्यति ? पत्रपुरजनाश्चैवं मन्वते यद् यस्मात् दिनाद् देव्याः तारिण्याः पत्रपुरचतुष्पथे शुभाविर्भावस्ततः परमनुदिनं विवर्द्धते पत्रपुरविपण्याः श्रीः, समृद्धिश्च । जातीयराजपथस्य उभयपार्श्वे प्रतिदिनं कस्यापि नूतनापणस्योद्घाटनं दृष्टिपथमायाति ।

× × ×　　　× × ×　　　× × ×

रामनवमी । प्रभातात् प्रागेव जलपात्रं, पुष्पादिकञ्चादाय पीठोपरि आगच्छन्नेव नरिमिश्रः आश्चर्यचकितोऽभवत् । पीठोपरि असहायावस्थायां लुठति कश्चिन्नवजातशिशुः । नरिमिश्रस्य चीत्कारं श्रुत्वा तत्र एकत्रीभूताः केचन अन्ये च अपरिपक्वनिद्राः जनाः । समस्वरेण सर्वेषामेकैव जिज्ञासा—कस्यायं शिशुः ? का च चण्डालाऽत्र स्वपापगर्भं विसृज्य गतवती । कश्चायं युगः पापमय आगतः ? सन्तानलाभार्थं जनाः देवतालये 'धारणायाम्' उपविशन्ति स्म । देवतामुद्दिश्य मानसिकं, व्रतमुपवासञ्च कुर्वन्ति स्म । परन्त्वद्य जातं सन्तानमपि मातरः स्वपापगोपनार्थं देवतायै समर्प्यं गच्छन्ति । घोरश्चायं कलिकालः ।

तावत् मलिना जीर्णवस्त्रा च काचिद् युवती देवीपीठस्योपरि आगत्य शिशोः समीपे उपाविशत् । अवबोद्धुं च नाशक्नोत् किमर्थोऽयं संमर्द इति । कथञ्चायं जनसमूहोऽत्र एकीभूतः । जनानां मुखमुद्रातः अनागतां काञ्चित् शंकामापदञ्चाधीत्य जीर्णवस्त्रप्रान्तेन आवृणोत् तं नवजातशिशुम् । तेनानावृतौ सञ्जातौ तस्य सुपुष्टवर्तुलस्तनौ । परन्तु नासीत् तत्र तस्याः भ्रूक्षेपः । नासीत् च लज्जाबोधः । स्वशावकानां रक्षयित्री कुक्कुरीव अभाषत कामपि पारम्परिकगालिम्—"दास्याः पुत्राः, श्यालाः । अत्र मम सन्तानमपहर्तुमागताः । इतः प्राग् अत्र न कोऽप्यागच्छति स्म । जाते च मम शिशौ सर्वे एकत्रिताः मन्त्रयन्ति तस्यापहरणार्थम् । को गच्छति एतेषां गृहम् ? कश्च पृच्छति एतेषां जीवनवृत्तान्तम् ?" कदाचित्

नारीसुलभा कदाचिच्च पुरुषजनोचिता गालिस्तस्याः मुखादनर्गलं निःसरति । नीरवश्च जनसमूहः ।

शनैः स्पष्टीभूतः रहस्यावृत्तः नाटकीयवृत्तान्तः । इयमेव युवती अस्य नवजातस्य मातास्ति । जनसमूहात् कश्चिदभाषत—"इयं तु चम्पी। उन्मत्ता सा मासं यावत् कुत्र गतासीत् । अद्यैवागता स्यात् ।"

चम्पी । पत्रपुरेऽतिपरिचिता । वर्षद्वयात् प्रागेव सा पत्रपुरग्रामे हठात् प्रादुर्बभूव । आदौ जनास्तां भिक्षार्थिनीं मत्वा खाद्यपेयमददुः । परन्तु तस्याः व्यवहारात् सा उन्मत्ता इति ज्ञातुं विलम्बो न जातः । तस्माच्च दिवसात् जनाश्चन्द्रसूर्याविव चम्पीमपीह पत्रपुरग्रामेऽथवा विपण्यां पश्यन्ति । मध्ये मध्ये दशदिवसार्थं पञ्चदशदिवसार्थं वा चम्पी अदृश्या भवति । पुनः कियद्दिनानतरं मेघावृतः सूर्य इव पत्रपुरग्रामे आविर्भूय विचरति । चम्पी कुत्र गच्छति कुतश्चागच्छतीति न कोऽपि जानाति न वा जिज्ञासते । कदा पुरिकां, वटकं वा उपाहारगृहाद् गृहीत्वा खादति । कदा च राजपथे नृत्यति । कदा च भोजनालये मत्स्यम्, ओदनं च याचते । यदि न मिलति तर्हि तत्कर्मचारिभ्यः दन्तान् प्रदर्श्य उपहसति । कदा च कञ्चिद् वस्त्रालयं गत्वा परिचिता ग्राहिका इव उपविशति । हसन्ती च वदति—"भ्रातः ! एतां शाटिकां मह्यं प्रयच्छतु, धारयिष्ये । मदुपरि रमणीया भास्यति । साऽपि शाटिका समीचीनास्ति । काचित् 'खादि'-मिश्रिताऽस्ति । अतः शीतर्त्तौ शीतरक्षां करिष्यति । अस्तु, ताञ्च चित्रितां शाटिकां मह्यं ददातु, विशेषावसरे धारयिष्ये ।" यदा आपणिकस्तामभिक्रुध्यति तदा ततः निर्गत्य अन्यत्र गच्छति ।

× × ×　　　　× × ×　　　　× × ×

वर्षद्वयात् प्राक् यदा चम्पी नूतनया पत्रपुरे आगतासीत् तदा 'ट्रक' चालकादारभ्य मद्यपं यावत् सर्वेषां कुदृष्टिः तामेव केन्द्रीकृत्य भ्रमति स्म । चम्पी नवयुवती । उन्मत्ताऽपि सुन्दरी । सुपुष्टा तनुवल्ली । श्यामलवर्णाऽपि आकर्षिका । फेनकादिभिः स्नानं कृत्वा यदि नववस्त्रं धारयिष्यति तर्हि तां परिणेतुं नवयुवानोऽपि उत्सुकाः भविष्यन्ति ।

"रघुआ" नाम्नः चायापणिकस्य पुत्रः प्रकाशः हाई स्कूल-परीक्षायामसफलः सन् चायापणे स्वपितुः साहाय्यमाचरति । अपरिणतवयसोऽपि तस्य कामदृष्टिः चम्पीम् अन्विष्यति । बहुवारं पितुः परोक्षे चम्पीं

प्राप्तुं कामयते। एकदा रात्रौ सप्तवादनसमये क्षुधातुरा चम्पी तस्यापणं किञ्चिद् भोक्तुमागता। प्रकाशस्य पिता आपणे नासीत्। एतादृशस्य सुयोगस्य प्रतीक्षायां बहुदिनेभ्य आसीत् प्रकाशः। तां शतग्रामपरिमितं पलाण्डुवटकं खादितुमदात्। चम्प्याः क्षुधा शान्ता, परन्तु विवर्धिता च प्रकाशस्य क्षुधा। आपणस्य पश्चभागे यदा तस्याः देहापहरणे तत्पर आसीत् तत्क्षण एव रञ्जितहस्त इव केनचिद् गृहीतः। क्षणेनैवैषः उदन्तः पत्रपुरे राष्ट्रीभूतः। प्रकाशः जनैर्निन्दितः लाञ्छितश्च। पित्राऽप्यसौ दण्डितः। लोकलज्जया मासद्वयं यावत् आपणं न आगतवान् सः।

चम्पी किन्तु निर्विकारा। सा कस्माद् बिभेष्यति ? सा न कस्यापि गृहे तिष्ठति, न वा भोजनार्थं कस्यापि निर्भराऽस्ति। सा तु पूर्णस्वाधीना। अद्यात्र निवसति, श्वः परत्र। न कस्यचिद् भर्तुः ताडनं यदि रात्रौ विलम्बेनायाति, न वा तस्याः रामराज्यरजक्या इव गृहान्निष्कासनं यदि कुत्रापि निशां यापयति।

××× ××× ×××

सर्वेषां मुखे असमाप्ता जिज्ञासा। किमेतत् चम्प्याः निजसन्तानम-थवा कस्माद् गृहात् चोरितम् अनया। यदि परस्य सन्तानं स्यात् तर्हि स्तन्यपानं कथं कारयेत् ? षण्मासान् यावत् चम्पी अत्र पत्रपुरे नासीत्। यद्यभविष्यत् तर्हि किं साऽवदिष्यत् यत् सा जननी भवितुं गच्छतीति। कदाचित् सा स्वयमपि न जानीयात् तस्याः मातृत्वसूचनाम्। "चम्पी गर्भपातं किमर्थं नाकरोत्। डा० अनुपा महान्तो तु प्रसूतिविशेषज्ञा अस्ति। प्रतिदिनं किमपि गर्भपातवृत्तमागच्छति तत्सविधे। यदि चम्पी आगता स्यात् तर्हि कदाचित् विनामूल्येनापि तस्याः पापगर्भस्य गर्भपातम-करिष्यत्"। संमर्दाच्च कस्यचिदस्पष्टोक्तिरासीत्।

गर्भे किं पापं, किं वा पुण्यम् कथं वा जानीयात् चम्पी ? सा एतदपि न जानाति यत् तस्याः जातसन्तानस्य कोऽस्ति जनक इति

चम्प्याः एतादृशेन चोपेक्षापूर्णव्यवहारेण जनाः रुष्टाः अभवन्। विरक्त्या च कश्चिदवोचत्—इयम् उन्मत्ताऽत्र नाटकं रचयति। कुत्र किमाचरितम् अनया। अस्माकम् अवमानानार्थमत्रोपस्थिताऽस्ति। दयां

प्रदर्श्य अस्माभिराश्रयो दत्तः। इयं किन्तु संसारं बर्द्धयितुं प्रयतते। यदि किमप्यधिकं कालम् अत्र स्थास्यति तर्हि नूनं सा पत्रपुरं वेश्यालये परिवर्तयिष्यति। अग्रे चोपसर्प्य आक्षेपमुद्रायां कश्चिदपृच्छत्—

— अरी पुंश्चलि! कस्यायं शिशुः?

— 'मम', निर्भीकतया मातृत्वं न्यवेदयत् चम्पी।

— 'कोऽस्त्यस्य जनकः?' सक्रोधमपृच्छत् आक्षेपकः।

— 'त्वम्।' चम्प्याः सहजमुत्तरम्।

समवेताः सर्वे उच्चैरहसन्। जिज्ञासुयुवकः लज्जया आर्द्रोऽभवत्। अग्रे वक्तुं तत्सविधे शब्दा एव नासन्। जनेभ्यो दृष्टिं चोरयित्वा पलायितुं प्रारभत। एतावतां जनानां समक्षम् असत्यमपि अचिरात् सत्यं भविष्यति। समवेता जनता पृष्ठं प्रदर्श्य स्वगृहमार्गमन्वसरत्। अत्र कोऽपि सन्देहो नास्ति यत् चम्पी अस्यामेव पत्रपुरविपण्यां कस्यचित् सहृदयस्य दयया माता अभवत्। अतः किञ्चित् नेतृत्वं प्रदर्श्य कोऽत्र अस्य पापगर्भस्य पिता भविष्यति?

अशुभमुखः

प्रातरेवैषा वार्ता राष्ट्रीभूता यत्—"धोइआ (धोइदासः) अद्य न जीवति।" केचन खेदं प्रकटितवन्तः-हन्त ! अकिञ्चनस्यैतस्य वंशः विलुप्तः। केचन पुनः प्रसन्नाः जाताः—बहुसमीचीनं जातम् । प्रातःकाले शुभकार्याणामनुकूलेषु इतः परं न प्रतिघातः, व्याघातो वा स्यादिति । यदि प्रातरेव कश्चित् तस्याशुभमुखं पश्यति तर्हि आदिवसं तत्कृते भोजनमपि न सुलभं भवति । धोइदासं विहाय ग्रामेऽस्मिन् द्वे चापरे अशुभमुखे स्तः। विधवायाः अपुत्रिकायास्तस्याः राधायाः मुखम् । अपरञ्च जन्मजातकृपणस्य चिन्तामणिदासस्य मुखम् । केचन दृष्टाश्चैवं वदन्ति—यदीश्वरः एतावपि कथं शीघ्रं न नयति येन ग्रामस्यास्य मङ्गलं स्यात् ।

धोइआ कश्चित्ः सरलहृदयो मनुष्यः । मानविकगुणैरोतप्रोतः । जनानामुपकारे तस्य विश्वासः न त्वपकारे । बाल्याद् अनाथः, पितृमातृहीनः । कृषकपरिवारे तस्य जन्म किन्तु पित्रा प्रादेशमात्रमपि भूमेः तस्य भरणपोषणार्थं न त्यक्तम् । अनाथः धोइआ परक्षेत्रेषु कृषिं, कृत्वा परगृहे च वृत्तिं, दैनिकभृतिं वा विधाय स्वजीवनं यापयति ।

धोइदासस्य वयोऽभ्यवर्द्धत । परन्तु विवाहस्य स्वप्नमपि द्रष्टुं तेन साहसः न कृतः। को वा तस्यास्त्यभिभावकः यस्तस्य विवाहविषये चिन्तयिष्यति ? न पिता, नाग्रजः । केचन ग्रामीणाः यदा कदा वाग्रहं प्रकटितवन्तः यत्–धोइआ काञ्चित् दरिद्रकन्यकामथवा कामपि विकलाङ्गीं कन्यां परिणयतु इति । को वा एतस्मै वृत्तिहीनाय स्वकीयां कन्यां दद्यात् ? एतादृशं प्रस्तावं श्रुत्वा धोइआ केवलं हसति । उपार्जनेन स्वोदरं कथमपि भरति सः । किमर्थं गृहे हस्तिनीं पालयिष्यति ? केवलं जनाः हसिष्यन्ति तस्योपरि । अथवा अभावपीडिता कदाचित् सा विवाहितापि तं त्यक्त्वा केनचिद् अपरपुरुषेण सह देशान्तरं गमिष्यति । तेन तस्य ग्रामे, समाजे च नासाकर्तनमेव भविष्यति । एवं परगृहेषु वृत्तिं, भृतिं वा विदधतः व्यपगतं धोइदासस्य यौवनम् । सांप्रतं

सोऽर्द्धवयस्कः । जनचक्षुषि किन्तु सोऽद्य वृद्धः । अविवाहितत्वात् अशुभोऽपि । जनाः प्रातःकाले अविवाहितस्य, अपुत्रकस्य, विधवायाश्च मुखं द्रष्टुं नेच्छन्ति । न जाने इयं परंपरा कस्मात् कालात् कथं वा प्रचलितास्ति यस्याः निर्वाहोऽद्यापि आधुनिकसमाजे यदा कदा भवति । एतेन तेषां दिवसव्यापि कार्यं विफलं भवतीति तेषामन्धविश्वासः । यदि कश्चिद् भ्रमादपि तस्य मुखं पश्यति तर्हि स्वभाग्यं क्रोशति—इदृशोऽमंगलमुखस्य दर्शने किं वा यशः तस्य भविष्यति ? केचन तु पूर्वनियोजितं शुभकार्यमपि तस्य मुखदर्शनानन्तरं स्थगयन्ति। प्रातश्चेत् तस्य मुखदर्शनं तर्हि शुभमपि कार्यम् अशुभीभवति। शुभदिनेषु, उत्सवेष्वपि सुभोजनं तु दूरं, भोजनमपि न मिलति तस्य मुखदर्शनेन । कश्चित् तस्य मुखं प्रातः दृष्ट्वा न्यायालयं गच्छति चेत् तर्हि तस्य पराजयः सुनिश्चितः। सुमङ्गली कन्या यदि तस्य मुखं द्रक्ष्यति तर्हि विवाहमण्डपादेव तस्याः वरः अकारणं प्रत्यावर्तिष्यते। परीक्षार्थिनोऽपि यदि विद्यालयगमनसमये धोइआं पश्यन्ति तर्हि तेषाम् अकृतकार्यतैव हस्तयोः लगति । वृत्तिहीनो यदि साक्षात्कारं गन्तुकामोऽस्ति तर्हि धोइदासस्य दर्शनम् उपेक्षितुं प्रयतिष्यते।

इदानीं जनाः तस्य समक्षमेव स्पष्टं श्रावयन्ति यत् "त्वया कस्यापि शुभानुकुलेषु मार्गावरोधः न कार्यः" । यस्य गृहेषु कार्यं कर्तुं गच्छति ते वदन्ति—"तव विलम्बागमने एवास्माकं मङ्गलम् । काचित् कार्यन्यूनता, हानिश्च भवति चेत् तदस्माभिः सोढव्यम् । किन्तु प्रातरेव नागन्तव्यम् त्वया ।" धोइआ मर्माहतो भवति एतादृशं कठोरवचनं श्रुत्वा । परन्तु किं करिष्यति ? उदरपूरणार्थं उपायान्तरं तु तत्सविधे न विद्यते। तस्य हृदयम् एतत् सर्वं श्रावं श्रावं पाषाण इव संजातम् । सर्वं एव तस्य भाग्यदोषः । स्वर्णपिण्डं स्पृशति चेत् मृत्तिका भवति । यदि सः बाल्यकालात् पितृमातृहीनः न स्यात् तर्हि किमेते तम् एवं वक्तुं साहसं कुर्वीरन् । तस्य किं सर्वेषामिव सुखेन संसारं यापयितुं अभिलाषो न भवति ? सः किं गृहे सुन्दर्याः पत्न्याः प्रेम, प्राङ्गणे च स्वापत्यानां चापल्यं द्रष्टुं नेच्छति ?

अनुदिनं धोइआ पथि चलितुमपि बिभेति । बालाः तम् "ओथडा" (अविवाहितत्वादशुभः) इति आहूय उपहसन्ति । सः स्वयमपि

सतर्कतया प्रातः बहिर्गच्छति, येन तस्योपरि कस्य शुभदृष्टिः न पतेत्। यदि कश्चित् तस्य मार्गे अकस्माद् आगच्छति स स्वयमेव वक्रं पन्थानमवलम्बते। जानन् एव विलम्बेन गृहात् निःसरति। शीतदिनेषु आतपं सेवितुमपि स जनेषु सम्मिलितो न भवति येन कश्चित् तं नाभिक्रुद्ध्येत्। प्रच्छन्नतया सः स्वस्य शोभञ्जनवृक्षस्य नीचैरुपविश्य स्वदेहम् उष्णीकरोति। तत्रैवोपविश्य स्वस्वामिनः बलीवर्दबन्धनाय रज्जुं, तुण्डिकां वा निर्माति।

× × ×　　　× × ×　　　× × ×

विगतेषु केषुचित् दिवसेषु ग्रामे घोइदासस्य दर्शनं द्वितीयायाश्चन्द्रदर्शनमिव दुर्लभम् अभवत्। न कस्यचिद् गृहे वृत्तिं कर्तुमुपवेष्टुं वा स आगच्छति। तस्यैतादृशेऽदर्शने केचन बालास्तस्य कुटीरं गत्वाऽपश्यत् यत् घोइआ रोगग्रस्तः। ज्वरेण कम्पते तस्य देहः। सत्यपि ज्वरे घोइआ न कदापि औषधसेवनं करोति। ज्वरः देहे आयाति पुनर्देहे एव विलयं गच्छति। न तं कश्चित् सेवते न वा कश्चित् तस्य शुश्रुषां विदधाति। स तु क्षुधितः सन्नपि न कस्मै किमपि याचते। दूरीभूते तु ज्वरे पुनः कस्यचिद् धनिकस्य गृहे समुपस्थाय दैनिकभृत्तिं करोति। परन्तु अयमेव ज्वरस्तस्य प्राणान्तको भविष्यतीति कस्यापि धारणा नासीत्।

ज्वरोऽयं घोइदासं न त्यजति। तस्येमामवस्थां दृष्ट्वा केचन ग्रामवासिनः काश्चन उदारमहिलाश्च आगत्य तस्यावश्यकताविषये जिज्ञासन्ते। किञ्चित् पथ्यमपि सेवितुं यच्छन्ति। परन्तु घोइआ एतत् सर्वं न खादति। तस्यैतादृशे चौदासीन्ये तस्य अस्वास्थ्यं कारणमुत स्वाभिमानो वा, एतत्तु स स्वयमेव जानीयात्।

अद्य प्रातः किन्तु घोइदासेन लोकादस्मात् चिरविदायो गृहीतः। अमङ्गलस्य लाञ्छनया लाञ्छितं मुखमद्यप्रभृति अदृश्यं भविष्यति। मृतेऽपि घोइदासे केचन तस्य शवमपि बोढुं, द्रष्टुं च नागच्छन्ति यतस्तन्मुखदर्शनेन कदाचित् किञ्चिद् अमङ्गलं भवेत्। अतस्तस्य शवसंस्कारः प्रातर्न भवतु, कियत्कालात्परं मध्याह्ने भवत्विति केषांचिदभिमतमासीत् येन सः अशुभदोषः नापतिष्यति। अन्यश्च कश्चित् नैष्ठिकोऽन्धविश्वासी अद्य न्यायालयं गन्तव्यमिति कृत्वा तस्य शवमपि स्प्रष्टुं नेच्छति येन तस्य पराजयो न भवेत्।

अन्ततो गत्वा केचन युवानः एतत् कार्यं सम्पादयितुं अग्रेसराः अभवन्। ते तस्य कुटीरं गत्वा आश्चर्यचकिताः अभवन्। ते तत्र पश्यन्ति यत् धोइदासस्य मुखं जीर्णाङ्गोच्छया आवृतमस्ति। मृत्युसमयेऽपि तेन न विस्मृतं यत् तस्य मुखमशुभमस्ति। सोऽद्यापि अविवाहितः। अद्यापि अपुत्रकः। तस्य शववाहकानाममङ्गलं सः कथं प्रातः मुखप्रदर्शनपूर्वकं विधास्यति ? ये तस्य शवसंस्कारं कृत्वा तस्योपकर्तुम् आगमिष्यन्ति ते तु तस्योपकारिणः सन्ति। सः तेषामधमर्णः स्थास्यति। तस्य ऋणस्य परिशोधं कर्तुं तेन पुनर्जन्मप्राप्त्यर्थमीश्वरोऽपि प्रार्थितः। आजीवनं येन समाजस्य सेवा, परोपकारञ्च विहितं, सोऽद्य उपकारिणाममङ्गलं कथमकरिष्यत् ?

अभीप्सा

उदासः अपराह्णः । अस्ताचलोपगतरविकिरणरञ्जिता च धरणी । लोहिताक्तं वारुणी-दिङ्मुखम् । मन्दं नुदति वासन्तः पवनः । स्ववासाभिमुखाः खगाः । प्राङ्गणे जीर्णशय्याम् अधिशेते विमलादेवी । मृदु व्यथां प्रकटयन्ती द्वारदेशम् अवलोक्य–

"ओः ! सुरेश !! अद्यापि नागतः । किं वा सः कुर्यात् ?" स्वयमपि अक्षमा सा । तदेकपुत्रसहाया केवलं तं प्रतीक्षते । स्वजीवनस्यापराह्णे न सा सुखासीना । तेन सह दुरारोग्यः कर्कटव्याधिः । एवं खलु उच्यते, यस्मिन् सकृद् एष वसतिम् उपकल्पयति तं चिराय स्वापयितुं न विस्मरति । आबाल्यतः दुःख-दारिद्र्य-लाञ्छनादिभिर्युध्यमाना प्रतिपदं निष्पेषिताऽपि महत्वाकाङ्क्षां, विजयाभीप्सां च न कदाचित् सा त्यक्तवती । अभीप्सते स्म सा सुरेशस्य आगमनम् ।

× × ×   × × ×   × × ×

आसीत् तादृशी एव अभीप्सा पञ्चविंशतिवर्षेभ्यः प्रागपि । परन्तु नासीत् तस्याः व्याकुलता न वा दायित्वबोधः । मुक्तगगनतले कल्पितायाममरावत्याम् आसीत् सा इन्द्राणी । प्रतीक्षायाम् आसीद् आनन्दः । मिलने च परितोषः ।

पतिः, शशिकान्तः । उच्च-इंराजी-विद्यालयस्य शिक्षकः । विद्यालयादागच्छन् आनयति कदाचित् चलच्चित्रप्रवेशपत्रं, कदाचिद् वा प्रीत्युपहाराणि । स्वल्पवेतनोपजीवितेऽपि परिवारेऽस्मिन् नासीत् किञ्चिद् असौविध्यम् । जम्पती दिवसं मुहुर्तमिव अन्वभवताम् । विवाहस्य वर्षद्वयानन्तरं परिवारेऽस्मिन् आगतः कश्चित् नवातिथिः । नारीजीवनस्य अभीप्सितार्थसिद्धिः । वात्सल्यगुणप्रधाना नारी । अतः सुरेशं प्राप्य जगद् विस्मृतवती माता विमलादेवी ।

कालस्य कुटिला गतिः । चक्रनेमिक्रमेण कदाचिद् उपरि कदाचिच्च नीचैर्गच्छति सः । किं न कमप्ययं सततं सुखिनं द्रष्टुं सहते ?

× × ×   × × ×   × × ×

शिक्षकान्दोलनम् । शिक्षाक्षेत्रे वह्वीः समस्याः केन्द्रीकृत्य आन्दोलनस्यारम्भः । भुवनेश्वर-रेलनिस्थानाद् आरभ्य राजभवनं यावत् प्रवृत्ता गणयात्रा ।

अवश्यम् अद्यैव शिक्षाक्षेत्रे परिदृश्यमानानां समस्यानां समाधानस्य, स्मारकपत्रे उपनिवद्धैः उपायैः मन्त्रिमहोदयेन बद्धपरिकरेण भाव्यम् इति प्रत्यायायितव्यम् । कार्यं वा साधयेयं शरीरं वा पातयेयम् इति व्रतेन शिक्षकवर्गः शशिकान्तनेतृत्वे अग्रे-सरति । भट्टैरवरुद्धा गणयात्रा । रज्जुबन्धम् अतिक्रम्य विप्लविनो यदा जिगमिषन्ति तदा भट्टाः यष्टिचालनं, लोतकवाष्पं च प्रयुक्तवन्तः । क्षणेनैव खण्डसमरः संजातः । परिस्थितिं नियन्त्रयितुं मण्डलाधीशैः गोलकास्त्रप्रयोग आदिष्टः । तेन आहताः अगणितसरलप्राणाः । तत्र च महात्मा शशिकान्तः ऐहिकीं शासनदुर्नीतिं सोढुम् असमर्थ इव परलोकवासं कामयामास ।

अनपायिनि संशयद्रुमे यथा वल्लरी पतनाय कल्पते, तादृशी अवस्था जाता विमलादेव्याः । शशिकान्तं विना वाताहततरुस्कन्धहीना लतेव संवृत्ता सा ।

निर्व्याजभावास्पदं बालस्वभावः । अतः सुरेशः कुतो वा जानीयात् जगतः वैचित्र्यम् ? कुतो वा अवगच्छेत् नियतेः क्रीड़नम् ? सचकितः रुदतीं मातरम् अवलोक्य अरोदीत् केवलम् । परं प्रतिवेशिना प्रतिबोधितः असौ यत् "पिता तस्य स्वर्गस्थ-उज्ज्वलनक्षत्रेषु अन्यतमः" । विमलादेवी तु आत्मानं हन्तुम् ऐच्छत् तदानीम् । परन्तु तत्रापि बन्धनम् आसीत् सुरेशः । एक एव पुत्रस्तस्याः । पालयितव्यः सः । समाजे सः प्रतिष्ठापयितव्य इति दृढ़व्रतम् अङ्गीकृतवती सा । इत्थं खलु उच्यते—दुःखं दौस्थ्यं हि मानवं महत्वाकाङ्क्षायाः परां काष्ठां प्रापयति इति । परन्तु कुतस्तस्याः धनम् ? स्वल्पवेतनभोगिनः शशिकान्तस्य नासीत् तथा धनसञ्चयः । किं कर्तव्यम् ?

भाटकगृहम् आसीत् तेषां शरणम् । कुतो वा दास्यति भाटकम् ? उदर-भरणाय अपि धनं नास्ति । एवमनन्योपायायां तस्यां शशिकान्तस्य तथाकथितबन्धुः चौधुरीमहाभागः सहानुभूतिं प्रदर्शितवान्—

"मा भैषीः। चिन्तां मा कार्षीः । सपुत्रा मद्गृहम् आगत्य तिष्ठतु। अस्मद् बालान् पाठयतु। शशिकान्तः मम अन्तरङ्गो बन्धुः। किम् एतावन्तं साहाय्यं कर्तुं न शक्नोमि ?" विमलादेवी तदा कार्तज्ञ्यं प्रकटितवती तस्मै। स्वभावसरला दुरवस्थापन्नैव सा अबला। कुतो वा जानीयात् विषकुम्भस्य पयोमुखस्येव दुर्जनस्य चारित्र्यम् ?

नगरस्य प्रख्यातधनिकः तथा "कण्ट्राक्टरः" प्राणवन्धुचौधुरी। पत्नी सर्वकार-अंग्रेजी-उच्चविद्यालये शिक्षयित्री। अपत्य-त्रयम्। एकः पुत्रः, द्वे च कन्यके।

विमलादेवी, सुन्दरी। नवयौवना। पञ्चविंशतिवर्षवयस्का। तस्यामनुरक्तः प्राणबन्धुः। तदर्थम् एषा सहानुभूतिः। स्वगृहे ताम् अभीप्सितां संप्राप्य दिने दिने परिवर्द्धिता तस्य कामवासना। कामाग्निः विवेकं भस्मसात्-करोति।

मध्याह्नः। सर्वे बालकाः विद्यालयं गताः। आतपभयेन शरीरस्य छायाऽपि न बहिर्निःसरति। विमलादेवी स्वेदकं वयति। खट्वारूढः प्राणबन्धुः पिबतीव तस्याः अङ्गयौवनम्। गृहे ताम् एकाकिनीं दृष्ट्वा द्विगुणिता तस्य कामवासना। आत्मानं संयमयितुं न शक्नोति सः।

—ओः ··· ! शिरो मे नितरां व्यथते। अयि विमले ! विमले !!

—आम्।

—अपि किञ्चित् अमृताञ्जनं प्रलेपयितुं शक्नोति भवती ?

—एवम् अस्तु। आगच्छामि।

—विमले !

—ऊँ।

—"अहो मन्त्रशक्तिस्तव हस्ते अस्ति नु ? येन स्पर्शमात्रेण···"इति तस्याः हस्तं गृह्णाति।

—किम् ? किमिच्छति भवान् ? ?

—मा भैषीः। जीवनं नाम न केवलं··········।

—अलं, अलं भवत उपदेशेन।

परं पुनः यावत् तस्याः हस्तं ग्रहितुमैच्छत् तदा सा खट्वां त्यक्त्वा पलायितुं प्रायतत । किन्तु जाल्मः सः बलादेव ताम्………।

"मा, मा तावत् मां स्पृशतु, अन्यथा…… ।"

"त्रायताम् ! त्रायताम् !! त्रायताम् !!!" इति प्राकाश्येन उच्चैः शब्दमकरोत् विमलादेवी ।

"मातः ! मातः !! किं, किं ते संजातम् ?" इति सहसा उपसृत्य सुरेशोऽवादीत् । तं दृष्ट्वा प्रकृतिस्था विमलादेवी अगोपयत् स्वमनोभावनाम्—

—ॐ। न, न, नास्ति किमपि। त्वया न किमपि भुक्तमिति भाति। पश्य किमपि अस्ति न वा इति।

सुरेशस्य उदासीनो मुखमण्डलः सूचयति स्म तस्य दिनस्यापि सर्वप्रयत्नस्य असाफल्यम् ।

× × ×   × × ×   × × ×

अभिमतसुषमा चिरनवोढा धरित्री कृष्णवासं परिवर्त्य शुक्लवाससा आत्मानम् आवृणोति । प्राचीबधूश्च ललाटे धारयति सौभाग्यवत्याः प्रतीकं लोहित-तिलकम् । चिराचरित-कर्मणि मग्नः कर्मवीरः भास्वान् । चिरं चरन् न तन्द्रायते सः। लोकोद्धारविशेषाकाङ्क्षया समाजसेवक इव लोकमङ्गलाय यतते । तदर्थं स नापेक्षते उत्कोचं कस्मात् । न वा कम् अपि वञ्चयितुम् ईहते। पूर्वदिनानुभूतां परिश्रान्तिं शयनविश्रामेण विस्मृत्य सर्वे नवोत्साहेन स्वकर्मणि लिप्ताः। सुरेशस्तु अद्यापि उदासः। शय्यां परित्यक्तुं नोत्सहते। नेत्रे निमील्य शय्याम् आश्लिष्य स्वापम् अभिनयति केवलम् । शरीरे अनुभवति वातायनप्रविष्टं बालमयूखम् । तेन वेलां कलयितुं प्रभवति सः। मनसि तस्य अगणिता चिन्ताधारा। एकां प्रबाध्य अन्या स्वाधिकारं द्रढयति तस्मिन्। परं न तस्मादेकाऽपि न्यायं लभते। किं तस्य माता रोगमुक्ता भविष्यति ?

वात्सल्यरसाम्बुवाहिनी, स्वर्गादपि गरीयसी जननी तस्य । जीवने कियत् कष्टमनुभूतवती । हस्तकर्मनिपुणा सा सर्वप्रथमं कर्गजपुटकं कृत्वा, आपणेषु विक्रीय, क्रमशः धनं संचित्य तेन सुन्दराणि पुष्पादीनि कारयित्वा, विक्रीय च आत्मनिर्भरा जाता। एवं

क्रमशः पूजाविवाहव्रतोपनयनादिषु कर्मसु तेषां तेषाम् उपकरणानां निर्माणे तस्याः दक्षता सर्वप्रथिता जाता। येन यथाकथंचित् पुत्रस्य अध्ययनम्, आत्मभरणं च चालितवती। सुरेशं समाजे प्रतिष्ठापयितुं किं किं न कृतं तया ?

विश्वविद्यालयस्य सर्वोच्चपदवीम् उन्नतश्रेण्याम् अधिगत्य सुरेशोऽद्यापि नियोगहीनः। अत्यधिकपरिश्रमात् विमलादेवी रोगग्रस्ता। तथापि न परितुष्टा अभीप्सा तस्याः। मातुः रोगमुक्तये तेन बहवः भिषजः परामृष्टाः। विना अस्त्रोपचारं उपायान्तरं नास्तीति ते ब्रुवन्ति। बहुधनम् अपेक्षते तदर्थम्। नियोगरहितः सः एतावद् धनं कुतो वा प्राप्नुयात् ? एका एव वृत्तिः गृहशिक्षणं। तदेव जीवनस्य अवलम्बनम्। तेन सम्यग् उदरपूरणम् अपि न सम्भवति। मातुः जीवनरक्षार्थं बहवः धनिकाः मुधा प्रार्थितास्तेन। सम्बादपत्रे विज्ञापनं दत्तम्। न कोऽपि सहानुभूतिं प्रदर्शितवान्।

अर्थस्य दासः समाजः। यस्यास्ति वित्तं स नरः कुलीनः। अपण्डितः पण्डितायते। महीयते च अमहान्। यस्य तु तन्नास्ति, स हेयो लोकचक्षुषि।

नियोगार्थं बहु निवेदितं तेन। कुतश्चित् साक्षात्कारार्थमाह्वानम् आयाति, कुतश्चिद् वा नायाति। परन्तु सर्वत्र असाफल्यमेव फलम्। नियोगं नाम शासनविभागीयानां पुत्र-पौत्र-बान्धवानां कृते संरक्षितं पैतृकवित्तम्। अथवा उत्कोचदातॄणां बलसिद्धोऽधिकारः। तस्य बद्धमूला भ्रान्तधारणा आसीत् यत् प्रथमश्रेणीरूपोत्कर्षोपाधिना नियोगं सुकराय कल्पते इति। किन्तु हन्त ! अद्य विश्वसिति सः—"भाग्यं फलति सर्वत्र न विद्या न च पौरुषम्" इति आभाणके। चिन्तावृश्चिकसन्ततिदंशनेन भाराक्रान्तं मस्तिष्कम्। सहसा मातुः क्षीणाह्वानम् आनयत् तस्य चिन्तायाः पूर्णच्छेदम्।

—"सुरेश ! सुरेश !! पत्रवाहः त्वामाकारयति।"

"आम् मातः ! आगच्छामि" इति अनिच्छन्निव बहिरागतवान् सः।

पत्रवाहः। निजकर्तव्यविशेषपूर्त्तये गृहाद् गृहं पद्भ्यामेव व्रजति। राजमन्दिरे तथा च उटजेष्वपि तस्य समाना गतिः। यतिरिव संगवर्जितः सः। सुखदुःखाकुलवृत्तसंचयानि पत्राणि प्रतिद्वारं वितरति। सुरेशं पत्रमेकं दत्वा स गृहान्तरम् अगच्छत्।

पत्रम् उन्मोच्यापश्यत् सुरेशः। साक्षात्कारस्यकृते आह्वानपत्रम्। एकस्मात् महाविद्यालयादागतम्। यद्यपि साक्षात्कारेषु विगतस्पृहः सुरेशः। तथापि सः जानाति यत् कर्मणामनारम्भात् कोऽपि सिद्धिम् नाश्नुते। गमनार्थं तत्सविधे यानभाटकम् अपि नासीत्। वह्वायासेन किञ्चित् धनं मित्रेभ्यो गृहीत्वा, मातुर्दायित्वं प्रतिवेशिनि समर्प्य, मातुराशीषं गृहीत्वा यात्रामारब्धवान्। अद्य किन्तु मातुराशिषि आसीत् कापि विजयस्य प्रेरणा। परन्तु सा तं त्यक्तुं नेच्छन्तीवासीदिति अन्वभवत् सुरेशः। नेत्रयोस्तस्याः कारुण्यस्य अश्रुविन्दुः। सुरेशोऽपि अद्य अननुभूतपूर्वमिव मातुराशिषं शिरसि धृत्वा निरगच्छत्।

× × ×　　　　× × ×　　　　× × ×

साक्षात्कारः। अन्येद्युरिव नासीद् अविचारो निर्णये। स्वप्रतिभाबलेन प्रथम आगतः सुरेशः। महाविद्यालय-कर्तृपक्षैः अध्यापकत्वेन सुरेशं नियोजयितुं स्थिरीकृतम्। अतीव प्रीतोऽभवत् सुरेशः। इष्टार्थे सति संप्राप्ते को नाम न हर्षं गच्छेत्? जीवनस्य स्वप्नः सार्थको भविष्यति, माता तस्य रोगमुक्ता भविष्यति। यात्राव्ययात्परम् अवशिष्टार्थेन औषधादिकं गृहीत्वा मातरं सुसम्वादं श्रावयितुं कयापि अज्ञानशक्त्या आकृष्ट इव कथं सः स्वगृहद्वारं प्राप्तवान् स्वयमप्यसौ न जानाति। परं हन्त! तदीयसाफल्यं श्रुत्वा आनन्दाश्रुकणान् विगलयितुं न कोऽपि आसीत् प्रतीक्षमाणस्तत्र। चिरनिद्रायां वर्तमानां मातरमाश्लिष्य उच्चैररोदीत् सुरेशः—

मातः! मातः!! मातः!!!

पितृप्राणः

जुम्बोक्रीडारंगे नूतनतया चागतः पितृप्राणः । सुदीर्घचत्वारिंशद्वर्ष-व्यापिनि जीवने स्वकीयनाम्नि सः सन्तुष्टो न जातः । क्रीडारंगमागत्य-सः स्वनामपरिवर्तनं कृतवान् । पितृप्राणः, मातृप्राणः संवृत्तः । अवश्यम् एतस्य नामपरिवर्तनस्य पृष्ठभूमौ रहस्यपूर्णः कश्चिद् वृत्तान्तो वर्तते ।

पितृप्राणस्तदानीं पञ्चविंशतिवर्षीय आसीत् यदा तस्य पिता इहलोकं विहाय परलोकं गतवान् । तस्मादेव दिनात् राजपथे बहुविधं खेलं प्रदर्श्य सः जीविकाम् उपार्जयति । स्वस्य, विधवायाः मातुश्च उदरपूरणार्थं तत्सविधे उपायान्तरं नासीत् ।

यद्यपि राजपथे खेलं प्रदर्शयन्नासीत् पितृप्राणस्तथापि तस्य क्रीडा-चातुर्ये किमपि विशिष्टाकर्षणं वरीवर्ति स्म । चित्ताकर्षकं खेलं प्रदर्श्य जनान् हासयितुं शक्नोति पितृप्राणः । अतः जनास्तस्य खेलस्य प्रशंसां मुक्तकण्ठं कुर्वन्ति स्म । दर्शकैः प्रदत्ता आर्थिक-सहायता तु हेया भवति । तया उदरद्वयस्य पूरणं यथा कथमपि भवति । परन्तु तेषां प्रशंसावाक्यानि तस्य खेलस्य गुणात्मकमानवृद्ध्यर्थम् उत्साहवर्द्धकानि भवन्ति ।

पथि विचरतो जनान् तस्य मनोमोहकं खेलं मन्त्रमुग्धामिव करोति । ते क्षणं विरम्य अवश्यं पितृप्राणस्य खेलं पश्यन्ति स्म । 'स्टेसन' निकटे विस्तृत-प्रान्ते जुम्बोक्रीडारंगस्य शिविरमेकमासं यावत् स्थापितमासीत् । अन्तिमे च दिवसे पितृप्राणस्य खेलोपरि जुम्बोक्रीडारंगस्य कुशलप्रबन्धकस्य दृष्टिः पतिता । खेलं दृष्ट्वा सः चकितोऽभवत् —अरे ! कस्यचित् महाकलाकार-स्यात्र दुरुपयोगः । क्रीडारंगेऽसौ नूनं प्रसिद्धिं प्राप्स्यति । अस्य च क्रीडाकर्ष-णात् जुम्बोक्रीडारंगोऽपि लोकप्रियो भविष्यतीति विचिन्त्य सः पितृप्राणं क्रीडारंगकार्यालयमाहूतवान् । प्रथमतः पितृप्राणः भयं प्राप्तवान् यत् कदा-चिदसौ सर्वकारीयाधिकारी स्यात् । राजपथि तस्य खेलप्रदर्शनं कदाचित् न्यायविरुद्धं स्यादित्यतस्तं दण्डयितुं गृहीतवान् । प्रबन्धकः पृष्टवान्—

—किं नाम तवास्ति ?

—पितृप्राणः, आर्य !

—पितृप्राणः ! अपि समीचीनं वदसि ?

—नहि, नहि मातृप्राणः ।

चकितः किञ्चिद् भीतश्च सञ्जातः पितृप्राणः । एते कथं जानन्ति यत् तस्य पिता इदानीं न जीवति । पितुः परलोके प्राप्ते सति तस्य पितृप्राण इति नाम सम्भवतः उचितं न प्रतिभाति । अत एव एते सन्देहं प्रकटितवन्तः ।

तस्यैतादृशं विचित्रं नाम श्रुत्वा सर्वे अट्टहासपूर्वकं हसितवन्तः । पितृप्राणश्च लज्जया जलमिव तरलः सञ्जातः । पितृप्राणस्यैतादृशीं स्थितिमवगत्य अगत्या प्रबन्धकमहोदयः 'मातृप्राणः' इति नाम लिखितवान् । अस्तु, नाम्नि किमस्ति ? महत्त्वं तु तस्य खेलस्य वर्तते । तस्य क्रीडानैपुण्यं तु परीक्षितमस्ति । पुनः प्रवेशपरीक्षाया आवश्यकतैव नासीत् । तस्य नियुक्तिस्तत्र विहासकत्वेन पञ्जीकृता । पितृप्राणो न जानाति कदा सः जुम्बो-क्रीडारंगस्यान्यतमः सदस्यो जातः ।

पितृप्राणस्य, उत मातृप्राणस्य उच्चता पञ्चाङ्गुलाधिकं द्विपादमात्रम् । साक्षाद् भगवतो वामनस्यावतारः । गौरवर्णः । चक्राकारं मुखं नेपालीजनानामाकृतिं स्मारयति । वामपार्श्वे गण्डदेशे स्थितं तिलचिह्नं मातृप्राणस्य सौन्दर्यं वर्द्धयति । अधरादधः दश, पञ्चदश वा श्मश्रूणि । शिरसि घनकृष्णकेशराशिः । तं दृष्ट्वा स भारतीयो वा नेपाली वा इति सहजतया वक्तुं न शक्यते ।

चित्रितं युतकम् । चित्रितञ्च लम्बदीपनम् । ग्रीवायां चित्रितः कश्चिद् गलाबन्धः । मुखे धवलप्रलेपः । नासा तु रक्तरञ्जिता । चक्षुषोश्चतुःपार्श्वे सुदीर्घः कज्जलप्रलेपः । चित्रिता टोपिका । तुलया भृतं नासारन्ध्रम् । इदृशो विचित्रवेशयुक्तो मातृप्राणः यदा मञ्चोपरि आयाति तदाबालवृद्धवनिताः सर्वे दर्शकाः अट्टहासैस्तस्य स्वागतं विदधति । मातृप्राणो यदा हर्षमुखसन्धिविग्रहनाम्नः कस्यचिद् दीर्घकायपुरुषस्य

गर्भाद् द्वितीयवारं जनिं लेभे तदा बालदर्शकाः अलिन्दकं विहाय मञ्चं प्रति धावितुं प्रारभत। तदनन्तरं मातृप्राणस्य कति जन्मानि व्यतीतानि तत् स स्वयमपि न जानाति। हर्षमुख–"पहल्वानस्य" श्लथीकृतयुतकाद् यदा सः भूमिष्ठो भवति तदा असहायः सद्योजातशिशुरिव हस्तपादौ प्रचाल्य "कुआँ-कुआँ" क्रन्दति। अनन्तरं केचन पुरुषास्तत्रागत्य नाभि-कर्तनादिकं सर्वं जातकर्म विधिवत् सम्पादयन्ति। कश्चित् तस्य नासिकां प्रोञ्छति, अन्यश्च परिहित-युतकेनैव तस्य व्यजनं करोति।

मातृप्राणः यदा मञ्चे विचरति तदा यदि कश्चित् पशुः, मनुष्यो वा तस्य सम्मुखे आयाति सः तस्योदरस्य नीचैरेव स्वमार्गम् अन्विष्य अपर-पार्श्वं गच्छति। तस्मिन् क्रीडारङ्गे यावत्यस्तरुण्यः सन्ति, सर्वास्तेन सह उपहासं कुर्वन्ति। स तु केवलं निर्ल्लज्ज इव हसति। तासाम् परोक्षे ताः प्रति अश्लीलेङ्गितान्यपि करोति।

दोलायामपि मातृप्राणश्चमत्कारं मनोरञ्जनं प्रदर्शयति। स्वकीय-देहाद् अधिकम् एकहस्तपरिमितं लम्बदीपनं परिधाय सः दोलायां यदा दोलायते, अपरपार्श्वाद् दोलासीना काचित् तरुणी अधोमुखतया दोला-यिता सती तस्य पादौ धरति। तदा तस्य दीपनमेव तस्याः हस्तयोर्लगति। केवलम् अन्तरीयमुरुकं परिधाय दोलायमानं मातृप्राणं दृष्ट्वा सर्वे हसन्ति। नार्यश्च सहजां लज्जां नाटयन्ति। क्रीडारङ्गस्य मञ्चोपरि एवं बहुविधं हास्याभिनयं प्रदर्श्य दर्शकान् हासयति सः। कृत्रिमहसं विहस्यासौ दर्शकानां मनः रञ्जयति, चित्तं च हर्षयति। दर्शकेषु तस्य महान् आदरः। तं प्रशंसयन्तः ते वदन्ति—"मातृप्राणः वामनोऽस्ति परन्तु स महान् जीवद् हृदयोऽस्ति। स एव जगतः प्रसन्नतमो मनुष्योऽस्ति। संसारस्य शोक-दुःखे न तं स्पृशतः"।

मञ्चाद् बहिरपि मातृप्राणस्य किञ्चिद् वास्तविकं जीवनमस्तीति न कोऽपि चिन्तयितुम् इच्छति। समाजे सः मनुष्यवज्जीवितुमिच्छतीति न कोऽपि अनुभवति। तस्य हृदयेऽपि स्वर्णिमः स्वप्नः स्यादिति चिन्त-यितुमपि कस्यावकाशो विद्यते? तेन च कदाचित् विवाहस्य स्वप्नः दृष्टः। स्ववंशरक्षार्थं कश्चिद् गुणवान् पुत्रः इष्टः। परं वामनाय तस्मै को वा स्वकन्यां दद्यात्? जनास्तु केवलं तं मनोरंजनवस्तुत्वेन स्वीकुर्वन्ति।

धान्यक्षेत्रे यदि किञ्चित् धान्यं निःसत्वं, तुषमात्रं च भवति तेन न कोऽपि दुःखितो भवति । केवलं कृषकस्य दुःखमेव तत्र परिगण्यते । मनुष्येष्वपि यदि कश्चिद् विलक्षणस्वरूपः अपाङ्गश्च भवति तर्हि तस्य कृते न कोऽपि-सम्वेदनां प्रकटयति । सर्वे किन्तु मनोरंजनार्थं तमुपहसन्तो दृश्यन्ते । रात्रावाबद्धप्रकोष्ठे मातृप्राणस्य प्राणाः कियत् क्रन्दन्ति इति द्रष्टुं कस्यास्ति अवसरः व्यस्ततमेऽस्मिन् समाजे ?

(दिल्ली-संस्कृत-अकादम्या "अखिल-भारतीय-मौलिक-संस्कृत-लघुकथा"—पुरस्कारेण पुरस्कृतेयं कथा सन्तोषकुमार-जेना-महोदयेन उत्कलभाषयानूदिता, प्रकाशिता च त्रिवेण्याख्यायां पत्रिकायाम् ।)

भ्रांत-तारका

शान्ता रजनी । निद्रानिलीनाः प्राणिनः । किन्तु सरिता ? चिन्ता-क्रान्तायास्तस्याः चक्षुषोः निद्रा नायाति । शयितुं भृशं चेष्टते सा । परन्तु असफलचेष्टातत्परा सा तिष्ठति केवलं शय्यामालिङ्ग्य ।

टन् ! टन् !! चक्षुष्युन्मील्य पश्यति सरिता । भित्तिस्था समयनि-रूपिका सूचयति वेलां-द्विवादनम् । दिननिरूपिकायां परिवर्तितं दिनाङ्कं दृष्ट्वा दीर्घं निःश्वसिति—फेब्रुआरीमासस्य पञ्चविंशतिदिनाङ्कः । एकवर्षात् प्रागासीद् एतदेव तद्दिनम्……… ।

भोः ! भोः !! भोः !!!

कुक्कुराणामार्तचीत्कारः । "अहो ! एतेऽपि कुक्कुराः वैरं साधयन्ति" ।

विरक्तमनसा शय्यां विहाय उपाविशत् सरिता । गवाक्षागतेन चन्द्रकिरणेन ईषदालोकितस्तस्याः प्रकोष्ठः । पश्यति सा तत्र मन्दालोकेन अस्पष्टानि भित्तिसंलग्नानि तैलचित्राणि । झटित्येव विव्रता अभवत् सा । अस्पष्टालोकेऽपि सुस्पष्टं शेखरस्य तैलचित्रम् । विचेतनमपि तदुपहसतीव तदीयामवस्थाम् । तेन मस्तिष्के सा अन्वभवत् सहस्र-वृश्चिकानां दंशनम्—"अहो ! सोऽयं विश्वासघातकः । नैतत् तैलचित्रम् अत्र स्थातुमर्हति" । उन्मत्तेव उपधानं गृहीत्वा तत् तैलचित्रमुद्दिश्य न्यक्षिपत् ।

झन्नण् ! ! ! शेखरस्य चित्रं शतखण्डमभवत् । परं हन्त ! पुरतः किं नु सा पश्यति ? साम्प्रतं प्रत्येकस्मिन् काचखण्डे शतशेखरास्तामुपह-सन्ति । सर्वे एव तां युगपद् आक्रमितुं कृतोद्यमा इव दृश्यन्ते—

—"दुःसहम्, दुःसहम्" ।

सा बहिरागच्छत् । पुष्पवाटिकायां विच्छुरिता वासन्ती ज्योत्स्ना ।

कुसुमाभरणभूषिता पादपवल्लीपङ्क्तिः। मन्दं मन्दं नुदन्नासीद् वासन्तः पवनः। परन्तु तस्याः चित्तं सर्वमेतद् भृशं विक्षोभयति स्म। आस्थानके उपविश्य मनस्यकल्पयत् सरिता—

"आसीद् एतदेव तद्दिनम्..............."। गतस्य वर्षात्मकस्य इतिहासस्य कतिपयजीर्णपृष्ठान्युन्मुक्तानि तस्याः समक्षम्।

× × ×   × × ×   × × ×

फेब्रुआरी-मासः। पञ्चविंशति-दिनाङ्कः। वेदव्यासमहाविद्यालयस्य वार्षिकोत्सवः। परिसरो हर्षमुखरः, कर्ममुखरश्च। कलामण्डपस्य एकपार्श्वादागच्छति सङ्गीतमूर्च्छना। प्रचलति मनोरञ्जनकार्यक्रमस्य पूर्वप्रस्तुतिः। ओडिशिनृत्यं प्रस्तोष्यति सरिता। द्वितीयवर्षीया कलाछात्रा सा। सुन्दरी, सुशीला, मेधाविनी च। स्वरसंयोजनां कल्पयिष्यति शेखरः। स तु अन्तिमवर्षीयः कलाछात्रः। शोभनः, बलिष्ठः, मेधावी च।

शुभारम्भः कार्यक्रमस्य। नीरवश्च दर्शकसमूहः। उद्घोषितं नाट्यसंपादकेन—"अत्र भवतां पुरस्तात् प्रस्तौति ओडिशिनृत्यं कुमारी सरिता। तत्र स्वरसंयोजनां विदधाति शेखरः।" उन्मुक्तं मञ्चावरणम्। प्रच्छदपटात् श्रुयते—"देहि पदपल्लवमुदारम्........."।

ललितकलितस्वरेण गायति ललितललामः शेखरः। सङ्गीततानेन मञ्चमलंकरोति नृत्यनिपुणा सरिता–अहो! अवश्यं तस्य सङ्गीतमूर्च्छनया अनुभूता काचिद् उन्मादना तया। नूनं सर्वे प्रशशंसुः तन्नृत्यनैपुण्यम्। अन्ते च काचिद् अनन्यसामान्या तृप्तिः परिलक्षिता तस्याः मुखमण्डले।

परस्मिन् दिने महाविद्यालयस्य प्रवेशद्वारे शेखरमपश्यत् सरिता। स्मितहासविनिमयात् परम् अवादीत् शेखरः—"सरिते! नृत्यच्छटा ते नितरां हृद्या, रमणीया च आसीत्"।

—किन्तु, तत्र ते गानं प्रचोदकमासीत्।

—अयि! किं तेन?

—किं न पुनः? भवतु, अपि आगमिष्यसि त्वं मार्चमासस्य पञ्चमदिनाङ्के

मम आवासम् ?

—अपि कश्चिद् विशेषः ?

—मम जन्मदिनं हि तत् ।

—अस्तु । नूनमागमिष्यामि ।

× × ×　　　　× × ×　　　　× × ×

मार्चमासस्य पञ्चमदिनाङ्कः । सरितायाः जन्मदिनम् । हर्षमुखरस्तस्या आवासः । सा स्वयमेव समागच्छतां बन्धूनां, सखीनां च स्वागतं विदधाति । हर्षोत्फुल्लेऽपि तस्याः चक्षुषी कस्यचिदागमनं प्रतीक्षेते इवास्ताम् । दूरादेव आगच्छन्तं शेखरं दृष्ट्वा—

—अयि कियन्तं कालं प्रतीक्षे । कथमयं विलम्बः ?

—क्षन्तव्योऽयं जनः ।

—भवतु, आगच्छ सर्वे त्वामेव प्रतीक्षन्ते ।

शेखरस्य परिचयं स्वपितृभ्यां, अन्येभ्यश्च न्यवेदयत् सरिता । सोऽपि तस्याः पितरौ अभिवाद्य उपाविशत् । वार्तालापेन, हास्यप्रमोदेन च कियान् कालः व्यतिक्रान्त इति न कैश्चिदपि ज्ञातम् । भोजनादि-आनुषङ्गिककर्मणां समाप्तिं यावत् रात्रिः द्वादशवादनमासीत् । सरितायाः मात्रा अनुरुद्धः शेखरस्तस्यां रात्रौ तत्रैव न्यवसत् । तस्यामेव रात्रौ तयोः सम्पर्कः किमपि विशेषरूपं गृहीतवान् । "यद्गत्वा न निवर्तन्ते" इत्येवाभवत् तयोः स्थितिः । यस्यां स्थितौ प्रेमियुगलस्य कृते केवलं विवाहमार्ग एव उन्मुक्तस्तिष्ठति ।

× × ×　　　　× × ×　　　　× × ×

जुलाई-मासः । परीक्षाफलं प्रकाशितम् । प्रथमश्रेण्यां प्रथमस्थानं लब्धं शेखरेण । सरितापि द्वितीयश्रेण्यामुत्तीर्णा । उच्चशिक्षार्थं शेखरः विश्वविद्यालयम् अगच्छत् । सरिता तु तत्रैव महाविद्यालये अध्यैत । ततः प्रभृति तयोः सम्पर्कस्य माध्यम आसीद् भारतीय-'डाकतार'-विभागस्य दायित्वविरहिता निःस्वार्थसेवा । एवं कालक्रमेण तयोः मधुरसम्पर्कः क्वचिद् व्याहतः, क्वचित् सम्वर्धितः, कथमपि च परिपुष्टो जीवन् आसीत् ।

कालस्य कुटिला गतिः । हठात् वसन्तरोगेण आक्रान्ताभवत् सरिता । तस्य पश्चात्प्रभावेण रूपलावण्यं तस्याः कालस्य करालगर्भे सुप्तमभवत् । मन्ये "मध्याह्ने शशिमण्डलं कवलितं क्रूरात्मना राहुणा" । क्व महाविद्यालयस्य राज्ञी, क्व चाधुना रूपहीना, श्रीहीना सरिता ? भिषजां परामर्शेणापि तस्याः मुखचिह्नानि न विलीयन्ते स्म । तया सर्वमेतत् सुस्पष्टं निवेदितं शेखराय । महती आशा आसीत् तस्याः । किमपि आश्वासनापूर्णं सहृदयोपेतं च पत्रं सा प्राप्नुयात् । किन्तु हन्त ! दीर्घप्रतीक्षाया अनन्तरं ह्य एव तस्य यत् पत्रमधिगतं तया.........। अहो ! दुर्विसह्यं क्रौर्यं प्रकटितं तेन । किमेतावत् परिवर्तनं मनुष्येष्वपि सम्भवति ?।

इतोऽप्यधिकं चिन्तयितुं नाशक्नोत् सा । अश्रुपूर्णाकुलेक्षणा सा सुस्पष्ट-चन्द्रालोकेऽपि न किञ्चिद् द्रष्टुं प्राभवत् । स्वाञ्चलेन अश्रूणि प्रमृज्य निःश्वसितेन सोष्मणा यदा सा उर्ध्वम् ऐक्षत तदा साऽन्वभवत्-यथाकाशेऽपि तारकास्तामुपहसन्तीवोज्वलतरास्तिष्ठन्ति । विव्रतं मनः सान्त्वयितुं सा पुनः शय्यामालिङ्ग्य विफलनिद्रामनाटयत् । विलम्बेन गच्छन्तीं रात्रिञ्चाशपत् केवलम् ।



रेलयात्रा तथा मे सहयात्री

"जम्मुतवी"–द्रुतगामियानस्य कश्चित् कक्षः (compartment)। संमर्दस्तु अपेक्षाकृतं न्यूनः। वातायन–समीपे एवोपविष्टवानासम्। मम गन्तव्यं तु झाँसीतः जम्मुनगरं यावदासीत्। कियत्क्षणानन्तरं काचिद् युवती तमेव कक्षमागत्य मत्सम्मुखमुपाविशत्। वातायनस्य बहिर्देशे विदायसम्वर्द्धनाय प्रतीक्षमाणौ दम्पती कदाचित् तस्याः युवत्याः पितरावास्ताम्। तौ तस्याः निरापद्यात्रार्थं व्यतिव्यस्ताविव प्रतीयेते स्म। विशेषतया युवत्याः माता। 'तन्न, तन्न' इति सर्वविषयं प्रबोधयन्ती आसीत्—यात्रायामावश्यकवस्तूनि कुत्र स्थापनीयानि, महार्घवस्तूनि च कुत्र स्थापनीयानीत्यपि निर्दिशन्ती आसीत्। चलति च याने वातायनाद् बहिः हस्तौ न निष्कासनीयौ। अपरिचितैः सहाधिकः वार्तालापो न करणीयः। खाद्यसामग्री च कुत्र स्थापिता इत्यपि पुनरीक्षणीयं येन मार्गे अन्वेषणायासो न स्यात्। एवं बहूनि च सतर्कवचनानि। यथा काचिद् बालिकैव एकाकिनी गच्छति।

ते सर्वे समीचीनां हिन्दीं भाषन्ते स्म। भाषमाणतथ्याद् भाषणशैल्याश्च ते कस्यचित् सम्भ्रान्तपरिवारस्य सज्जनाः सन्तीति ज्ञातुं मम कथमप्यसौविध्यं नाभूत्।

'शीश्'-शब्दं कुर्वन्ती गन्त्री झाँसी-रेलस्थानकं त्यक्तवती। प्रज्ञाचक्षुषो (अन्धस्य) मम तस्याः युवत्याः रूपविषयकं ज्ञानं नासीत्। परं मनसा मया तस्याः किञ्चित् काल्पनिकरूपमाकलितम् आसीत्। युवत्याः कण्ठस्वरो मां मन्त्रमुग्धमिवाकरोत्। यस्याः स्वर इदृशो मधुरोऽस्ति सा असुन्दरी भवितुं नार्हति। अज्ञानेनैवावचेतनमनसि न जाने कदाहं तस्याम् अप्रीणाम्। परन्तु सा परिचितेव मे प्रियतरा अभवत् कियता क्षणेन।

—"किं भवती जम्मूनगरं गच्छति ?" प्रथमतः मयैव नीरवता भग्ना।

—"अरे ! अत्रापरः कश्चिदुपविष्टोऽस्तीति नैतावद् जानामि।" साश्चर्यम् उक्तवती सा युवती। सम्भवतः ममोपस्थितिविषये सा सचेतना नासीत्। अथवाहमन्धकारे कस्मिंश्चित् कोणे उपविशामीति सा मां द्रष्टुं नाशक्नोत्।

तदानीं मम कापि धारणाभवद् यत् चक्षुष्मन्तोऽपि कदाचित् स्वकीयैर्लोचनैर्वञ्चिताः भवन्ति। परं तेषां तादृशी नेत्रवञ्चना तु स्वाभाविक्येव। इयती विशाला इयं पृथिवी। बहूनि तत्त्वानि, तथ्यानि वानुदिनमनुक्षणं च पश्यन्ति। बहूनि संस्मरणानि भवेयुस्तेषां बुद्धिपटले। अतोऽतिसन्निकटमपि वस्तुजातं द्रष्टुं न शक्नुवन्ति कदाचित्।

तावता युवत्या सह वार्तालापस्य मोहस्तीव्रतरोऽभ्यवर्द्धत मम मनसि। वार्तालापस्य धारा पुनः संयोजिता मया।

—"अहमपि भवतीम् इदानीमेव पश्यामि। प्रथमत भवत्या उपस्थितिविषये सचेतनो नासम्"।

सा युवती तु मौनमास्थाय उपाविशत्। अहमन्ध इति सम्भवतः न जानात्यसौ। तथ्यमिदं गोपायियुं शक्येत चेद् अतीव सुखकरं स्यात्। परन्तु एतावति निकटे स्थित्वा एतावत् तथ्यं गोपायितुं शक्येत वा ? तथापि प्रयत्ने का हानिः ?

—"अहमाग्रायामवतरिष्यामि। मम भ्रातृव्या तत्र मे प्रतीक्षायां भवेत्। भवान् क्व गमिष्यति" ? इदंप्रथमतया जिज्ञासितवती सा युवती मद्विषये।

—"प्रथमतः जम्मूं, ततश्च कश्मीरं गमिष्यामि"। अतिसहजमासीत् मम उत्तरम्।

—"अपि सत्यं वदति भवान् ? कियान् भाग्यवानस्ति भवान् ! ममापि कश्मीरगमनेऽस्ति महती स्पृहा बहुकालात्। तत्रत्यास्तुषाराच्छन्नाः पर्वताः, पार्वतीयवृक्षलताः, प्राकृतिकं सौन्दर्य. सर्वं रमणीयं मे प्रतिभाति। विशिष्य अक्टोबरमासे तत्रवासोऽतीव सुखकरः स्यात्"।

—"आम्। सत्यम् उक्तं भवत्या। अक्टोबरमासो हि समुचित-समयः कश्मीरपर्यटनस्य। क्षुद्राः, विशालाश्च पर्वताः तुषारावृतत्वात् धवलमयाः दृश्यन्ते। अपरं च, तत्रत्यः प्रातःकालीन-सूर्योदयोऽतीव उपभोग्यो भवति। तुषारधवलपर्वतानां पृष्ठभागे यदा सूर्यः उदेति तदानीं पर्यटकानां हर्षः सीमानमतिक्रामति। ते स्वच्छायाचित्रयन्त्रे तद्रमणीयं दृश्यं चिरस्थायि कुर्वन्ति। रात्रौ मृदुशीतं दूरीकर्तुं काष्ठाग्निसमीपे उपविश्य सामान्यमदिरापानं क्रियेत चेत् शरीरं नूतनोत्साहेन स्वतः-स्फूर्तं भवति। तदर्थमेव बहवः पर्यटका अत्रास्मिन्नेव मासे अवकाशं यापयितुमागच्छन्ति। अन्यच्च, अत्रत्याः मार्गाः किञ्चित् प्रशस्ताः, परिष्कृताः, जनशून्याश्च भवन्ति"। पूर्वस्मृतिं रोमन्थयन् अहम् एकस्मिन्नेव निःश्वासे सर्वाश्च पूर्वानुभूतीर्वर्णितवान्।

सा युवती किन्तु नीरवतया सर्वमशृणोत्। अहं पुनः किञ्चित् शंकितोऽभवम्। सा मां कञ्चिद्व्यर्थप्रेमिकं नानुमनुते किल? यद् वा भवतु. तया सह मम वार्तालापमोहस्तु पूर्ववदक्षुण्ण आसीत्। अतोऽहं पुनः जिज्ञासितवान्।

—"साम्प्रतं बहिःप्रदेशे का शोभा राजते"? प्रसङ्गं परिवर्तयितुं मया जिज्ञासा कृता। परस्मिन् मुहूर्ते युवत्याः सम्मुखे मम दुर्बलता व्यक्ताभवदिति भीत्या स्वजिह्वां दन्तैरदंशम्।

—"वातायनेन बहिः पश्यन्तु"। एतदेवासीद् युवत्याः स्वाभाविकं, सहजञ्चोत्तरम्। अहमपि ईश्वराय कार्तज्ञ्यं निवेदयन् आश्वस्तोऽभवम् यत् सा युवती मामद्यापि अन्ध इति न ज्ञातुं प्रभवति। न कापि अस्वाभाविकी परिस्थितिरुत्पन्ना इति च ज्ञात्वा मनसि प्रभूतं सुख-मनुभूतवान्। ततः किञ्चद् आश्वस्तः सन् हस्ताभ्यां वातायनमस्पृशम्। अनुभूतञ्च वातायनमुन्मुक्तमिति। वातायनमभिलक्ष्य बहिर्देशमपश्यम्, यथा प्रकृत्याः साङ्गोपाङ्गं विश्लेषणमध्ययनं च करोमि। अहं-स्वमनश्चक्षुषा चापश्यम् यद् वृक्षाः, विद्युत्-प्रकाश-स्तम्भाश्च अतिवेगेनापरमपरमतिक्रम्याग्रे धावन्तः निमेषेण अदृश्याः भवन्ति।

—"पश्यतु, पश्यतु, एते वृक्षाः कियता वेगेन धावन्त इव प्रतीयन्ते यद्यप्येते वस्तुतः स्थिराः, निश्चलाश्च सन्ति"। अहं साग्रहं प्रकाशितवान्।

—"किं तत्र नावीन्यम् ? एवं तु सर्वदा भवति । रेलयात्राकाले एषा तु शाश्वतानुभूतिः" । सा मनागपि चकिता नाभवत् मम भावावेगपूर्ण-मन्तव्येन । अहमात्मदृष्टिं वातायनात् प्रतिनिवर्त्तयन् तां युवत्याः मुख-मण्डले स्थिरामकुर्वम् । कियत्कालं यावद् आवामुभे नीरवे आस्व ।

—"भवत्याः मुखमतिसुन्दरमस्ति" । पुनरपि नीरवता मयैव भग्ना । एषा टिप्पणी तु अपेक्षाकृता साहसिकी आसीत् । यद्यपि प्रायशः युवत्यः स्वीयसौन्दर्यप्रशंसया प्रेमाभिभूताः, प्रसन्नाश्च भवन्ति, तथापि काश्चन स्वकीयनिर्मलभावं व्यक्तीकर्तुं कण्ठदेशादुपरिभागे छलनया क्रोधिता अपि भवन्ति । अतः, एतं मन्तव्यं दत्वाऽहं किञ्चित् शंकाकुलो-ऽप्यभवम् । परन्तु क्षणादूर्ध्वम् पुनराश्वस्तोऽभवं यदहम् ईदानीमपि आपद्रहितोऽस्मि । न काचित् तिक्तप्रतिक्रिया युवत्याः । ममाश्चर्यं प्रसन्न-ताञ्च द्विगुणीकर्तुं सा युवती अहसत् किमपि मनोमोहकं तरङ्गम-यहसम् ।

—"धन्यवादाः । सुष्ठु भणितं भवता । परन्तु एतादृशानि गौरव-मयानि प्रशंसावचांसि बहुभ्यः नैकवारं श्रुत्वा न पूर्ववद् उत्तेजिता, उत्साहिता वा भवामि" । युवत्याः एतादृशेन निराशेन, नीरसेन चोत्तरे-णाप्यहं प्रसन्नोऽभवम् । यतो हि अनुमानतया प्रस्तावितं मम प्रशस्तिवचनं अन्यथा न जातम् । युवती तु वस्तुतः सुन्दर्यस्ति । तेनोत्साहितः सन् पुनर्मन्तव्यं प्रस्तोतुं मयापरा टिप्पणी कृता—

—"सत्यम् । सुन्दरमुखं सर्वदाऽन्येषां दृष्टिमाकर्षयति" ।

—"मन्ये भवान् न केवलं रसिकः अपि तु साहसी च । परन्तु विषयेऽस्मिन् भवताम् एतावद् गुरुत्वं किमर्थम्" ? जिज्ञासुमुद्रयापृच्छत् सा युवती, यस्याः नामापि अहं न जानामि । एतादृशे संक्षिप्तपरिचये किं वा महत्त्वं भवेत् नाम्नः ?

—"स्वल्पेनैव कालेन भवत्याः अभीष्टं स्थानकमागमिष्यति" । तस्याः प्रश्नमुपेक्षितुं मयावश्यकी सूचना प्रदत्ता ।

—"महती कृपा ईश्वरस्य । अल्पमार्गात्मकं मम गन्तव्यमस्ति । अहं तु रेलद्वारा घण्टाद्वयाद्, घण्टात्रयाद् वाऽधिकं गन्तुं न शक्नोमि ।"

मन्ये सा मम सूचनया अतिप्रसन्ना संजाता यत् तस्याः गन्तव्यस्थानकम-विलम्बेनैव आगमिष्यतीति।

यात्रायाः परिसमाप्तौ सा युवती यावती प्रसन्ना आसीद् अहं तावानेव दुःखित आसम् । तस्याः साहचर्यं मत्कृतेऽतीव सुखकरमासीत् । उन्मुक्त-वातायनेनागतेऽपि शीतलपवनेऽहं तस्याः निःश्वासप्रश्वासयोरुष्मता-मनुभवन्नासम् । तया सह सुदीर्घां यात्रां कर्तुं आसीन्मम सूक्ष्माभिलाषः । क्षणं यावत् मनस्यकल्पयं यन्ममापि गन्तव्यं कश्मीरपरिवर्त्ते आग्रैवा-भविष्यच्चेद् अतिसमीचिनमभविष्यत् । तस्याः निर्व्याजबालस्वभावो माम् एवम् अभिभूतवान् येनाहमुन्मत्त इवाभवम् । मयानुभूतं यथाऽहं पूर्णविश्वं विस्मृतवान् तस्याः साहचर्यं प्राप्य । तस्याः काकलिमधुरस्वरः मादृशात् शुष्कपर्वतादपि झरणायाः सञ्चारं कृतवान्।

अग्रिमे स्थानके साऽवतरिष्यति । ममेतं संक्षिप्तपरिचयं सम्भवतः सा विस्मरिष्यति कदाचित् । परन्तु एतावती मधुरस्मृतिः मेवऽशिष्ट-यात्रायाः पाथेयो भविष्यति । सम्भवतोऽन्तिमेऽपि स्थानकेऽहं तस्याः स्मितहासमिश्रितं द्वित्रं वाक्यं श्रोष्यामि, स्मरिष्यामि च ।

स्थानकं यावत् समीपायितं तावत् 'शीश्'-शब्दं कृत्वा गन्त्री क्रमशः मन्दगतिरभवत् । यानस्य गतिपरिवर्तने शब्दछन्दस्यपि परिवर्तनं स्पष्टमनुभूतं मया । सा युवत्यपि यानस्य मन्दगत्या सचेतनाऽभवत् । स्वसामग्रीमेकत्रीकर्तुं च प्रारभत । अस्मिन् अन्तिमे मुहुर्ते तस्याः लावण्यं रूपवैभवं निरीक्षितुं मम प्रबल आग्रहो जागरितः मनसि । बाल्यकालादेव स्त्रीणां केशगुच्छं प्रति मम काचिद् दुर्बलता वर्तते । अतस्तस्याः केशपाशं द्रष्टुम् अहं व्याकुलोऽभवम् । किदृशी भवेत् तस्याः केशराशिः ? मन्ये सुदीर्घा वेणी स्यात् । अथवा घनकृष्णदीर्घकेशराशिनिर्मितां वेणीमेकत्रीकृत्य तया वर्त्तुलं गुच्छमेकं निर्मितं स्यात् पश्चाद्भागे । तस्याः लम्बाकृतिके मुखे तादृशः केशपाशस्य शोभा अतीव रमणीया स्यात् । मम कल्पनायां सा युवती तन्वी, श्यामली, लम्बनासा, दीर्घकेशी चासीत् । सम्भवतस्ता-दृश्यां युवत्यां मम विशेषदुर्बलता स्यात् ।

गन्त्री स्थानके सुखासीना । बहिःप्रदेशे चलद्विक्रेतृणां, रेलवे-भारवाहकानां च ध्वनिः श्रूयते । तं ध्वनिमतिक्रम्य मया कस्याश्चित्

स्त्रिय आह्वानं समीपादेव श्रुतम् । सा कदाचित् युवत्याः भ्रातृव्या एव स्यात्, यस्याश्चर्चा तया युवत्या मत्सम्मुखे कृतासीत् ।

—"सुविदायम्" । युवत्याः कण्ठस्वर आर्द्रः । तस्मिंश्च स्वरे आसीद् उद्वेगः, आशा, नैराश्यं, मिलनजनिता तृप्तिः, समागतविरहस्य घोरहाहाकारोऽपि ।

प्रत्यभिवादने किञ्चिदपि वक्तुमहं समर्थो नासम् । मम प्रत्यङ्गस्य लोमकूपाः अतिसन्निकटे दण्डायमानायास्तस्याः सान्निध्यमाकण्ठं पिवन्त आसन् । तस्याः केशराशितः आगच्छतः सुवासितामोदस्य मृदुगन्धं जिघ्रन्नहमात्मविह्वलः, उत्तेजितश्चाभवम् । मम हृत्स्पन्दनं किञ्चिद् विवर्द्धितम् । मनसि चिन्तितं यत् तस्याः मसृणां केशराशिं स्वाङ्गुलिभिः स्पृशेयम् । परन्तु तथा कर्तुं नाशक्नुवम् । तावत् सा युवती गन्त्रीकक्षा-दवतीर्य प्रागेव गतवती आसीत् । केवल तया परित्यक्तः सुगन्धो मत्परितः भ्रमन्नासीत् । तस्यैव साहचर्येऽह तस्याः स्मृतौ विस्मृतोऽभवम् ।

यानस्य द्वारदेशे महान् संमर्द आसीत् । मन्ये कस्यचिद् भद्र-पुरुषस्य केन सहानिच्छयापि कायसंस्पर्शोऽजायत । तदर्थं सः क्षमां याचितवान् । यानस्य 'शीश्'-शब्दो मया श्रुतः । सम्भवतस्तस्यैषा स्थान-कत्यागाय प्रस्तुतिः । अहं वातायनमार्गेण दक्षिणहस्तं बहिर्निष्कास्य तस्यै विदायाभिवादनं ज्ञापितवान् । सा तु किं कृतवतीत्यहं न जानामि ।

यानस्य गतिः क्रमशः वर्द्धिता । नानाविधगीतं गायंति तस्य चक्राणि अग्रे वर्द्धितानि । तस्मिन्नेव ताले उपविष्टाः यात्रिणोऽपि दोला-यमाना अभवन् । अहं वातायनेन बहिरपश्यम् । सत्स्वपि अन्धकारेषु सुशीतलं वातावरणम् अत्यन्तमुपभोग्यमासीत् ।

—"दुःखितोऽस्मि यद् अहं भवतां पूर्वसहयात्रीव शोभनश्चित्ता-कर्षकश्च नास्मि" । मत्सम्मुखे उपविष्टो नूतनो यात्री मौनभङ्गपूर्वक-मवादीत् । इत्यवसरे कश्चिदागत्य मत्सम्मुखे उपविशतीति न ज्ञात-वानहम् ।

—"सा युवती तु मत्कृते काचिद् रहस्यमयी आसीत् । अस्तु, किं भवान् वक्तुं शक्नोति यत् तस्याः शिरसि केशराशिः वेणीयुक्ता आसीदुत वर्तुलगुच्छरूपा" ? मनसः कौतूहलं गोपायितुमसमर्थोऽहं पृष्टवान् ।

—"न सम्यक् स्मरामि । अहं तु केवलं तस्याः चक्षुषी अपश्यम् । ते तु अतीव हृद्ये आस्ताम् । परन्तु परितापस्य विषयोऽयमेवास्ति यत् ते चक्षुषी तस्याः न कथमप्युपकारके आस्ताम् । सा तु काचिद् अन्धयुवती आसीत् । कदाचिद् भवताप्येतद् दृष्टं स्यात्" ।

अहं तु केवलं हतवाक् सन् तस्य मुखमण्डलं द्रष्टुं प्रयत्नं कृतवान् । किमसावपि मम द्वितीयः सहयात्री अन्धोऽस्ति, यथाऽहमस्मि, यथा चासीत् मे पूर्वसहयात्रिणी सा रहस्यमयी युवती ? अथवा उन्मुक्ताभ्यां मदन्धचक्षुर्भ्यामसावपि भ्रामितो वराकः यथाऽन्येऽपि चक्षुष्मन्तः ।



हसुरा–बाबा

ग्रामाद् बहिः हरिजनवसतेः समीपे "हसुरा-बाबा" इति नाम्ना प्रसिद्धस्य बाबामणेः मठः। वंशमृत्तिकादिभिः निर्मितस्य मठगृहस्योपरि शुष्कतृणावृता छदिः । मृत्तिकानिर्मितेऽप्यस्मिन् गृहे धूमनिष्कासनार्थं काचित् धूमनाली (चीम्नो) निर्मिता वर्तते येन मठस्य भित्तयः कृष्णाभाः न स्युः । मठोपरि सा धूमनाली त्वेवं निर्मिताऽस्ति येनाकृत्या स मठः स्वत एव कस्यचिन्मन्दिरस्य, देवपीठस्य वा शोभां विभर्ति। तदुपरि कस्मात् कालाद् एका रक्तवर्णा पताका उड्डयते इति तद्विषये केवलं बाबामणिरेव जानीयात् । सम्भवतः केनचिद् यजमानेन स्वमनोरथपूरणानन्तरं पताका-दानं कृतं स्यात् । अथवा बाबा स्वयमेव स्वभिक्षातः किञ्चित्, किञ्चित् सञ्चयं कुर्वन् पताकायाः निर्माणं कृतं स्यात् । ध्वजस्यास्य रक्तिमो वर्णः साम्प्रतमीषद् धवलायितः। सूर्यरश्मिभिस्तस्य वास्तविको वर्णः इदृग्वि-वर्णः, विकृतो वाऽस्ति, येन तस्य मूलवर्णविषये किमपि स्पष्टमतं दातुं न शक्यतेऽपरिचितैर्नवागतैश्च । परन्तु सामान्यतया मन्दिरेषु, देवालयेषु च रक्तवर्णो ध्वजः व्यवह्रियते इत्यतः तस्य रक्तिमवर्णविषये न कस्यापि मतविरोधोऽद्यावधि परिलक्ष्यते ।

वस्तुतः "हसुरा-बाबा" इति संज्ञा स्वतः हास्योद्दीपिका वर्तते । एतन्नाम तु बाबामणेः पितृप्रदत्तं नाम नास्ति । तस्य वास्तविकं नाम किमासीद् इति ज्ञातुं न कोऽपि अयतत, यतते, यतिष्यते वा । यतो हि हसुरा-बाबा इति नामतः बाबामणेरभिज्ञाने न कस्यापि किमप्यसौ-विध्यं भवति । अपरं च, हसुरा-बाबा इति नामकरणं निरर्थकं नास्ति, अपि तु अत्यन्तं सार्थकं वर्तते। स्थानकालपात्रनिर्विशेषेण उत्तमानुत्तमे, सुखदुःखेः, लाभालाभौ, प्रियाप्रिये चाविगणय्य, सर्वविधशाश्वतिक-द्वन्द्वांश्चोपेक्ष्य स सततं हसतीति तस्य परिचिताः सर्वे प्रमाणयन्ति । अस्मिन्नेव तथ्ये "हसुरा-बाबा" इति रोचकनाम्नः सार्थकता बरिवर्ति । अथवा बाबामणेः रहस्यमयं चरित्रं सर्वेषां मनसि हास्यमुत्पादयतीति

तस्य 'हसुरा-बाबा' इति नामापि युक्तिसिद्धं प्रतीयते। बाबामणिरिति नामकरणमपि अन्वर्थकमस्ति । भगवतः शिवस्य "आखण्डलमणिः" (संक्षेपेण मणिः) इत्यवतारः उत्कले प्रसिद्धः। बाबामणिरिति नाम्ना प्रसिद्धः स ईश्वरः गाञ्जा-(मादकबीजविशेषस्य)—प्रियोऽस्ति। हसुरा-बाबाऽपि गाञ्जाप्रियत्वाद् बाबामणिरिति नाम्ना प्रसिद्ध्यति।

प्रतिदिनं सायंकाले बाबामणेराश्रमे अवर्णनीयः जनसंमर्द लगति। बाबामणेः भक्तसदस्यतास्वीकारे वयसः, जातेः, धर्मस्य वा प्रतिबन्धो नास्ति। प्रत्येकवर्गस्य जनास्तत्रैकत्रिताः भवन्ति प्रातःकालादारभ्य मध्यरात्रि यावत्। भक्तानां भगवत्प्रसादप्राप्तौ न तथाग्रहो यथा बाबामणेः गाञ्जाप्रसादसेवने। वस्तुतस्तस्य गाञ्जाभोगस्यातीव महत्त्वं तस्मिन् मठपरिसरे। समस्तभिक्षायास्त्रिचतुर्थांशो बाबामणेः, तद्भक्तानां च गाञ्जापाने एव व्ययो भवति। दिनमेकं भोजनं न मिलति चेत् हसुराबाबा विव्रतो न भवति। परन्तु गाञ्जां विनासौ होरामेकामपि स्थातुं न शक्नोति। स त्वरितमेवास्वस्थो भवति। तस्यामवस्थायां स द्वित्रिवारं 'गाञ्जा-'पानं करिष्यति चेत् तस्यास्वास्थ्यं स्वतो दूरीभविष्यति। 'गाञ्जा-' पाने ये तदनुचराः सन्ति ते सगर्वं वर्णयन्ति यद् बाबा गाञ्जापानान्निर्गतं धूमं बहिरेवागन्तुं न ददाति। नीलकण्ठ इव सर्वमात्मसात्करोति। तत्-प्रभावेणैव बाबामणेः प्रज्ञाचक्षुः विस्फारितं भवति। भावाश्रुभिश्चक्षुषी आर्द्रे भवतस्तस्य। तदनन्तरमेव बाबाबुद्धौ भगवद्ज्ञानमुदेति।

गाञ्जापानात् परमेव बाबा पूर्णतया कस्यचित् सफलसन्न्यासिनो रूपं धारयति। सांसारिकमायामोहात् संपूर्णमुक्तः। विषयजञ्जालरूपी विषस्तं न कवलयति तदानीम्। पद्मपत्रमिवाम्भसा स सर्वत्र स्थित्वापि निर्लिप्नः। कदाचित् जगन्नाथदासस्य "ओडिआभागवतं" सस्वरं श्रावयति। पुनश्च कदाचित् श्रीमद्भगवद्गीतायाः ओडिआपद्यानुवादं खण्डशः क्वचित् स्वशब्दावलीं संयोज्य उदात्तस्वरेण गायति। उपरिमुखाः सन्तः भक्तास्तु तत् सर्वम् आकण्ठं पिबन्ति। परन्तु ते गीताभागवते श्रुत्वा न तथा सन्तुष्टाः भवन्ति यथा बाबामणेर्जीवनदर्शनश्रवणात्। बाबामणेः रोमहर्षकारि, सरसं, श्रुतिमधुरं च जीवनेतिहासं रसिकाः भक्ताः सर्पा इव चक्षुर्भ्यामेव श्रोतुं बद्धपरिकराः दृश्यन्ते। बाबाऽपि तेषामाशानुरूपं स्वजीवनचरितस्य सरलवर्णनं कृत्वा तेषां मनोबलमुत्साहञ्च वर्द्धयति।

श्रोतॄणां मनांस्यधीत्य कदाचित् पौराणिकं, कदाचित् शास्त्रीयं, कदाचिद् ग्राम्यञ्च प्रवचनं दत्वा सर्वेषां मनांसि रञ्जयति। बाबामणेः ग्राम्य-प्रवचनमेतावत् श्रुतिमधुरं भवति येन तथाकथितास्तस्य युवकभक्ताः सकलान्यत्यावश्यकानि गृहकार्याणि त्यक्त्वा प्रवचनं श्रोतुं हसुराबाबाश्रमे एकत्रिताः भवन्ति। तेन च प्रवचनेन तेषां युवसुलभमनांसि तुष्टानि भवन्ति।

एकदा बाबामणेर्मठपरिसरे नूतनपुरातनभक्तानाम्, अधममध्यम-परमभक्तानां चैको महान् संमर्द एकत्रित आसीत्। प्रवचनप्रसङ्गे किञ्चिद् विशिष्टं हृदयस्पर्शि सरसोपाख्यानं प्रस्तोतव्यमासीत्। हसुरा-बाबा स्वकीयनवयौवनस्य दिग्दर्शनस्वरूपं कमपि रोचकप्रसंगं प्रस्तोतु-काम आसीत्। इतः प्रागपि नैकवारं बाबा एतमेव सरसवृत्तान्तं श्रावितवान्। परन्तु भक्तास्तथापि नवोत्साहेन मत्ताः, उत्तेजिताश्च आसन्। सत्यमेवोक्तं केनचिद् वैदेशिककविना यत्—सुन्दरवस्त्वास्वादे तृप्तेरवसानमेव नास्ति। अतः प्रसङ्गस्यास्य पुनरावृत्तावपि भक्तानामुत्साहे न कापि न्यूनता आसीत्। ते कथमपि विरक्ताः नासन्।

× × × × × × × × ×

तदानीं बाबा स्वसन्न्यासजीवनस्य प्रथमसोपानमपि नातिक्रमित-वान्। कृष्णकायोऽपि बाबा यौवनावस्थायां सुन्दरस्य चित्ताकर्षकरूपस्या-धिकारी आसीदिति तस्याङ्गसौष्ठवादनुमातुं शक्यते। लम्बायमाना, सुदीर्घा चासीत्तस्य शरीरयष्टिः। कमनीया मुखकान्तिः। पारायणसमये बाबा स्वयमपि स्वीयरूपराजिं वर्णयितुं न विस्मरति, न वा संकोचमनु-भवति। स तु सन्न्यासी। एवं खलूच्यते—व्यवहारे त्यक्तलज्जाः त्यक्तसंकोचाश्च भवन्ति सन्न्यासिनः।

तदानीम् बाबामणेः स्वकीयावासो, मठो वा नासीत्। बाबा परि-व्राजक इव ग्रामाद् ग्रामान्तरं भ्रमन्नासीत् भिक्षासंग्रहाय। जाते तु सायंकाले यस्मिन् कस्मिन्नपि ग्रामे, यस्य कस्यापि धर्मात्मनो देवता-गृहेऽथवा भागवतगृहे वसतिं कल्पयित्वा रात्रिं यापयति स्म। एकदा बाबा प्रीतिपुरग्रामे कस्यचिद् धनिकस्य गृहे रात्रिं यापयन्नासीत्। धनिकः व्रजसुन्दरः धर्मपरायणः, देवभक्तः, साधुसन्तप्रियश्चासीत्। तस्यैवानु-रोधेन बाबा तस्य भागवतगृहे एकमासं यावदवस्थातुं स्वीकृतवान्। व्रजसुन्दरस्य एक एव पुत्रः, यो विवाहस्य दशवर्षानन्तरमप्यपुत्रक

आसीत्। एतदर्थं समग्रपरिवारो दुःखित आसीत्। अतः धर्मकार्येषु तेषां विशेषानुरक्तिरासीत्। उत्साहवशात्तावपि दम्पती बाबामणेरादरं, सत्कारं च कुर्वन्तौ आस्ताम्।

प्रीतिपुरग्रामे वसतिकालस्य घटनामेतां स्मृत्वा बाबामणेः प्रत्यङ्ग-मद्यापि रोमाञ्चितं भवति—एकदा बाबा भिक्षाटनात्परं ग्रामान्तरात्प्रति-निवृत्य रात्रिविश्रामं कुर्वन्नासीत्। अर्द्धनिद्रावस्थायां सोऽन्वभवत् यद् द्वारस्य कपाटमुद्घाट्य कश्चित् काचिद् वा तत्प्रकोष्ठं प्राविशत्। समग्रं प्रकोष्ठमभिव्याप्य तमस एकछत्रराज्यम्। बाबा तु केवलं छायामात्रं द्रष्टुं समर्थ आसीत्। सम्भवतः कश्चित् तत्र कार्यानुरोधेनागतः स्यात्। जागरितोऽपि बाबा पिहितनेत्रस्तूष्णीमास्थाय, शय्यामाश्रित्य स्वपन्नासीत्। शनैः शनैः सा छायामूर्त्तिस्तमेवाभिलक्ष्य आगच्छतीति अन्वभवद् बाबा। स किन्तु न भीतोऽभवत्। संन्यासी सन्नपि यदि स भूतप्रेतपिशाचेभ्यः भेष्यति तर्हि को लाभस्तस्य सन्न्यासजीवने? शनैः शनैः सा छाया निकट-तराऽभवत्। बाबा तावद् ज्ञातुं प्राभवत् यदागन्तुका काचित् नारी। जिज्ञासुः बाबा किञ्चित् प्रष्टुकाम आसीत्। परन्तु तस्य प्रश्नात् प्रागेव सा छायामूर्तिस्तस्य पादौ स्पृशन्ती निःशब्दमुपाविशत् तस्य समीपे। सत्यपि सामान्यव्यवधाने स्वशरीरे छायामूर्तेरुष्मतां स्पष्टमन्वभवद् बाबा। सः प्रतिवादेन किमपि वक्तुमप्यैच्छत्, परन्तु तस्य युवसुलभोत्तेजना तं तस्मात् प्रतिन्यवर्तयत्। बाबा मौनमाश्रित्य अतिष्ठत्। ततः केनचिदात्मीयेन सुकोमलस्पर्शेन स्वशरीरे अपूर्वकम्पनमन्वभवद् बाबा। तस्य शिराप्रशि-रासु प्रवहन्त्यः रक्तधारा उष्मातिशय्यमप्राप्नोत्। शनैः शनैः सोत्तेजना सीमानमत्यक्रामत्। बाबामणेः बुद्धौ संरक्षिते स्मरणपरिसरे अयमेवासीत् तमुद्दिश्य नार्याः प्रथमस्पर्शः। बाल्यकाले यः मातृस्पर्शस्तेन लब्धः स्यात्तमपि स न स्मरति। बाल्यावस्थायामेव मातृवियोगश्च तद्दौ-र्भाग्यम् उपहसितवान्। बाबा तदानीमपि न क्रन्दितुं जानाति स्म। सम्भवतस्तदानीं सः क्रन्दनस्यार्थमेव न जानीयात्। अतः बाबामणेः हसुरा-स्वभावः बाल्यकालादेवाक्षुण्णो वरीवर्ति। क्रन्दनं तेन न शिक्षितम्। विषादश्च तस्यापरिचितः। लोभमोहौ तस्य कृतेऽस्पृश्यौ।

तावत् छायामूर्तिः तस्य पादयोः कटिपर्यन्तं मृदु निपीडयन्ती आसीत्। बाबामणेः उत्तेजना सीमानम् अस्पृशत्। यतमानोऽपि सः निश्चलः,

निस्पन्दश्च स्थातुं नाशक्नोत्। क्षणेनैव व्यर्था भविष्यति तस्य सकला तपश्चर्या। खण्डितं च भविष्यति तस्याखण्डं ब्रह्मचर्यम्। परमतृप्तिश्चायास्यति यौवनमदजनितकामनायाम्। अन्धकाराच्छन्नायामपि तस्यां रात्रौ व्रजसुन्दरस्य पुत्रवध्वा अभिज्ञाने न कापि त्रुटिः कृता तेन ब्रह्मचारिणा बाबामणिना। व्रजसुन्दरस्य पुत्रवधूः निर्मला। सुन्दरी, सुशीला च। परन्तु स्वविवाहस्य दशवर्षानन्तरमपि सा निःसन्ताना। वंशरक्षार्थं श्वशुरो व्रजसुन्दरः सर्वदा चिन्ताग्रस्तः। बहुविधमहार्घचिकित्सानन्तरमपि असफलः स तदर्थमसंख्यदेवान्, देवीश्च समर्चितवान्। तेनापि विफलः सः पुत्रस्य द्वितीयविवाहार्थं प्रस्तावमुपस्थाप्य तं प्रेरितवान्। परन्तु तत्पुत्रस्तदर्थं न कदापि स्वकीयस्वीकृतिं प्रदत्तवान्। चिकित्सकपरामर्शेन सोऽध्यगच्छत् यत् तयोः निःसन्तानत्वे स स्वयमेव दोषी न तु तस्य पत्नी।

निर्मला बाबामणेः सेवायां नियोजिता आसीत्। तस्य यत् किञ्चिदावश्यकं भवति तत् सर्वं श्वशुरस्यादेशानुसारं निर्मला तत्क्षणमेव पूरयति स्म। परन्तु अन्धकाराच्छन्नेऽस्मिन्नर्द्धरात्रे एकाकिन्यागत्य इयति निकटे सा यदि तं सेवितुमिच्छति तर्हि तस्य कोऽर्थो भवेत्? किं सैतादृशीं सेवां कृत्वा बाबामणेराशीर्वचनेन स्वभर्तुः सकाशात् सन्तानमिच्छति? अथवा आशीर्वादफलस्वरूपं कञ्चित् सन्तानं बाबासकाशादेव इच्छति सा? बाबा स्वचिन्तनशक्तिं नियन्त्रयितुं नाशक्नोत्। उत्तेजनायां तस्य कर्णौ "भाँ भाँ"—शब्दमकुरुताम्। क्षणिकोत्तेजनावशेन किम् एतावत् पापं करणीयं वा? कामनाविवेकयोः संघर्षः प्राचलत् कियत् कालं यावत्। परिशेषे विजयो विवेकस्य। नहि, नहि सोऽद्य पापस्यैतस्य विरोधं करिष्यति। स निर्मलां भर्त्सयिष्यति। शतशः यतमानोऽपि बाबा मुखमप्युन्मोचयितुं नाशक्नोत्। भयानकस्वप्नं दृष्ट्वा स्वप्नद्रष्टुः यादृशी स्थितिर्भवति तादृश्येव स्थितिरभवत् बाबामणेः। तां वारयितुं हस्तौ प्रसारितवान्। बत! बलिष्ठौ तस्य हस्तौ विवेकस्य तमादेशं पालयितुं प्रस्तुतौ नास्ताम्। मनस आदेशं पालयितुं तौ तत्परावास्ताम्। निर्मलामपसारितुं प्रसृतौ तौ हस्तौ तामाकृष्यात्र स्वहृदये शायितवन्तौ। पराजयानन्तरं पुनश्च कामनायाः विजयः।

तदनन्तरं लज्जया भवतु, सङ्कोचेन भवतु, पश्चात्तापेन वा भवतु स्वेच्छयैव बाबा तं प्रीतिपुरग्रामं विहायान्यत्र प्रस्थितवान्।

आशीर्वादस्य फलं द्रष्टुं तस्य मनसि साहसः, स्पृहा वा नासीत् । अनुतापग्लानिः यथा तं कवलयितुम् भीषयति स्म । धनिकस्य ब्रजसुन्दरस्य वंशरक्षाऽभवदिति वार्ता तु तेन यथाकालं लब्धा । कस्य देवस्यानुकम्पया निर्मला माताऽभवदिति तु कदाचित् केवलं सा एव जानीयात् । ब्रजसुन्दरः, तस्य परिवारस्य अन्ये च सदस्याः प्रसन्ना अभवन् । परन्तु हसुराबाबा, अधर्मभयेन, अनुशोचनाभारेण वा समग्रनारीजातेः सम्मुखे आजीवनं नतमस्तकोऽतिष्ठत् । तन्मते तदेव तस्य प्रायश्चित्तं तदाचरितस्यापकर्मणः कृते ।

ग्रामाद् ग्रामान्तरस्य पर्यटनसमये पथि ग्राम्यतडागेषु, नदीषु च स्नानमग्नानां प्रौढानां, युवतीनां च अव्यवस्थितमङ्गवासं दृष्ट्वा, अथ पुनः कदाचित् सद्यःस्नातानामार्द्रवसनविजडितौ वर्त्तुलकुचौ च दृष्ट्वा स्वाभाविकोत्तेजनया, प्रबलवासनया च तस्य ब्रह्मचर्यं नैकवारम् उत्क्षिप्तं न जातमिति न, परन्तु तादृशं मनोविकारं सः क्षणेनैव नियन्त्रयित्वा, उत्शृंखले स्वमनसि प्रग्रहं च दत्वा स्वपादनखानेव पश्यन् मार्गमतिक्रमितवान् तदानीम् ।

एवं सः हसुराबाबा मुखे स्मितहासं प्रस्फोट्य 'गांजा'-नलिकां च निःश्वस्य वर्णयति कथानन्तरं कथाः, एकस्या घटनाया अनन्तरं चानेकाः रोचकघटनाः । तस्य पारायणेऽन्तो नास्ति । भक्तानां गद्गद्श्रवणेऽप्यन्तो नास्ति । न विरोधः, नापि प्रतिवादः । न उत्तरं, नापि प्रत्युत्तरम् । तत्रासीत् केवलमनुरोधः, अपि च जिज्ञासा ।

वस्तुतः हसुराबाबा कश्चिदसाधारणो योगी । नास्ति भ्रूक्षेपः निन्दायाः, अपमानस्य च कृते । सन्न्यासिनोऽपि तस्य नास्त्यपचेष्टा गोपायितुं स्वचरित्रदोषान् । सुखेषु हसति, हसत्यपि दुःखेषु । हसे, हसे करोति हरिभजनं, कृष्णनामसङ्कीर्तनं वा । हसन्नपि श्रावयति ग्राम्यप्रवचनं, पुराणप्रवचनं च । नामानुरूपं हि तस्य सकलं कार्यम् । नीतिनियमानामनुपालने यद्यपि बाबा न तथा सुदृढ़स्तथापि अक्षुण्णास्तिष्ठन्ति तस्य ब्रह्मचर्यप्रतीकस्वरूपाः सुदीर्घनखकेशाः, पलितानि च धवलश्मश्रूणि ।

टिन्-टिन्–वृद्धः

"टिन्-टिन्-वृद्ध आगतोऽस्ति ।
टिन्-टिन्-वृद्ध आगतोऽस्ति ।।"

तस्यागमनेन ग्रामस्य समस्तबालकाः हृर्षोत्फुल्लिता अभवन् । कश्चिद् भोजनं त्यक्त्वा अर्द्धभुक्तोऽपि मध्ये एव बहिरागच्छत् तं द्रष्टुम् । अपरश्च कश्चित् शौचमकृत्वैव उरूकं हस्तयोः गृहीत्वा अन्यैश्च बालैः सह टिन्-टिन्-वृद्धम् अन्वसरत् । तडागे, क्षुद्रपल्वले वा मत्स्यानि मारयन्तः हरिजनबसतेः बालाः मत्स्यमारणदण्डान् स्कन्धे स्थापयित्वा अधावन् । समग्रग्रामस्य ये चासन् वीथीकुक्कुरास्ते सर्वे युगपदेव अबुक्कन् । धावन्तः बालाः करतालं वादयित्वा नर्तितुं प्रारभन्त । कुक्कुरा अपि इतस्ततः धावितुं प्रारभन्त । सर्वेषां कोलाहलस्यासीदेक एव लक्ष्यः— टिन्-टिन्-वृद्धः । स तानभिक्रुध्य यावतीः गालीः ददाति स्म, बालास्तमभिलक्ष्य तावद् उपहासं कुर्वन्ति स्म । कश्चित् तस्य पश्चकच्छमाकर्षति, कश्चिदपरस्तस्य छत्रं, हस्तदण्डं च चोरयति स्म । अन्ये च केचन मुष्टिभिः धूलिं गृहीत्वा तस्य भिक्षापात्रे क्षिपन्ति स्म ।

—"अल्पायुषाः ! रण्डापुत्राः ! न जाने युष्माकं मातरः कति पुरुषान् वरयित्वा युष्मान् अजनयन् ।

टिन्-टिन्-वृद्धस्य अग्निवर्षिभिर्गालिभिः गगनपवनौ मुखरितौ अभवताम् ।

एषा तु शाश्वतिकी घटना शहीदपुरग्रामस्य टिन्-टिन्-वृद्धस्यागमनकाले । बालकास्तु तं कथमपि न त्यक्तुं बद्धपरिकराः दृश्यन्ते स्म । वृद्धस्य क्रोधमिश्रितां गालिं भ्रूक्षेपमकुर्वन्तस्ते बालाः स्वस्वकर्मणि व्यस्ताःभवन्ति स्म । बालैः सहोत्साहिताः केचन दुष्टमतयो युवानः, अर्द्धवृद्धा अपि टिन्-टिन्-वृद्धं व्यथयितं तत्पराः दृश्यन्ते स्म । एतादृग् विचित्रदृश्यं केवलं

शहीदपुरग्रामे द्रष्टुं मिलति । एतादृग् दृश्यं कदाचिद् ग्रामान्तरेष्वपि सम्भवेत् यदा टिन्-टिन्-वृद्धस्तं तं ग्रामं गच्छति भिक्षाटनार्थम् । यदा कदा वानराणामागमनेऽपि ग्रामेषु एतादृग् दृश्यं सुलभं भवति ।

टिन्-टिन्-वृद्धः जात्या ब्राह्मणः । वेलपडाशासनं तु तस्य मूलावासः । परन्तु प्रकृत्या यायावरस्य तस्य सम्बन्धः मूलावासेन सह नगण्य एवासीत् । स तु यथेच्छं यस्मिन् कस्मिन् ग्रामे स्वनिवासं कल्पयति स्म । तस्य प्रकृतनामापि न कोऽपि जानाति शहीदपुरग्रामे, ग्रामान्तरे वा । वृद्धस्य कोपशीलस्वभावात् सर्वे तं 'टिन्-टिन्-वृद्ध' इति नाम्नैवाह्वयन्ति ।

वृद्धस्य वयः षष्टिः, द्विषष्टिर्वा भवेत् । परन्तु शहीदपुरग्रामस्य बालास्तेन सह विंशतिवर्षीयोबालक इव व्यवहरन्ति । परंपराक्रमेण सः बालेष्वतिपरिचितो वर्तते । बालानां यावदायुर्वृद्धिर्भवति तावत् ते टिन्-टिन्-वृद्धस्य सामीप्यं, सान्निध्यं च स्वयमेव त्यजन्ति, अथवा त्यक्तुं विवशाः भवन्ति । समयाभावात् ते पुनः टिन्-टिन्-वृद्धस्योपरि पूर्ववद् अत्याचारं कर्तुं नेच्छन्ति । तेषामुत्तराधिकारिणस्तु तेषां स्थानानि पूरयन्ति । अतः टिन्-टिन्-वृद्धस्य दुर्दशायां न किमपि उल्लेखनीयं परिवर्तनं भवति ।

चत्वारिंशद्वर्षेभ्यः प्राक् यदा विवाहार्थं समाजे कन्यानां नितरामभाव आसीत्, तदानीमपि टिन्-टिन् पञ्चशतरूप्यकविनिमयेन विवाहमकरोत् । स्वल्पकालात्मके गार्हस्थ्येऽपि तस्यार्द्धं "दजन" (षट्) सन्ततयः । सोऽपि स्वयं गाञ्जा-(मादकबीजविशेषस्य) प्रियः । उपरि वृत्तिहीनत्वादायशून्यः । पौरोहित्यं कृत्वा यत् किञ्चिदुपार्जयति स्म तद् गाञ्जापानार्थमपि पर्याप्तं नासीत् । स्वबालानां खाद्यकष्टं शमयितुमसमर्थः, धर्मपत्न्याः गालिं च सोढुमसमर्थः सः गृहं त्यक्तवान् । त्यक्तवांश्च सकलगार्हस्थ्यम् । टिन्-टिन् यद्यपि गृहं त्यक्तवान् तथापि खाद्यचिन्ता तं न त्यक्तवती । तस्यैतादृशः गृहत्यागचरित्रात् पौरहित्यवृत्तिरपि हस्तयोर्गता । भिक्षा-याचनादतिरिक्तं तदानीमुपायान्तरं नासीत् तत्सविध । ग्रामाद् ग्रामान्तरं गच्छन् स भिक्षामटति स्म । अद्यास्मिन् ग्रामे, श्वः कस्मिंश्चिदन्यस्मिन् ग्रामे तस्य वसतिरासीत् । परन्तु वेलपडाशासनस्य नाम तेन पुनः भ्रमादपि न गृहीतम् । यदा कदा यदि तस्य सन्ततीनां स्मृतिर्मनस्यायाति स्म तर्हि स तां परक्षणमेव मनसोऽनिष्कासयत् । कस्यचित्

त्यागो वा भवतु मरणं वा भवतु सम्बन्धिनां उभयत्र समानैव स्थिति-र्भवतीत्यन्वभवत् सः।

टिन्-टिन्-वृद्धः स्वभावेनातिशयभोजनप्रियः। दशपञ्चाशद्ग्रामेषु कस्य कदा विवाहः, व्रतोपनयनं, श्राद्धः, एकादशाहः, त्रयोदशाहः अथवा अष्टप्रहरं नामसंकीर्तनं भवति, भविष्यति वा तत् सर्वं सः प्रागेव जानाति स्म। तेषु कार्यक्रमेषु सम्मिलितुं तस्य कृते निमन्त्रणामन्त्रणयोरावश्यक-तैव नासीत्। समुचितसमये एवागत्य सः कदलिपत्रं प्रासारयत् पङ्क्त-भोजनाय। इदमेवासीत्तस्य वैशिष्ट्यम्। वर्षावन्यावात्यादीनि न कदापि तस्य प्रतिबन्धकान्यभवन् भोजनविषये। मृताहश्राद्धादिषु यजमानस्य ब्राह्मणान्वेषणकार्यभारं प्रायः टिन्-टिन् एव निर्वहति स्म। यदा कस्यचिद् गृहे कश्चिन्म्रियते तदा टिन्-टिन्-वृद्धस्य मनसि प्रसन्नता भवति। द्विरहादारभ्य त्रयोदशाहं यावत् तस्य गृहे स्थित्वा तत्र ब्राह्मणभोजनं च कृत्वा सः यजमानमुपकरोति, मृतात्मानञ्च तारयति। तस्यैतादृशं व्यवहारं दृष्ट्वा जनास्तमुपहसन्ति। "कस्यचित् सर्वनाशः कस्यचित्तु पौषमास" इत्याभाणकं च स्मरन्ति।

मनुष्योपरि सम्भावितानां दुष्टग्रहाणां प्रभावं ह्रासयितुं उत्तमब्रा-ह्मणेभ्यो, विशिष्य कृष्णब्राह्मणेभ्यो भोजनदानस्य प्रसिद्धिरस्मत्परंपरायां वरीवर्त्ति। ग्रहमुक्तिभोजनार्थं सामान्यतया ब्राह्मणाः प्रस्तुताः न भवन्ति। ते तज्जनिताद् दुष्प्रभावाद् विभ्यति। मार्जारकपाले स्वयमेव दुग्धपात्रपतनमिव प्रसङ्गेऽस्मिन् टिन्-टिन्-वृद्ध एव सर्वेषां त्राणकर्ता भवति। वस्तुतः तस्मिन् क्षेत्रे एतादृशेषु प्रयोजनेषु जनाः निश्चिन्ता एव तिष्ठन्ति। ते जानन्ति यत् टिन्-टिन्-वृद्धाद् अपरः कश्चिदुत्तमः कृष्णकायो ब्राह्मणो न सम्भविष्यति संसारे। स तु सकलग्रहाणां मूर्तिमान् प्रतीकः। ग्रहेभ्यस्तस्य को भयः? अद्यत्वेऽस्मिन् महार्घतमे युगे विनामूल्येन एतादृशं सरसभोजनं कस्त्यक्तुमर्हति?

वस्तुतः टिन्-टिन्-वृद्धः नियमितरूपेण सर्वेषां गृहे ग्रहमुक्तिभोजनं कृत्वा स्वोदरे सकल-ग्रहनक्षत्राणि स्थापितवान्। यावांश्च भवतु महान् दुष्टग्रहः स टिन्-टिन्-वृद्धस्य जठराग्नौ अचिरात् सुनियन्त्रितो भवति। अतिशयगाञ्जापानं कृत्वा सः क्रमशः नीलकंठः शिव इव संवृतः। हला-

हलं विषमपि तस्योदरे सुजीर्णं भवति । का कथा पुनरेषां दुष्टग्रहाणाम् ? वस्तुतः स गाञ्जापानमेकदिनं न करिष्यति चेत् तर्हि तस्य सम्पूर्ण-शरीरे समस्तग्रहाः बुध-शुक्र-शनिवृहस्पत्यादयः आविर्भविष्यन्ति सशरीरम् ।

समयानुपातेन टिन्टिन्वृद्धस्य वयोऽपि सम्वर्द्धितम् । वार्द्धक्यमपि तस्य बुद्धितः द्वितीयविवाहस्याभिलाषं निष्कासयितुं नाशक्नोत् ।

विवाह एव तस्य जीवनस्य परमदुर्बलता । यद्यपि सः सरलविश्वासी नास्ति तथाप्यागते च विवाहप्रसङ्गे सोऽविश्वस्तमपि पुरुषं विश्वसिति । एकवारं विवाहं कृत्वा यः गार्हस्थ्याश्रमभारं वोढुमसमर्थोऽभवत् सः पुनर्विवाहं कर्तुं किमर्थमिच्छति, कथं वा साहसं करोत्येतत्तु केवलं टिन्-टिन्-वृद्ध एव जानीयात् ।

एकदा शहीदपुरग्रामस्य युवकसंघस्य युवानः टिन्टिन्वृद्धस्य विवाहमायोजयित्वा किञ्चित् परिहासकरं दृश्यं द्रष्टुमुत्साहिता अभवन् । अतस्ते तं प्रबोधितवन्तः यत् तस्मै विना मूल्येन एका विवाहयोग्या कन्या प्रदास्यते विवाहार्थम् । विवाहात्परं च तौ दम्पती ग्रामस्ये समितिगृहे एव स्थातुमर्हतः । अपरं च, विवाहस्य समस्तव्ययं युवसमितिरेव निर्वक्ष्यति । टिन्-टिन्-वृद्धस्तु एतादृशः सुवर्णसुयोगस्य प्रतीक्षायामेवासीत् । यदि सुयोगमेतं स त्यक्ष्यति तर्हि कदाचिदाजीवनं विवाहं कर्तुं न शक्ष्यति । अतः सः विवाहार्थं झटित्येव स्वकीयां स्वीकृतिं प्रदत्तवान् । सः वा कथं जानीयाद् अद्यतनीययूनां दुष्टस्वभावम् ?

एवं टिन्टिन्वृद्धः स्वविवाहदिवसे समयेनैव शोभायात्रायां वररूपेणागतवान् । प्रसन्नाश्च समितेः युवानः नृत्यमप्यकुर्वन् । परन्तु मधुशय्यायां टिन्-टिन्-वृद्धः यां नवोढाम् अमिलत् सा युवत्येव नासीत् । स तु "मकर"-नामधेयोऽन्यतमः सदस्यस्तस्याः युवसमितेः । लज्जया टिन्-टिन् शहीदपुरग्रामं त्यक्त्वा तस्यामेव रात्रौ प्रस्थितवान् । ततः षण्मासान् यावत् तस्य दर्शनं नाभवत् तस्मिन् ग्रामे । परन्तु टिन्-टिन्-वृद्धस्यानुपस्थितावपि वार्त्तैषा तेषु दशपञ्चाशद्ग्रामेषु प्रासरत् । जीवने द्वितीयवारं मिथ्याविवाहं कृत्वा सः पथि उर्द्धवशिरश्चलितुमपि नाशक्नोत् ।

यावदसौ एतं दयनीयवृत्तान्तं न विस्मृतवान् तावदपरः कश्चिद् द्वितीयो वृत्तान्तोऽघटत् तस्य जीवने। एकदा केचन दुष्टमनसो युवानस्तस्य ग्रामस्य कस्यचिद् यजमानस्य त्रिनाथमेलायां पौरोहित्यं कर्तुं तमामन्त्रितवन्तः। लोभवशात् स स्वीकृतवान् तन्निमन्त्रणम्। परन्तु यदा मेलायां सः पूजनं निर्वाहयन् आसीत् तदा सुगन्धधूपपरिवर्ते "लङ्काधूमं" दत्वा छलनया तैः प्रकोष्ठस्य द्वारं पिहितम्। निःश्वासावरोधः जातस्तस्य धूमग्रसिते तस्मिन् प्रकोष्ठे। श्वासकाशैर्यदा सः व्यतिव्यस्तोऽभवत् तदा ते द्वारमुन्मोच्य तं त्यक्तवन्तः। तस्माद् दिवसात् टिन्टिन्वृद्धो मनुष्यमपि विश्वसितुमबिभेत्।

× ×　　　　× ×　　　　× ×

बहूनि दिनानि ग्रामान्तरेषु यापयित्वाद्य टिन्टिन्-वृद्धः पुनरेकवारं शहीदपुरग्रामे आगतोऽस्ति। अतः पूर्वापेक्षया बालानाम् उल्लासोपहासयोः प्रवृत्तिश्च द्विगुणिता दृश्यते—"अयि भोः टिन् टिन्! अयि भोः टिन् टिन्! इति रटन्तः ते सर्वे बालास्तमेवानुसरन्ति। क्रोधभयाभ्यामाहतः टिन्-टिन्-वृद्धः एकमुखः सन् धावमानोऽस्ति। इत्यवसरे बालेषु कश्चिदुग्रः टिन्-टिन्-वृद्धस्योपरि दूरादष्ठीवत् सशब्दम्। दुर्वासःस्वरूपः क्रोधितः टिन्-टिन्-वृद्धः मत्तकुक्कुर इव दण्डेन प्रहारयितुं तमनुधावितवान्। प्रतिशोधप्रतिज्ञायां 'हुत्-हुत्' ज्वलिते चास्तां तन्नेत्रे। छत्रभङ्गमददात् बालरूपी वानरसेना। मन्ये टिन्-टिन्-वृद्धस्यैतादृशं उग्ररूपं द्रष्टुं ते प्रस्तुता एव नासन्। कियत्क्षणं यावत् सर्वे शान्ता अभवन्। स्वक्रोधं यथाकथञ्चित् शमयित्वा अग्रे प्रस्थितवान् टिन्टिन्। परन्तु पश्चभागादेव प्रक्षिप्तेन कस्य लोष्टाघातेन सोऽचेतनो भूत्वा भूमौ अपतत्। वैशाखस्यात्युष्मे धूलिपटले लुठन् आसीत् कश्चित् निःसहायः। तस्य कपालात् निर्गता आसन् कतिपयकृष्णरक्तधाराः। मन्ये ताः निदाघोत्तप्तां वैशाखधूलिं शमयितुं शीतयितुं च व्यर्थचेष्टाः कुर्वन्त्य आसन्। धूलिषु लुठमानं तं टिन्टिन्-वृद्धं दृष्ट्वा केचन खेदं प्रकटितवन्तः—"किमसौ स एवासौ टिन्-टिन्-वृद्धो यं दृष्ट्वा तत्परितः बालानां सुदीर्घा शोभायात्रा प्रचलित स्म। परन्तु हन्त! अद्य यद्यप्येषा टिन्-टिन्-वृद्धस्य अन्तिमशोभायात्रा प्रवर्तते तथापि ताम् अन्तिमशोभायात्रां द्रष्टुमस्य शहीदपुरग्रामस्य नैकोऽपि बालः, युवा, वृद्धो वा तत्र उपस्थित आसीत्।

स्वर्गे मम प्रथमः परिचितः

अहं तदानीं नूतनतया स्वर्गमागतवान् आसम् । तत्रत्याः सर्वे ममापरिचिता एवासन् । अतोऽहं तत्रप्रतिक्षणं निःसङ्गतामन्वभवम् । यत्राहमगच्छम् तत्र निःसङ्गतैव मे सहचरी आसीत् । अहर्निशं स्वपन्नेवाहं कालातिपातं कृत्वा विरक्त्या अतिष्ठोऽभवम् । एकदा सायंकाले सान्ध्यभ्रमणार्थम् गतवानासम् । आकाशगंगातीरे यदा भ्रमन्नासं तदा अन्धकारः संजातः । तावत् मामभिमुखमग्रेसरन्तीं कामपि छायामपश्यम् । तां दृष्ट्वा किञ्चिद् भीतोऽप्यभवम् । पूर्वमेव मया श्रुतमासीत् यत् स्वर्गे बहवः भूताः, प्रेताः, पिशाचाश्च तिष्ठन्तोति । अप्येषः भूतः ? नहि, नहि एष भूतो भवितुं, नार्हति । परस्मिन् मुहूर्त्ते साहसं सञ्चयन्, रामनाम च जपन् अग्रे सृतवान् । समीपमागत्य यमपश्यम् तेन मे भयो व्यपगतः । सोऽप्येको मादृशः मनुष्य एवासीत् । कण्ठं परिष्कृत्य स्वजिज्ञासां शमयितुमपृच्छम्—

—क्षम्यतां महाशय ! अहमिदंप्रथमतया स्वर्गे आगतोऽस्मि । अतोऽत्र पूर्णतया नूतनोऽपरिचितश्च । किं मामस्य स्थानस्य विषये प्राथमिकीं सूचनां दातुं समर्थोऽस्ति भवान् ?

—आम् । किमर्थं न ?

—अत्र कानि सन्ति दर्शनीयस्थानानि ?

—कानि, कानि दृष्टानि भवता ?

—नोल्लेख्यं किञ्चित् । ह्य एव अत्रागतोऽस्मि । चित्रगुप्तविमानस्थानके अवतीर्य गन्धर्वधर्मशालायां तिष्ठन्नस्मि । अद्यैव सद्यः बहिरागतोऽस्मि । अत्र आकाशगंगातीरे भवतां दर्शनं संप्राप्यातीव प्रीतोऽस्मि ।

—आकाशगंगाया 'उर्वशीघाटः' अतीव रमणीयो वर्तते। मन्ये भवता नैव दृष्टं स्यात्। आगच्छतु, वार्ताप्रसंगेनैव तस्य दर्शनमपि सम्भविष्यति।

—अस्तु, गच्छावः।

—अन्येषु दर्शनीयस्थलेषु इन्द्रस्य नन्दनवनम्, पृथिव्यां यत् 'पाराडाइज्' इति नाम्ना ख्यातमस्ति। पारिजातवृक्षोऽप्यधुना विलुप्तो वर्तते। तस्य स्थानं तु कश्चिद् मन्दारवृक्ष एवाधिकरोति। अपरं च, सर्वोच्चदैवन्यायालयः, नक्षत्रभवनम्, प्रजापतेः ध्यानपीठम् इत्यादीनि च सन्ति प्रमुखपर्यटनस्थानानि।

—उच्चैःश्रवा इति नाम्ना कश्चिदश्वः अत्र वर्तते इति मया श्रुतम्। श्रूयते अतीव विलक्षणोऽस्ति सोऽश्ववरः।

—किं भवान् न जानाति? सोऽप्यश्वः सप्ताहात् प्रागेव दिवंगतः। केनचिद् विलक्षणरोगेण आक्रान्त आसीत्। वैद्यस्य धन्वन्तरेः शतचेष्टयापि स्वस्थो न सञ्जातः। अतीव घातकोऽसौ रोगः। यथा पृथिव्यां कर्कट-'एड्सा' दयः रोगाः भवन्ति।

—अप्यपरं किञ्चिदस्ति दर्शनीयस्थानं भवतः विचारे?

—स्वर्णमत्स्यसंग्रहालयः ['गोल्डेन-आक्वारियम्']। अत्र सरंक्षिताः मत्स्याः स्वर्णमयाः। जीविता अपि ते विशुद्धस्वर्णस्वरूपाः।

—अहं कियान् स्वार्थी। एतावत् कालं यावत् केवलं स्वार्थविषये चिन्तयन्नस्मि। 'चायम्' तू दूरं भवतः परिचयोऽपि नैव पृष्टो मया।

अस्तु, कुत्रत्यो भवान्? के सन्ति भवतां गृहे परिवारसदस्याः? अत्र स्वकीय आवासो निर्मितोऽथवा भाटकगृहेऽद्यापि तिष्ठति? अत्रत्य-भाटकगृहविषये काऽस्ति भवतो धारणा? किम् अत्रापि सुरक्षाशुल्कः ['सलामी, पगडी' वा] दीयते भाटकगृहप्रवेशात् प्राक्?

—अहमप्यत्र नूतनोऽस्मि। मासद्वयादेवात्रागतोऽस्मि। अत्र "हाहा-हुहु"-गन्धर्वनिलये तिष्ठामि। पृथिव्यां ब्राह्मीविश्वविद्यालये इतिहासविषये शोधं कुर्वता मया आत्महत्या कृता। ततः परमत्रैव स्थातुं

विवशोऽस्मि । वृत्तिस्तु न लब्धा । कामपि अस्थायिवृत्तिं करोमि । यत् किञ्चत् मिलति तेन भरणपोषणं यथाकथमपि भवति ।

—किमुक्तम् ? ब्राह्मी-विश्वविद्यालये इतिहासविषये गवेषणां कुर्वन् आसीद् भवान् । अपि भवान् हरीशोऽस्ति ?

आश्चर्य ! भवान् मम नाम कथं जानाति ?

—किं मां नाभिजानासि ? अहं सरोजोऽस्मि । 'साहित्यचिन्तनिकायाः' सम्पादकः ।

—अरे ! त्वं सरोजोऽसि ? पश्य, अशरीरीत्वाद् आवां परस्परं नाभिजानीवः । परं त्वमत्र किमर्थम् ?

—किं वदामि भ्रातः ! त्वं कदाचित् न जानीयाः यत् सौराष्ट्रे नारायणीसेनादलस्य कियत् प्रभावम् । स्वप्रान्तीयेतराणां नियुक्तिं ते तत्र न कामयन्ते, न वा सहन्ते ।

—परन्तु कस्ते तत्र सम्बन्धः ?

—अरे ! तव मृत्योः पश्चात् गणपतिमहाविद्यालात् मया नियुक्तिसंकेतोऽधिगतः । अद्यत्वे नियुक्तेर्या विषमसमस्या । तदुपरि अध्यापकपदम् । यू० जी० सी० परिवर्द्धितं वेतनमानं को वा नियुक्तिहीनस्त्यक्तुमर्हति ? मया तु, स्वीकृतिः प्रदत्ता । समयेन नियुक्तौ योगदानमपि कृतवान् ।

—ततः किं सञ्जातम् ?

—किं जायेत ? द्वित्राः दिवसाः गता अपि न, कानिचन असामाजिकतत्त्वान्यागत्य मां त्यागपत्रं लिखितुं विवशमिव कृतवान् । इदमपि घोषितं तैर्यत् यद्यहं सप्ताहाभ्यन्तरे त्यागपत्रं न दास्यामि तर्हि तेऽवश्यं मे जीवनमपहरिष्यन्ति । न मया तेषां वचः याथातथ्येन गृहीतम् । ते केवलं मिथ्याभयं जनयन्तीति अहमचिन्तयम् । परन्तु तैर्यदुक्तं तदेव कार्येषु पालितम् । मम नियुक्तेर्दशमदिवसे महाविद्यालयात् प्रत्यावर्तन-

समये ते मम पन्थानमवरुद्ध्य बलादेव मां स्वीयकारयानेन निकटस्थपर्वतीयप्रदेशमानीय छुरिकाघातेन मारितवन्तः।

—हा दैवम्! किं ते एतावन्तः नृशंसाः सन्ति? जैनमहाविद्यालयतः मत्कृतेऽपि नियुक्तिसंकेतः आगत आसीत्। मम त्वेतत् सौभाग्यमिति कल्पयामि यन्मया तन्न स्वीकृतम्। अन्यथा ममापि त्वादृशी दशा स्यात्।

—त्वया तु सुष्ठु आचरितं नियुक्तिम् अस्वीकृत्य। अरे! इदानीमेव प्रष्टुं स्मरामि—"किमासीत् कारणं तव आत्महत्यायाः? किं कारणं लिखितुमपि समयो नासीत् त्वत्सविधे? किमेतावत्या त्वरयैव आत्महत्या कृता त्वया?

—मम तु कारण-लिखने इच्छासीत्। परन्तु शीघ्रतया लेखनीमप्यन्वेष्टुं नाशक्नुवम्। सम्मुखप्रकोष्ठे यः 'मद्रासी' शोधछात्र आसीत् तेन सायमेव मे लेखनी गृहीता आसीत्। रात्रिद्विवादने कस्यापि निद्राव्याघातः न करणीयः खलु।

—अरे! अहं तु तद्रात्रौ सार्द्धद्विवादनं यावत् जागरित आसम्। यदि मामयाचिष्यत्तर्हि किमहं तुभ्यं लेखनीं नादास्यम्?

—अरे! किमहं त्वां न जानामि। यदि तव प्रकोष्ठमागतः स्याम् तर्हि मे सम्पूर्णयोजना विफलैव स्यात्। रात्रिद्विवादनेऽपि त्वं विद्युच्चुल्लिकायां विना दुग्धेन कषायचायं निर्माय मामपास्यः। ततः प्रावर्तिष्यत वार्तालापस्यासमाप्या यात्रा—कथं तव विभागस्य सा नवागतायुवती त्वयि नितरां स्निह्यति। अथवैषमः एम० फील० कर्तुं या विवाहिता महिला आगताऽस्ति सा कथं तव प्रेमजाले निबद्धाऽस्ति। अथवा का च प्रगतिस्तव शोधकार्यस्य। कस्मिन् वेदे कस्य शब्दस्य प्रयोगो वर्तते यत् पाणिनिनापि न व्युत्पादिताऽस्ति। एवमन्ये च बहवः सरसाः, नीरसाश्च प्रसंगाः। तेनैव रात्रिः व्यतीता स्यात्। अहं आत्महत्यां कदा कथं वाऽकरिष्यम्?

—अहो! किम् एतावत् शुभकार्यमाचरितं त्वया? यदर्थमेकदिवसोऽपि विलम्बस्तेऽसह्य आसीत्। अरे! त्वं तु पञ्चत्वं प्राप्तः। परं जानासि,

वयं सर्वे उत्कलीयछात्राः त्वदर्थं कियत्कष्टम् अन्वभवम् ? त्रीणि दिनानि तिस्रश्च रात्र्यः न केनापि सुभुक्तं, न वा शान्तिर्लब्धा । दिवसत्रयानन्तरं तव गृहाद् ज्ञातयः, बान्धवश्च समागताः । तदनन्तरमेव शवसंस्कारो जातः । तव पितरौ एतां वार्तां श्रुत्वा मूर्च्छां गतौ । अतस्तौ तव शवसंस्कारार्थं नागतवन्तौ ।

—अरे ! मम शवसंस्कारः कुत्र कथं वा जात इति न जानामि ।

—वैकुण्ठश्मशाने विद्युच्चुल्यामेव तव शवसंस्कारो जातः । किं त्वमेतद् वृतान्तं न जानासि ?

—अहं वा कथं जानीयाम् ? आम् ! स्मरामि, एकदिनानन्तरमेवाहं तत्र गतवानासम् । परन्तु मम प्रकोष्ठे तु विश्वविद्यालयस्य तालकं (ताला इति भाषायाम्) दोलायमानं दृष्ट्वा निराशया प्रत्यावर्तितवान् । तावत् मम शवसंस्कारो न जात इति यद्यज्ञास्यम् तर्हि नूनं पुनरेकवारं गत्वा प्रयत्नमकरिष्यम् ।

—किं त्वमेतदपि न जानासि यत् आत्महत्याजनितमृत्योः पश्चात् शवव्यवच्छेदादीनि बहूनि वैधानिककार्याणि अवशिष्टानि भवन्ति ?

—जानामि, परन्तु अत्र नूतनतयागतवानासं तदानीम् । व्यवस्थायै कश्चन समयोऽपेक्षित आसीत् । अतः समयाभावाद् गन्तुं नाशक्नुवम् । परन्तु जीवनस्य कञ्चिदवशोषम-द्यापि हृदये वहामि । विद्युच्चुल्ल्यां शवदाहो कथं भवतीति नैतावद् दृष्टं मया ।

—अप्यत्र स्वर्गे विद्युच्चुल्ली नास्ति वा ?

—स्यात् । परं मया नाद्यावधि दृष्टा । अस्तु श्वः रविवासरोऽस्ति । त्वं ममावासमागच्छ । तव मध्याह्नभोजनं श्वः मया सहैव भविष्यति । भोजनानन्तरं भ्रमणार्थं गच्छावः । "मोक्षागार"—श्मशानमपि गच्छावः यत्र शवदाहं विद्युच्युल्ल्यां द्रष्टुं शक्यते । अनन्तरं प्रेक्षागृहं गत्वा तत्र नवागतायाः अप्सरसः नृत्यच्छटां पश्यावः । नूतनतयागताऽस्ति सा । अतः स्वप्रसिद्ध्यर्थं साहसिकं नग्नमंगप्रदर्शनमपि करोति । तदर्थमद्यैव अग्रिमप्रवेशपत्रं क्रेतव्यम् । महान् संमर्दो भवतीति श्रूयते । एवं पथि विचरन् त्वाम् आत्महत्याकारणमपि श्रावयिष्यामि ।

प्रतिश्रुतिः

एवं कियान् कालः जीवितव्यः ? तस्याः यौवनमत्र लाञ्छितम्। भूलुठितं मनः। तस्याः कामनायाः शतदलान्यत्र म्लानानि। छिन्नं हृदयकोरकम्। दुःसहमिदं विवाहबन्धनम्। पतिनाम्ना नरकमिदं किमर्थं सोढव्यम् ?

मुक्तिः ! मुक्तिम् इच्छति पतिविमनस्का रुचिः। बन्धनान्मुक्तिः। पतिरूपनिष्ठुरबन्धनान्मुक्तिं कामयते सा।

देवशर्मा। कुरूपः। तस्याः पतिः। तथाकथितः पतिदेवः। इहलोकात् परलोकं यावत् स एव अनुसर्तव्यः। स्वेच्छया भवतु, अनिच्छया वा भवतु स एव आदरयितव्यः। परन्तु बहुधा यतमानाऽपि न शक्नोति सा तस्मै स्पृहयितुम्।

यौवनमदायत्ता रुचिः। रूपयौवनविहीनाय तस्मै किमर्थमाकृष्टा भवेत् ? देवशर्मणः कुटीराद् बहिर्न जाने कति नवयुवानस्तामभ्यर्थयितुं तिष्ठन्ति। रुचिस्तु कस्यचिदभिरूपवतः पुरुषस्य सान्निध्यम् इच्छति। तदर्थं नितरामयोग्यो देवशर्मा।

कुटीरादनतिदूरे शोभते काचित् सप्तपर्णी-तरुः। तदधोऽभिसारिका रुचिः। तत्र स्थित्वादिवसं दूरातिदूरं पथप्रान्तं विलोकयति सा। काम-माययाऽभिभूतं तस्याः हृदयम्। महती तस्याः प्रतीक्षा। कदाचिदवश्यं फलवती भविष्यतीति मनुते स्थिरनिश्चया सा।

देवशर्मापि एतत् सञ्जानीते यत् परपुरुषानुगता तस्याः पत्नी। सुदर्शनः पुरन्दरस्तस्याः प्रणयी। भूयोऽस्मिन्नेव पथि क्षणमाविर्भूय पुनरन्तर्हितो भवति। दर्शनं तस्य न सम्भवति। स्ववेशं परिवर्त्य आयाति सः। पदध्वनिस्तु श्रूयते केवलम्। तस्यानुरागे उन्मना रुचिः।

गेहे पतिदेवस्य दृढ़तरं शासनम्। बिभेति च तस्माद् रुचिः। अतः सततं यतमानोऽपि वारम्वारं पराजयं लभते तस्याः प्रेमी पुरन्दरः। मिलनं तु दुरूहव्यापारस्तयोः कृते।

रुचिः। इप्सितार्थस्थिरनिश्चयं तस्याः मनः। न प्रतीक्षां सहते। विलम्बस्तामुत्पीडयति। यदा कदा पतिदेवस्याकस्मिकम् आह्वानम्। विफलमनोरथा प्रत्यागच्छति कुटीरम्। इतः किमन्यत् सा कर्तुं प्रभवेत् ? स्वपतिमभिक्रुध्यति केवलम्। क्षीणजनाः निष्करुणाः भवन्तीति तमाक्षिपति। यदि कदाचिद् वातायनेन बहिः पश्यति सा, तदपि चक्षुः शूलं भवति देवशर्मणः। केनापि व्याजेनावरुणद्धि वातायनम्। देवशर्मण एतादृशं व्यवहारं विस्मापयति रुचिम्। किमर्थमेतावदाक्रोशम् ? किमर्थं सः रुचिं प्रसन्नां द्रष्टुं नेच्छति ?

देवशर्मापि क्लान्तः। महान् हि कालव्ययस्तस्यानुत्पादके कर्मणि। अवसन्नं, विषण्णञ्च तस्य मनः। सर्वथार्थहीना तस्यैषा प्रचेष्टा। रुचिस्तु अद्यापि तस्मै मनागपि न प्रीणाति। प्रेम नाम "रूपयौवनमत्तमहोत्सवम्" इति तस्याः जीवन-दर्शनम्। कामनामात्रस्य परिपूर्त्तये पुरुषबन्धनं स्वीकर्तुं शक्नोति सा। इतोऽप्यधिकं नानुमनुते सा स्त्रीपुरुषयोः सम्पर्कं। स्वाभाविकश्चैषः धर्मो देहस्य। महती खलु कामपिपासा रूपयौवनशीलानां युवतीनाम्। तदनुरूपोऽभिलाषः व्यस्तोऽपि न दृष्टिगोचरो भवति स्वपतौ देवशर्मणि। तस्य जीवनस्य दर्शनमपि भिन्नं प्रतिभाति।

देवशर्मा स्वयमपि न जानाति। किमत्र रहस्यं स्यात् ? किमर्थमेतां सततं मुक्तिं कामयमानां नवयौवनां युवतीं त्यक्तुं नेच्छति सः। किमर्थं स्वयमिच्छति स्वकर्मणि व्याघातम् ?

× × ×   × × ×   × × ×

अद्य अतीव विमर्षेऽस्ति देवशर्मा। हर्षः सर्वथा व्यपगतः। औदासीन्यं मुखमण्डले स्पष्टम्। चिन्ताकुले च तस्य लोचने। हठात् किमर्थमेतत्परिवर्तनम् ?

यागार्थमामन्त्रितोऽस्ति देवशर्मा। न्यूनातिन्यूनम् एकदिवसार्थमवश्यं बहिर्गन्तव्यम्। कुटीरे च स्वेच्छाचारिणी प्रियतमा पत्नी। परपुरुषैक-

दृष्टिः सा बहुकालादेवंविधस्य कस्यचिदवसरस्य प्रतीक्षायाम् । लब्धे चावसरे सुकुमारमेतं विवाहबन्धनं विच्छिद्य पलायिष्यते । बहिश्च शठः पुरन्दरो मायां विरच्य तिष्ठति ।

शनैरुपगता तस्य गमनवेला । नोपेक्षितुं शक्यते देवकर्म। विचलितो देवशर्मा । "न ययौ न तस्थौ" इत्यवस्थायां व्यग्रस्तस्य मनोभावः । पक्षे गोहत्या, पक्षान्तरे च ब्रह्महत्येव तस्य स्थितिः। किंकर्तव्यविमूढः सोऽगत्या स्वशिष्यमाहूतवान्—

—'विपुल' !

—"आगच्छामि, आचार्य" ! गुरोराह्वानमात्रेण झटित्युपसर्पति विपुलः ।

—"किमादिश्यते, आचार्य" ! व्यथितं गुरुवरं दृष्ट्वा जिज्ञासितवान् प्रियशिष्यो विपुलः ।

—"विपुल ! यागाय निमन्त्रितोऽहम् । ग्रामान्तरं गन्तव्यम् । परन्तु न जाने किमर्थं शंकाकुलं मे मनः । भाराक्रान्तं शरीरम् । किं कर्म किमकर्मेति न विवेचयितुं शक्नोमि । भीतोऽहं विपुल ! कस्मादप्यज्ञातभयात् । त्रस्तोऽहं कस्माच्चिदनिर्वचनीयत्रासात् । कुत्रापि गन्तुं नोत्सहे ।" वेदनासिक्तः गुरोः कण्ठस्वरः ।

—"किमर्थमाचार्य ! किं कष्टमापतितं भवति ?" किं वा वदेत् देवशर्मा ? विपुलः न केवलं शिष्यः, अपि तु पुत्रोपमः । विषयश्च वैयक्तिकः, लज्जाकरश्च । किं वक्तव्यमेतत् । ऊहापोहेन केवलं तूष्णीमास्थाय तस्थौ ।

—"प्रकाशयतु आचार्य ! सङ्कोचो माऽस्तु । वदतु, किं कष्टं भवताम् ?" निरवच्छिन्नोऽनुनयः विपुलस्य ।

—"त्वदर्थं ममैषोऽनुरोधः विपुल !"

—"आदेश इत्युच्यतामाचार्य !"

—"अस्तु, तमादेशं पालयिष्यसि वा ?" हस्तेन स्कन्धमस्पृशद् विपुलस्य ।

—"किमेतत् प्रष्टव्यं वा ? आदिशतु, आदिशतु आचार्य ! जीवनविनिमयेन निर्वाहयामि ।" तथापि नीरवो देवशर्मा । लज्जानतमुखः । किमेतत् प्रकाशनीयं वैयक्तिकं रहस्यम् ? क्षणं यावन्मनोभावविवेकयोर्युद्धम् । विजयश्च मनसो भावस्य । विपुलः विज्ञापनीयः ।

—"विपुल ! यथा त्वं जानासि रुचिर्मह्यं न प्रीणाति ।"

—"इदं प्रथमतया शृणोमि आचार्य ! परन्तु न प्रत्यवैमि ।"
असहायो देवशर्मा । पुनर्विवक्षयाधरोष्ठयोः संघर्षः । दुःखेनोद्विग्नमनसा च वक्तुं प्रारभत ।

—"परकीयप्रेम्णा मोहासक्ता मम पत्नी । पुरन्दरे प्रगाढानुरक्ता । यज्ञार्थमद्य ग्रामान्तरं गन्तुं विवशोऽस्मि । प्रत्यागत्य तामत्र द्रक्ष्यामीति प्रत्ययो न भवति ।"

—"इदमहं प्रतिजानामि । भवतामनुपस्थितौ पुरन्दरस्तस्याः शरीरमपि स्प्रष्टुं न शक्ष्यति ।"

—"साधु विपुल ! साधु । केवलं त्वयि विश्वसिमि । अतस्त्वदुपरि एतावन्महद्भारम् उपन्यस्य यज्ञार्थं गन्तुमिच्छामि ।"

× × ×   × × ×   × × ×

एवमाश्वस्तः सन् देवशर्मा ग्रामान्तरं गतवान् । विपुलस्याध्ययने तु सामयिको विरामः। गुरुपत्नी युवती, रूपवती च । सर्वोपरि परपुरुषप्रलुब्धा, कामासक्ता च सा । गुरुभारो विपुलस्य । दुःखं न्यासस्य रक्षणमित्यद्यैवानुभवति विपुलः ।

पक्षान्तरे रुचिरात्मानं बन्धन-विमुक्ता मनुते । बहुप्रतीक्षिता मुक्तिरद्य तस्याः हस्तगता । साप्येतदेव न जानाति यत् कस्यचिद् ब्रह्मचारिणः सूक्ष्मेक्षिकाद्यापि तामनुसरति ।

अनतिदूरे कुटीरस्य रमणीयं सरः । प्रियमिलनोत्सुका रुचिः । मुहूर्त्तमिव नेष्यति दिवसान् इति च मनोभावस्तस्याः । स्नानार्थं जलाशयमुपसर्पति । सानन्दं जले सन्तरति, जले च क्रीडति । स्वयमेव हसति, स्वच्छन्दमनुगुञ्जति । किमप्यस्पष्टं गायति । अहो ! मन्दगतिरद्य

दिनस्य । शनैः शनैरतिक्रामति । अद्यापि नोपगता सन्ध्या, तस्याः मिलनवेला ।

स्वभावचञ्चला रुचिः । पुरन्दरप्रीत्या तु तडिदिव चञ्चलाद्य सा । अत्यन्तं दुर्वारा । केनोपायेन सा वारयितव्या इति महती चिन्ता । विपुलस्य अग्रे च कठिनपरीक्षा ।

आसन्नप्राया सन्ध्या । दीपालोकेन ईषदालोकितं कुटीरप्राङ्गणम् । कुटीराभ्यन्तरे काचिद् यौवनमयी प्रतिमा प्रसाधनरता । साक्षात् कामनयोत्तप्तम् अयःपिण्डम् । प्रियगतप्राणा । पूर्णसमाधिः । अव्याहता चैकाग्रता । विस्मयाहतः, ईषद्भीतश्च विपुलः प्रच्छन्नतया तामेव विलोकयति । तस्य सूक्ष्मदृष्टिः सततमनुसरति तस्याः कार्यकलापम् । छायावद् गुरुपत्न्याः सुरक्षायां दत्तावधानस्तामेव संपश्यंस्तिष्ठति ।

धरापृष्ठेऽवतीर्णा सन्ध्यादेवी । सुसज्जिता सा कृष्णवाससा । मण्डिता च प्रकृति-प्रदत्तैः सान्ध्पुष्पैः । गन्धामोदसौरभेण सुरभितं कुटीरपरिसरम् । मन्दं वहति मदालसः पवनः ।

किमेतत् ? घनान्धकारे कस्येमां दीर्घच्छायां पश्यति विपुलः ? कुटीरस्य क्षीणालोकेन शनैरस्पष्टाभवत् सा छायामूर्त्तिः । भवेत् कश्चिद् वपुष्मान् अभिसारः । किमसौ सः पुरन्दरः यस्य प्रेम्णि पथभ्रष्टा गुरुपत्नी ?

व्यतिव्यस्तः विपुलः । तत्प्रदत्तायाः प्रतिश्रुतेश्च अग्निपरीक्षा । प्रतिज्ञां व्यर्थयितुं समस्तशक्त्या सज्जीभूतः पुरन्दरः । मायां प्रसार्य बहिस्तिष्ठति । किंकर्तव्यविमूढो विपुलः । किमिहाचरणीयम् । मुहूर्त्तेनैव गुरुगृहस्य सञ्चितपुण्यानि विनश्य कुलगोत्रयोर्मानदीपं निर्वापयित्वा पलायिष्यते चैषा छायामूर्त्तिः । काममाया प्रतिहन्तव्या इति स्थिरप्रतिज्ञा विपुलस्य । पुरन्दरः अभिसारयितव्य इति चोद्दामस्वप्नः गुरुपत्न्याः । अथवा नैषः स्वप्नः । उच्छलं स्रोतः । उत्कूला वन्या । न कदाप्यवरोद्धं शक्यते ।

सप्तपर्णीतरुतलेऽस्थिरश्छायादेहः । शनैः शनैरपसरति तमश्चन्द्रिकया । दुग्धालोकेनालोकितं कुटीरप्राङ्गणम् । किं पश्यति विपुलः ? दीपः

निर्वापितः । प्राङ्गणे दण्डायमाना गुरुपत्नी रुचिः । गन्तुमुद्यता सा परितो दृष्टिं प्रसारयति । न जानाति विपुलस्योपस्थितिम् । परिसरं निर्मक्षिकं दृष्ट्वा छायामूर्तिम् उद्दिश्य हसति । देवशर्मणः परोक्षे तं विहसति । तस्य कुटीरञ्च उपहसति ।

हतवाक् विपुलः । विवक्षोरपि तस्य वाक् न स्फुरति । कश्चित् तस्य पश्चजिह्वाम् अपकर्षति । जडवत् स शरीरमात्रेणैव प्राङ्गणमवतरति । मनस्तु निष्क्रियं कयापि स्वाभाविकप्रेरणया । झटित्याविर्भवति गुरुपत्न्याः सम्मुखे । स्तम्भिता रुचिः । सफलयात्रायाः कैषा विफलता ? सचकिता विपुलं पश्यति रुचिः ।

—"विपुल ! त्वमिह ?"

विपुलो निर्वाक्, निश्चलः । निस्पन्दः केवलं पन्थानमवरुध्य तिष्ठति । शठप्रेमिकस्य माया दूरीकर्तव्या । गुरोरादेशः पालनीय इति च तस्य प्रतिज्ञा गुरोः सविधे । स्वशिष्यजीवनस्य विलक्षणा चेयं परीक्षा अत्यन्तं महत्त्वं वहति । विपुलं धिक्करोति रुचिः ।

—"गुरुनिर्देशेन त्वमत्रोपागत इति जानाम्यहम् । अत्र ते सर्वथाऽमङ्गलं पश्यामि । मम मार्गे बाधको न भवतु । अन्यथा दुष्परिणामस्ते हस्तयोः लगिष्यति ।"

नतशिरस्तिष्ठति विपुलः । काममायातः गुरुपत्नी रक्षणीया । यथेच्छं शपतु गुरुपत्नी । उन्मनां तां कथमपि प्राङ्गणाद् बहिर्गन्तुं न दास्यति सोऽद्य । छलनया रूपान्तरिता विपुलस्यान्तःप्रतिज्ञा । कोपात् प्रणयः । अनुरक्त्या पश्यति रुचिम् ।

कमिमं पश्यति रुचिः ? किमेष विपुलः ? अनिन्द्यसुन्दररूपवान् । प्रेमविह्वलः प्रेमिकः । प्रणयानुरक्तो युवा । स्फुरदोष्ठयोः पिपासा । ज्वलत्-चक्षुषोर्बुभुक्षा । पुरतः प्रेमदेवी । विनयावनतश्च दण्डायमानः कश्चित् प्रणयप्रार्थी । तूष्णीं स्थित्वा प्रियायै प्रेमभिक्षां याचते—
—"किम् ? अस्ति काचिद् विवक्षा ?"

परिवर्तनं रुच्याः स्वरे। प्रेम्णा चार्द्रीभूता स्वरयन्त्रिः। ममत्वं वचनशैल्याम्। अनुरक्तिः वक्तुं प्रेरयति कण्ठस्य पृष्ठतः।

—"रुचि ! नाहं गुरुभक्तः। अहं तु भवत्याः दासोऽस्मि।

किमेतत् प्रलपति विपुलः। अपूर्वसम्बोधनम्। ननु सत्यमेतदथवा स्वप्नम्। स्वस्मिन् अविश्वासः रुच्याः।

—"विपुल !"

—"आम् रुचि ! त्वद्भक्तोऽहम्। अहं तव रूपस्योपासकः।"

स्तम्भिता रुचिः। आत्मानं न विश्वसिति। प्रेमाप्लुतं तस्या-श्चित्तम्। वेपथुश्च शरीरे। अङ्गे च रोमहर्षः।

—"किम् मद्भक्तोऽसि ? किमहं सम्यक् शृणोमि ?"

—"आम् रुचि ! सत्यम्। त्वमेव मे जीवनस्य प्रेरणा। त्वमेव मे प्रथम-प्रणयः। आश्रमेऽस्मिन् बहूनि मे दिनानि व्यतीतानि। नीरसमिमं पाठ्यपुस्तकं विहाय न किमपि दृष्टमद्यावधि। अपूर्वेयं सृष्टिरीश्वरस्य। सुन्दरं सर्जनम्। यौवनं मे चीत्करोति। व्यर्थश्च यापितः कालः। अद्य त्वयैवाहं जागरितः। इदानीमहमनुभवामि यत् कामनायामप्यानन्दः। त्वमेव मे कामनाया अग्रदीपम्। स्वप्नालोकस्य चाग्रशिखा। त्वदृते व्यर्था मे सकला तपश्चर्या।"

आवेगाश्रू विगलति काममोहितयोः रुच्याः नयनयोः। किं सा पश्यति ? मरुभूमौ, ज्वालामयजीवनस्य इयति निकटे आसीदेतत् स्निग्ध-मुपवनम्, सुशीतलो झरः।

दीर्घं निःश्वसिति रुचिः। नयनयोः कामाग्निः। कण्ठे च जडता। हृदये बलवती प्राप्त्याशा।

—"तर्हि त्वं किमिच्छसि विपुल !"

—"त्वां, त्वामेव कामये रुचि !"

—"विपुल !"

काममोहिता रुचि: विपुलं गाढमालिङ्गति । चुम्बति चाधरयो: । विपुलस्य बलिष्ठदेहस्पर्शाद् आत्मानं विस्मरति ।

सप्तपर्णीतरुतले प्रकंपिता छायामूर्त्ति: । आहत: पुरन्दर: । मायान्तरेण पराभूता तस्य माया । अपमानिता तस्य प्रतीक्षा । लाञ्छिता च तस्य देवशक्ति: । रुचिस्तु अनभिज्ञा । न गणयति कस्योपस्थितिम् । एवं कुपित: पुरन्दर: स्थानं परित्यज्य प्रतिन्यवर्तत कुटीरपरिसरात् । यावद्-दूरे प्रणष्ट: पादशब्द: पुरन्दरस्य तावत् शीतलीभूत: विपुल: । श्लथी-कृतं चालिङ्गनम् । रुचिम् आलिङ्गनाद् विमोच्य निवेदितवान्—

—"क्षम्यताम् भवती !"

—"साम्प्रतं किमेष: वृथाप्रसंग: ! कथमियं शीतलता ?"

—"सफलकामोऽस्मि इदानीम् ।"

—"किदृशस्तेऽभिलाषो विपुल ! कथमयमभिनय: ? किं मामेवावरोद्धमेषा ते शीतलस्पृहा ? किमर्थं कुण्ठितस्ते वक्षनि:श्वास: ?"

निरुत्तरो विपुल: । तावद् यज्ञस्थानात् प्रत्यागत आचार्यो देवशर्मा । तमुपगम्य प्रणतिपुर:सरं सावेगं न्यवेदयत् विपुल:—

—"आचार्य ! पराभूता चाद्य काममाया । सुरक्षिता च मया दत्तप्रति-श्रुति: ।"

प्रायश्चित्तम्

आदिवसं अस्थिभङ्गपरिश्रमं कृत्वा कलान्तः स्वपिति सनिआ (सनातनः) । वैशाखीयनिदाघे हलं कृत्वा क्लान्तं, श्रान्तं च तस्य शरीरम् । परेद्युः प्रातरेव ग्रामाद् दूरस्थं क्षेत्रं हलं गृहीत्वा गमिष्यतीति चिन्तया सः सावधानतया सुप्तवानासीत् । परन्तु एतावत्कालं यावत् स्वपिति सः । गृहेऽपरः कोऽपि सदस्यो नास्ति यस्तं समयेन शय्यात्यागाय सूचनां दद्यात् । न कश्चित् तस्याग्रे, न वा कश्चित् पश्चादस्ति । तस्य मृत्यौ अपि न कश्चिद् अश्रू वाहयितुं वर्ततेऽस्मिन् संसारे । स्वजन्मनो दशमे वर्षे तस्य पितरौ परस्परमन्विष्य परलोकं प्राप्तवन्तौ । सनातनस्य कृते कृषिभूमेः प्रादेशमात्रमपि न त्यक्तवन्तौ गमनसमये । गृहपरिसर एवासीत् तस्याचलसम्पत्तिः । दशवर्षीयस्य सनातनस्य कृते परवृत्तिं विना उपायान्तरं नासीद् उदरभरणाय । स ग्रामवासिनां गाः चारयित्वा यथा-कथमपि जीविकामुपार्जितवान् तदानीम् । प्राप्ते तु संज्ञानेऽसौ तिआ-डि-महाजनस्य गृहे कृषिकर्माणि कर्तुम् आत्मानं न्ययोजयत् । तेन सः पूर्वा-पेक्षया किञ्चिदधिकमुपार्जयितुं सक्षमोऽभवत् ।

सनिआ जात्या सवर्णः, प्रकृत्या च परिश्रमी । कार्यहीनः हस्तपादा-वाकुञ्च्य गृहे उपवेष्टुं न जानाति सः । तस्य कृते कदापि वृत्तेरभावो न भवति । यस्य कस्यापि गृहे सेवकत्वेन नियुक्तो भवति तस्य कृषिकार्यं, गृहकार्यं च सुचारुरूपेण निर्वाहयति । स्वीकृतायां च वार्षिकवृत्तौ, भोजनपरिधानेऽपि तस्य विना मूल्येन सुलभे भवतः गृहस्वामिकृपातः । तदर्थं सः स्वेच्छया रात्रौ, प्रातश्चाधिकं किञ्चित् कार्यं सम्पादयति स्म । येन गृहस्वामिनः हानिरपि न स्यात् । एवं तस्य वार्षिकवेतनं तु सर्वथा सुरक्षितं तिष्ठति स्म । तद् व्ययीकर्तुं तस्यावश्यकतैव नासीत् । केषुचन वर्षेषु तस्य किञ्चिद् उल्लेखयोग्यं धनसञ्चयमभवत् । विगते सम्वत्सरे तेन–"एकर"–परिमिता गोचरभूमिः स्वल्पमूल्येन क्रीता । ऐषमोऽपि दश 'देसिमल'–परिमिता तादृशी भूमिस्तेन क्रीता । स्वपरिश्रमबलेन तां च गोचरभूमिं सः कृषिभूमौ परिवर्तितवान् कियता कालेन ।

शनैः शनैः सनातनस्य महत्वाकाङ्क्षा आकाशमस्पृशत्। स स्वस्य क्षेत्रे स्वयं कृषिं कर्तुं चिन्तितवान्। भगवतोऽनुग्रहात् तत्सविधे क्षेत्रं किञ्चित् स्वकीयं वर्तते एव। किञ्चिदपरस्य क्षेत्रं 'भागं' करिष्यति चेदुपार्जनं सम्यग् भविष्यति, येन सः स्वभविष्यन्निर्मातुं शक्नुयात्। तस्य विवाहवयोऽपि सञ्जातमस्ति इत्यवसरे। तस्यैतादृश्यां स्थितौ जगुसामलस्तस्य सहायतां कर्तुं प्रस्तुतोऽभवत्। द्व्येकर-परिमितां भूमिं भाग-रूपेण कर्षितुं दत्तवान्। अन्यच्च, एकं बलीवर्दमपि तस्मै प्रदत्तवान् येन सः एकमपरं बलीवर्दं क्रीत्वा, अथवा कस्यचिद् अपरस्य एकं बलीवर्दं गृहीत्वा क्षेत्रं कर्षितुं शक्नुयात्।

सनिआ अतीव प्रसन्नोऽभवत् यत् सः स्वकृषिं स्वयं करिष्यति। स्वस्य पद्भ्यां दण्डायमानः, स्वाधीनश्च भविष्यति। तस्यैव ग्रामस्य नुखरी-नाम्नीं पितृहीनां युवतीं परिणेष्यति। कल्पनायामपि विवाहशब्दस्तस्य मनसि अपूर्वपुलकमजनयत्।

सनिआ कृषिं करिष्यतीति उदन्तः ग्रामवासिनां कृते तादृशः सुखदो नासीत्। विशिष्य तिआडिमहाजनस्य कृते। तं चाधिसंख्याकाः ग्रामीणः ईर्ष्याग्रस्ता अभवन् एतं वृत्तान्तं श्रुत्वा। जगुसामलं विहाय न कोऽप्यपर-स्तस्य सहायतां विधातुं तत्परः, प्रस्तुतो वासीत्। जनानामीदृशः स्वभा-वश्चेत् ते कथं वा स्वबलीवर्दं सनातनाय दद्युः। अपरमपि बलीवर्दं क्रेतुं सनातनस्य क्व वा सामर्थ्यम्? भूमिक्रये तु तेन सकलं सञ्चितं धनं व्ययीकृतम्। को वा निर्धनाय तस्मै ऋणं प्रयच्छेत्? अन्ततो गत्वा किंकर्तव्यविमूढः सः मात्रा सुरक्षितानि कानिचन कांस्य-ताम्रपात्राणि मागुणिस्वामिनः (स्वाईं) गृहे बन्धकं दत्वा किञ्चिद् धनं गृहीत्वा एकं वृद्धं बलीवर्दं क्रीतवान्।

रात्र्या अन्तिमे प्रहरे तिआडिमहाजनः शौचनिवृत्यर्थं बहिःप्रान्तं गतवानासीत्। एतत्तु तस्य दैनन्दिननित्यकर्मस्वन्यतमम्। एकहस्तेनोदरं धृत्वा अपरस्मिन् हस्ते च कांस्यजलपात्रं गृहीत्वा प्रतिदिनं स धावन्निव गच्छति शौचनिवृत्त्यर्थम्। तदानीं सः कुत्रापि न पश्यति। वायुविकारेण सः वृद्ध पीडितोऽस्ति इति तस्य गृहस्था अन्ये सदस्या अत्र, तत्र वदन्ति स्पष्टीकरणार्थम्। परन्तु यदा शौचत्यागात् परं प्रतिनिवर्तते स

सप्ततिवर्षीयो वृद्धः, तदा तस्य दृष्टिस्तु पारावतस्य दृष्टिरिव अतीव सूक्ष्मा, तीक्ष्णा च भवति स्म । चतुःपार्श्वं दृष्ट्वैव सः प्रत्यागच्छति । तद्दिनेऽपि सः प्रत्यावर्तनसमये प्रतिदिनमिव सार्वजनीनग्राम्यतडागे जलपात्रं सम्मार्ज्य, हस्तपादौ च प्रक्षाल्य, यज्ञोपवीतं किञ्चिद् आर्द्रीकृत्य—अङ्गुलिद्वारा स्वमस्तके जलसिञ्चनपूर्वकं "विष्णवे नमः" इति पञ्चाक्षरमन्त्रमुच्चारितवान् । अञ्जलिमात्रस्य शीतजलस्योदरे लेपनानन्तरं किञ्चिद् आश्वस्तः सन् स वृद्धो यदा स्वगृहं आगच्छन्नासीत् तदाऽपश्यत् यत् सनातनस्य गोगृहे नवीनतया क्रीतस्तस्य वृद्धबलीवर्दः मृतवत् पादान् प्रसार्य स्वपिति । किञ्चित् सन्देहो जातः वृद्धस्य मनसि । अप्येषः बलीवर्दः स्वपिति, अथवा मृतोऽस्ति ? परीक्षणाय वृद्धस्तस्य बलीवर्दस्य लाङ्गूलम् आकृष्यापश्यत् यत् तस्मिन् स्पन्दनमपि न भवति । सन्देहस्य पूर्णनिराकरणार्थं नासास्पर्शपूर्वकं तेन पुनः परीक्षणमपि कृतम् । अन्ततः अनुभूतञ्च तेन यदसौ वस्तुतः मृतोऽस्ति । मृतबलीवर्दस्य गलायां बन्धनरज्जं दृष्ट्वा सः समस्तशक्त्या चीत्कारं कृतवान्—

—"कः कुत्रास्ति ? शीघ्रमागच्छ । सनातनेन गोहत्या कृता । असौ महापापो वर्तते । गोहत्यां कृत्वा निश्चिन्तं स्वपिति दुष्टः, श्यालकः । गोदेवतां पोषयितुमसमर्थश्चेत् पालने स्पृहा किमर्थम् ?" वृद्धस्य तादृशं विश्वरूपं कः नियन्त्रयिष्यति ? तस्य शरीरे तु शतसिंहस्य बलं तदानीम् । "गुण्डि"-(मादकपत्रचूर्ण) नलिकातः किञ्चत् चूर्णं मुखे निक्षिप्य पङ्गुवत् चलन् सः यं यं पथि पश्यति तमेतां सूचनां दातुं न विस्मरति— "चण्डालेन सनातनेन गोहत्यारूपं महापापमाचरितमिति" ।

पश्यन्नेव सन्देशोऽयं ग्रामे प्रसारितोऽभवत् । ग्रामस्याबालवृद्धवनिता सर्वे सनातनस्य मुक्तगोशालायामेकत्रिता अभवन् । ग्रामवासिनां कृते एषैका महती घटना वर्तते । गोहत्या महापापम् । सप्तजन्म यावत् नास्त्युद्धारः गोहत्याकर्तुः । नरकमेव तस्यान्तिमं शरणम् । निर्दोषः गौः । तस्य सेवां कर्तुमसमर्थश्चेत् न पालनीयः । धर्मवैशाखे तु गोहत्यायाः पापमधिकं भवति । सनिआ चण्डालोऽस्ति । वैशाखमासस्योत्तप्तनिदाघेऽप्यसौ त्रिप्रहरं यावत् हलं करोति । एवं समग्रां गोजातिं प्रति महदत्याचारं तस्य । पशुजातिः, वक्तुं न शक्नोति । अतः पर्याप्तखाद्यमदत्वैव तेषां शोषणं करोत्यसौ चण्डालः । तदर्थं प्रायश्चित्तमवश्यं करणीयम् ।

कपाटे कस्यचित्तीव्रकराघातेन सनातनस्य निद्रा भग्ना। चक्षुरुन्मिल्यापश्यत् यत् तावद् गवाक्षेन आतपमागतं तस्य गृहं प्रति। त्वरया कपाटमुद्घाट्य शंकाग्रस्तोऽभवत् सनिआ। किमर्थमेतावन्तः जनाः समवेताः सन्ति ? सनिआं दृष्ट्वा मौनाश्च सर्वे केवलं परस्परस्य मुखान्यपश्यन्। सनातनस्य सन्देहो गुणीभूतः। किञ्चिदघटनं घटितमस्तीति अनुमितवान्।

"किं जातम् ? भवन्तः किमपि न वदन्ति किमर्थम् ?" सनातनस्य कण्ठे व्याकुलता।

"किमन्यद् भविष्यति ? हलं गृहीत्वा क्षेत्रं गच्छतु। कृषिं करोतु।" तिआडिमहाजनस्य कण्ठे व्यङ्ग्यम्। अन्ये च नीरवाः। सर्वे केवलं तस्य गोगृहमेव पश्यंतस्तिष्ठन्ति। जनानां सङ्केतमवगत्य सनातनः वेगेन स्वगोगृहं प्रविष्टवान्। तत्रत्यं दृश्यं दृष्ट्वा तस्य पादतलस्य मृत्तिका क्षरितुं प्रारभत। यथा कश्चित् तस्य पादौ गृहीत्वाकर्षतीति तेनानुभूतम्। स तत्रैव गोमयोपरि सशब्दमुपविष्टवान्। चतुर्दिक्षु अन्धकारमाच्छन्नं तस्य कृते। तस्मिन्नन्धकारे सोऽपश्यत् यत् सर्वाश्च आशास्तस्य जलवत् तरलाः भवन्त्यनुक्षणम्। स्वप्नस्तस्य शून्यायते। तस्याज्ञाने एव धारद्वयं लोतकं तस्य गण्डद्वयं सम्भिद्याधः पतितवान्। यदि कोऽपि तत्र नाभविष्यत् तर्हि सः कदाचित् अरोदिष्यत्। यथाकथमपि तेन स्वव्याकुलभावः अन्तर्मुखीकृतः ग्रामवासिनां समक्षम्।

तस्य स्वकीयकृषिकर्मणः स्वप्नः स्वप्ने एव मृतः। पक्षान्तरे गण्डस्योपरि व्रण इव ग्रामवासिनामत्याचारः—"त्वया गोहत्या महत्पापमाचरितम्। तदर्थमवश्यं प्रायश्चित्तं करणीयम्। प्रायश्चित्तार्थं द्वावेव पन्थानौ भवतः समीपे। प्रथमस्तावद् ग्रामदेवत्याः पतितोद्धारिणी-त्वेशः कर्तव्यः। ततः ब्राह्मणभोजनं, ग्रामवासिभोजनं, सुवर्णदानमपि करणीयम्। ततः पुरुषोत्तमक्षेत्रं गत्वा जगन्नाथदर्शनपूर्वकं पञ्चभिर्ब्राह्मणैः सह "अवढा"-भोजनं कर्तव्यम्। जगन्नाथदेवस्य प्रसादमानीय ग्रामे च वितरणीयम्। अन्ततः गोमयं पीत्वैव त्वमस्माकं समाजे, स्वजात्याञ्चागन्तुं शक्नोति। अन्यथा मृतबलीवर्दस्य रज्जुं गलायां बद्ध्वा, दन्तेषु शुष्कतृणं धृत्वा, मौनव्रतमाचर्य षण्मासान् यावत् ग्रामाद् ग्रामान्तरमटन् भिक्षा याचनीया। अनयोः प्रायश्चित्तयोः यत्तुभ्यं रोचते तत् समाचर।"

सनातनाय प्रायश्चित्तमार्गं प्रदर्श्य सर्वे ग्रामवासिनः स्वगृहं गतवन्तः ।

× × ×   × × ×   × × ×

दिवसस्य द्विप्रहरे जनाः सनातनं भिक्षापात्रेण सह तिआडिमहाजनस्य द्वारे अपश्यन् । परिधानं शुभ्रा धोतिः,तथोत्तरीयम् । मृतबलीवर्दस्य बन्धनरज्जुः गलायां, दन्तेषु च शुष्कतृणम् । ग्रामस्य सर्वे बालास्तत्परितः भ्रमन्ति यथा कश्चिद् वैहासिकः आगतोऽस्ति । वृद्धः तिआडिमहाजनः व्यङ्ग्यपूर्णं स्मितहासं विहस्य, मादकपत्र-चूर्णं मुखे निक्षिप्य सनातनमुद्दिश्यावदत्—

"सनातन ! मन्ये त्वं स्वक्षेत्रे कृषिकर्म सम्पादयितुं न शक्नोसि । गौः, कन्या, भूमिः एतत् सर्वं प्रतिकूले भाग्ये न सम्भवति । प्रायश्चित्तानन्तरमागामिनि वर्षे मम गृहे सवेतनस्तिष्ठतु । अहं मत्पुत्रं धनिरामं परामृश्य तव पूर्ववेतने पञ्चाशद्रूप्यकाणि वर्द्धयिष्यामि । अथवा स्वक्षेत्रं मत्पार्श्वे बन्धकं दत्त्वा, प्रायश्चित्तार्थमपेक्षितं धनं च गृहीत्वा पुरुषोत्तमक्षेत्रं गच्छतु । तेन स्वल्पेनैव कालेन गोहत्यामहापापान्मुक्तो भविष्यति । मद्गृहे वार्षिकवृत्तिं कृत्वा यदुपार्जयिष्यति तेन ते क्षेत्रमपि बन्धकमुक्तं भविष्यति । अथवा स्वक्षेत्रं विक्रीयैव एतत् सर्वं सम्पादयतु येनाजीवनं मद्गृहे वृत्तिं कृत्वा मुक्तविहंगवद् विचरिष्यति । शिरः सञ्चालनपूर्वकं स्वस्वीकृतिप्रदानसमये सनातनश्चिन्तयन्नासीत्—"किं मे बलीवर्दः स्वयमेव मृतोऽथवा मां पीडयितुं केनापि मारितः ?"

निरुद्दिष्टहृदयम्

कथां लिखितुमहं न जानामि। तथापि कथालिखने मेऽदम्या प्रवृत्तिः। किमर्थं जानन्ति ? मन्ये स्वकीयमसामर्थ्यम् उपहसितुम्। कथां लिखामीति तु सत्यम्, किन्तु लेखनं कुत्रारभ्य कुत्र समापयामीति स्वयमपि न जानामि। तथापि न त्यजामि कथालेखनम्। किमर्थं जानन्ति ? लेखन-व्यवसाये कथालेखनस्याधिकं महत्त्वमस्तीति मया श्रुतम्। न जाने एतत् सत्यमुत मिथ्या, परन्तु मम तु एकैव धारणा वर्तते यत् कवितापेक्षया कथां लिखित्वा लेखकस्त्वरितमेव प्रतिष्ठितो भवितुमर्हति लेखकसमाजे। कथा-लेखकः पाठकेषु विशेषतयादृतो भवतीति तथ्यस्य पाठका एव प्रमाणम्। न जाने ममैष दुर्गुणोऽथवा सुगुणः। अहं किन्तु प्रायः प्रतिष्ठायै लालायित-स्तिष्ठामि। अतः मयि प्रतिभाऽस्तु न वाऽस्तु तदविगणय्याहं कथां विलिख्य संचिकायां संचिनोमि। मन्येऽहं भाग्यवानस्मि यदहमद्यापि कुमारः। अन्यथा तासां कथानां निरापदस्तित्वे प्रश्नचिह्नमलगिष्यत्। कदाचित् प्रसंगानुरोधेन कोपाविष्टा सा मे श्रीमती ससंचिकास्ताः कथाः प्रज्वाल्य चायनिर्माणमकरिष्यत् प्रतिशोधेच्छया।

एतावता पाठकाः स्वत एवानुमीयुः लेखकत्वेनाथवा विशिष्य कथा-कारत्वेन मे स्थानं कुत्र संस्थापनीयम्। परन्तु मम दौर्भाग्यं पश्यन्तु—एकदा मम कश्चिद् निकटतमो बन्धुः ममावासमागत्यावादीत् "नूतनतयाहं कस्याश्चित् साहित्यपत्रिकायाः सम्पादनं चिकीर्षामि। बह्व्यः कविता-स्तदर्थं हस्तगताः सन्ति। कथानां संख्या तु नगण्या। अतः भवान् एकां कथां प्रयच्छतु। भवतः कथानां महानादरः पाठकेषु इति वयं जानीमः।'

एतत् श्रुत्वाहं चकितोऽभँवम्। अहं कथां लिखामीति तु सत्यं परन्तु कथाकारेषु परिगणितोऽपि भवामीति इदंप्रथमतया शृणोमि। वस्तुतोऽहं स्वकथाम् अन्येषां सम्मुखं पठितुमपि बिभेमि। परन्तु पाठकेषु मत्कथाना-मादरोऽस्तीति श्रुत्वा अवचेतनमनसि किञ्चिद्गर्वितोऽप्यभवम्। यद् वा

भवतु, संसारेऽस्मिन् यशोलिप्सोः मादृशस्य लेखकस्यापि प्रशंसकाः भवन्ति । मनसा स्वयमेव आत्मानमभिवादनं ज्ञापितवान् । उपरि, उपरि तु स्वव्यस्तताछलेन कथाप्रदाने स्वकीयासामर्थ्यमपि निवेदितवान् । परन्तु स त्वात्मप्रतिज्ञायामचल आसीत् । मत्कथां गृहीत्वैव गमिष्यतोति व्यज्ञापयत् बन्धुत्वाधिकारम् । अंततो गत्वा मया पराजयः स्वीकृतः । काञ्चित् कथामनन्तरं प्रेषयिष्यामीति प्रतिश्रुतिं दत्वा सुहृदे विदायं ज्ञापितवान् । ततः प्रभृति प्राचलत् मे सञ्चिकान्वेषणम् । स्वलिखितासु अशीति-संख्यकासु कथास्वेकाऽपि मे मनो.नास्पृशत् यामहं प्रकाशनाय दद्याम् । अतः मया चिन्तितं यत् कामपि नूतनामेव कथां लिखित्वा प्रेषयिष्यामीति । परन्तु कथावस्तु अन्विष्यापि न प्राप्तवान् । लेखन्यग्रं चर्वयित्वा बहु चिन्तितम् । परन्तु कश्चिद् विषय एव नागतो मनसि । अन्ततः, कामपि स्वस्मिन् घटितामनुभूतिमेव लिखिष्यामीति मनसा स्थिरीकृतम् । कदाचित् वानरनिर्माणाद् देवतानिर्माणमपि सम्भवेत् ।

× ×　　　　× ×　　　　× ×

तदानीं महाविद्यालये नूतनतया मे योगदानमासीत् । परन्तु तद् योगदानं छात्रत्वेन नासीद्, अपि त्वध्यापकत्वेन । तस्मिन्नेव दिने मद्जीवने विहितासु असंख्यत्रुटिषु एकसंख्यात्मकः क्रमांकः वर्द्धितः । अर्थात् जीवन-स्यापरा काचिद् भयङ्करा त्रुटिराचरिता मया । पाठकाः कदाचिद् अन्यथा चिन्तयेयुः । किं योगदानस्य प्रथमे एव दिवसे त्रुटिः । आम्, सत्यम् । महाविद्यालये मम नियुक्तेः प्रथम एव दिवसे हृदयं मे निरुद्दिष्टं जातम् । भवतामपि विषयेऽस्मिन् स्वीयः कश्चिदनुभवः स्यात् । वस्तुतो यद्येकवारं हृदयं निरुद्दिष्टं भवति तर्हि तस्यान्वेषणं तीव्रकष्टकरं भवति । परन्तु मन्ये अंगारः शतधौतेन मलिनत्वं न त्यजति इत्याभाणकस्योदाहरणं भवितुमहं नितरां योग्योऽस्मि । जीवनेन सह क्रीडनेऽपि मम कौतुहलं बाल्यकालादेवास्ति । कदाचित् मम पाठकाः मामभिक्रुध्येयुः यदसौ स्ववक्तव्यं सरलभाषयानुक्त्वा वक्रपन्थानमवलम्ब्य गौरचन्द्रिकां विस्तारयति । अस्तु महाशयाः ! यावद् भवन्तः विरक्त्या मम लेखस्य पठनाद् विरमेयुस्तस्मात् प्रागेवाहं मत्कथामवश्यं प्रारप्स्ये ।

1998 ख्रीष्टाब्दः, जनवरीमासस्योनविंशदिनांकः । पूर्वाह्णस्य एकादशवादनोत्तरं सप्तदश-"मिनिट", अष्टपञ्चाशच्च "सेकेण्ड" ।

जीवनस्याविस्मरणीयमेतद् दिनम् । अन्यथा घंटासूचीं, मिनिट-सूचीं, सेकेण्डसूचीं च दृष्ट्वा पाठकान् नाव्यथयिष्यम् ।

अस्मिन्नेव दिने तां भद्रमहिलां महाविद्यालयपरिसरे कस्याञ्चित् माहेन्द्रवेलायामपश्यम् । "अपश्यमि"त्यतश्चक्षुर्भ्यामपश्यमिति न चिन्तनीयम् । तत्र षट्चक्षुषां मिलनमजायत । पाठकाः न क्रुध्येयुः । यद्यपि हास्यास्पदं तथापि तथ्यात्मकं मे मन्तव्यम् । तस्याः द्वे चक्षुषी, प्रतिचक्षुर्भ्यां सह मम च चत्वारि चक्षूंषि । षट्चक्षुषां मिलनात्परं मम या दुर्दशाऽभवत् सात्ववर्णनीयास्ति । भद्रमहिला विवाहिता, अविहिता वेति ज्ञातुं कुत्र मे समयः ? तां प्रति असंवैधानिकतयाकण्ठमासक्तोऽभवम् ।

इदृशी घटना मत्कृते नूतना नासीत् । जीवने कति भद्रमहिलाः, अभद्रमहिलाश्च प्रति सज्ञानेनाज्ञानेन वाहम् आसक्तो जात इत्यस्य गणनैव मया न कृता । परन्तु आसक्त्यामपि तारतम्यं भवति किल ? पूर्वासक्त्यपेक्षया अद्यतनीयासक्तेः मात्रा किञ्चिदधिकमासीदित्यनुभूतम् । अत एवाकण्ठमिति लिखामि । अन्यथा आपदाम्, आजानु अथवा आकटिरिति अलेखिष्यं कदाचित् । "पूर्णे तूदरे यावन्ति नाट्यानि" इत्यस्याभाणकस्य सत्यता मयि परिलक्षितुं शक्यते ।

न जाने एतत् सौभाग्यं मम अथवा भवतां, सा भद्रमहिला त्वविवाहितैवासीत् । क्षम्यताम् । ताम् अविवाहितामिति ज्ञात्वापि "भद्रमहिला" इति लिखामि । भवतां समाजे अविवाहितानां कृते "भद्रमहिला" इति सम्बोधनं न कदापि संगतं भवतीति अहं जानामि । परन्तु किं करोमि ? विवशोऽस्मि । तस्याम् अभद्रता न कुत्रापि दृष्टा मया । को जानाति भवत्स्वनेकेऽपि मे सुदीर्घसरसवर्णनैः कदाचिद् आसक्ताः स्युः । यथा मोहासक्ताः, लोभासक्ताः, कामासक्ताः अथवा ईर्ष्यासक्ताः ।

किं भवन्तः आसक्तेर्लक्षणं जानन्ति ? अहमपि न जानामि । परन्तु लक्षणमज्ञात्वापि अहमभिज्ञातुं शक्नोमि तां तामासक्तिम्, आसक्तियुक्तञ्च पुरुषम् । परन्तु मा विभेहि । भवतामासक्तिमभिज्ञायापि अहमेतन्न प्रकटयामि क्वचित्, कदाचित् । भवतां सम्मानं स्वकीयसम्मानमिव पश्यामि । भवन्तोऽपि मामनुरूपदृष्ट्या पश्यन्तु ।

अत्र मे सुखद-संयोगं पश्यन्तु। मयि आसक्तेर्लक्षणानि यावन्न दृष्टानि, तदव्यवहितप्रागेव तानि सर्वाणि भद्रमहिलायां प्रथमत एव परिलक्षितानि। अत्र "अव्यवहित" -शब्दस्य प्रयोगं दृष्ट्वा पाठकाः न हसेयुः। कथायाः भाषाऽतिसरला भवतीति विचिन्त्य मध्ये, मध्ये क्लिष्टानां साहित्यिक शब्दानां प्रयोगं कर्तुं यतमानोऽस्मि। येनास्य सुसाहित्यत्वं सिद्ध्येत्। इदानीं यावदपि मया अस्याः कथायाः सरसं श्रुतिमधुरञ्च तथ्यं न श्रावितम्। भवत्कृते एतत् सत्यं मत्कृते तु मिथ्येत्यवैमि यद् भद्रमहिला शनैः शनैर्मयि अप्रीणात्। न जाने कथं, किमर्थं वा। क्षम्यताम्। शतचेष्टयाप्यहं मन्तव्यमिदमवरोद्धुं न शक्नोमि। यदि भवानवरोद्धुमिच्छति तर्ह्यप्यहं भवन्तमभिक्रुध्यामि। किं यदि कश्चिद् भवतां हिक्कां, ह्रासं, कासं, कण्डूयनं वावरोद्धुमिच्छेत् तर्हि भवन्तः क्रोधिताः न भविष्यन्ति ?

सा मयि अप्रीणात्। सम्भवतः सा न जानाति स्म यदहं कश्चिदखाद्योऽस्मि तथाकथितस्यास्य विकासशीलसमाजस्य चक्षुषि। परन्तु कश्चिदपदार्थ इति तु सा नूनं जानीयात्। यतो हि भद्राणां भवतु, अभद्राणां वा भवतु सर्वासां नारीणां दृष्टौ पुरुषः कश्चिद् अपदार्थोऽस्ति। क्षम्यताम्। भवत्सु यदि कश्चित् पत्नीव्रतः (पतिव्रतायाः पुंलिंगरूपं) भवेत्तर्ह्यहं नितरां दुःखितोऽस्मि। जीवनेऽहं प्रवृत्तिद्वयमवरोद्धुं न शक्नोमि–प्रातःकालीनं तडागजलं (शौचवेगं), मनस्यागतां वार्ताञ्च। शौचनिवृत्त्यर्थं मत्कृतेन 'तडागजल"मिति शब्दस्य प्रयोगेण कदाचिद् भवतां गलावरोधः स्यान्नाम। परन्तु जीवनस्यार्द्धाधिकं काल नगरेषु यापयित्वापि अहं शब्दमेतं त्यक्तुं न शक्नोमि। वस्तुतः, एतदर्थं कञ्चिद् रूचिकरं शब्दान्तरमेव मद्बुद्धौ नायाति लेखनसमये यस्याहं प्रयोगं कुर्याम्। एतत् शास्त्रीयशैलीविरहितं साहित्यं दृष्ट्वा भवन्तः कदाचित् मदीयसाहित्यपठनाद् विरता अपि भविष्यन्ति। परन्तु तेन किं मे छिन्नम् ? अहं कश्चित् सिद्धहस्तलेखको नास्मि येन मे प्रतिच्छविः प्रभाविता भविष्यतीति विचिन्त्य विभीयाम्। भवतामर्थबोधो भवतीति चेत् तेनैव मे साहित्यस्य सार्थकता।

इहापि भवतां सौभाग्यं, मम च दौर्भाग्यं पश्यन्तु। कतिपयदिवसानन्तरं सा भद्रमहिला मह्यमकुप्यत्। मम तु जीवनवार्तैव स्थगिता तेन। भगवती यदि दासानुदासेषु कृपाभावं न वक्ष्यति तर्हि मादृशानाम् अधम-

प्राणीनां का कथा ? भद्रमहिला सम्भवतः मां याथातथ्येन न गृहीतवती। अनर्थीकृतश्च तया मदीयः स्वाभाविको नीरवस्वभावः।

भवन्तः वदन्तु। किमहं तस्याः प्रेम अबुद्ध्वैव नीरव आसम् ? नहि, नहि। तथाहं वराको नास्मि। जात्या पुरुषोऽस्मि, अतः स्वाभाविकतया ईषदधिका वा मूर्खता तु स्थास्यत्येव (अन्ततः नारीणां दृष्टौ)। विश्वस्मिन्नस्मिन् विश्वे सर्वासां स्त्रीणां विचारे सर्वे पुरुषाः किञ्चिद् मन्दबुद्धयः सन्ति। ताश्च पुरुषान् यदा कदा "नलदीप" इत्याख्यया विभूषयन्ति।

अत्र पाठकानां कृते कस्यचित् स्पष्टीकरणस्यावश्यकताऽस्तीति अनुभूयते। मम नीरवतायां किं कारणमासीदिति वक्तव्यं खलु भवद्भ्यः ! अन्यथा पाठकानां कृतेऽयं छलनामयो व्यवहारो भविष्यति मम। वस्तुतोऽहं तां भद्रमहिलां किञ्चिन्नग्नां द्रष्टुम् अभीष्टवान्। पाठकाः लज्जया नतमस्तकाः न भवेयुः। अहं तथा निर्लज्जो नास्मि। नग्नशब्देन मम शारीरिकनग्नतायां तात्पर्यं नास्ति। अपि तु मानसिकनग्नतायाम्। मादृशः कापुरुषः एतादृशं दुःसाहसं कर्तुं कथं वा समर्थः स्यात् ?

अद्यत्वे भद्रमहिलायाः मया सह कादाचित्कं दर्शनमेव भवति। तां दृष्ट्वाहं नीरवः, मां च दृष्ट्वा सापि मौनवती। मां दृष्ट्वा तस्याः वक्रः पन्था। तां च दृष्ट्वा ममापि वक्राः पन्थानः। कदा सा अधोमुखी, कदा चाहमुर्द्ध्वमुखः। कदाहं विवक्षुः, सा च कदाचित् स्फुरितोत्तराधरा। अहं तथापि निर्विकारः। "हूँ" नास्ति, "हाँ" अपि नास्ति। परन्तु यद्यप्यविश्वास्यं तथापि तथ्यमिदं सत्यमस्ति यद् हृदयं मेऽद्यापि निरुद्दिष्टं वर्तते। तस्यान्वेषणे मम सामर्थ्यमपि नास्ति। किं भवन्तः स्वेच्छापूर्वकं साहाय्यं करिष्यन्ति ? अथवाऽहं न्यायालयस्य शरणमाश्रयिष्ये ? अथवा आकाशवाण्यां, दूरदर्शने वा विज्ञापयिष्यामि ? पुरस्कारं चोद्घोषयिष्यामि अनुसन्धातारमुद्दिश्य। शृण्वन्तु तावन्मम हृदयस्याभिज्ञानं, संकेतं च लिखन्तु स्वदैनन्दियाम्–पञ्चविंशतिवर्षीयं मे हृदयम्। धूमवर्णः, अर्द्धहस्तपरिमिता उच्चता। मध्ये, मध्ये मद्यपान-जनितानि, धूम्रपानजनितानि च कृष्णव्रणानि। भवत्सु कश्चिद् यदि मम हृदयस्य सन्धानं प्राप्स्यति तर्हि कृपया मत्पत्रसंकेतेनावश्यं सूचयन्तु, यथाघोषितं पुरस्कारं च स्वीकरोतु।

अतिथिः

समय आसीद् यदा अतिथीनामागमने जनाः सुप्रसन्नास्तेषां स्वागतं व्याहरन्त आसन्। परिवारस्य सर्वे सदस्याः सगर्वं, सामोदं च वदन्ति स्म —"अद्यास्मद्गृहेऽतिथिः समागतोऽस्ति।"

अद्यत्वे तु तथ्यमिदं मनः न स्पृशति। अर्थाद् वार्त्तैषा जीर्णा न भवति। अपि कश्चिद् अतिथीनामागमनेऽपि प्रसन्नो भविष्यति महार्घेऽस्मिन् युगे ? अतिथिस्तु सङ्कटस्य नामान्तरम्। अद्यतनीययुगे यदि कश्चिद् अनिच्छया अतिथीनां बलिः भवति, पक्षान्तरे अपरः विशुद्धवस्तुवादी सुदूरादागतमपि अतिथिं श्रीमतीद्वारा गृहे स्वानुपस्थितिविषयकं निर्ममसम्वादं श्रावयित्वा प्रत्यावर्तयति। प्रसन्नो भूत्वा च वदति—"येनैव पथागतोऽस्ति बन्धो ! पथा तेनैव प्रतिगच्छ"।

अतिथिशब्दस्य व्युत्पत्तिः "न विद्यते तिथिर्यस्य" इत्येवं क्रियते। अर्थात् अतिथिः स एव भवति यः आगमनतिथेः प्राक्-सूचनामदत्वैव उपस्थितो भवति। अयमेव शब्दः न केवलं संस्कृतभाषायामपि तु नैकासु भारतीयभाषासु प्रयुक्तोऽस्ति। शब्दस्यास्य अर्थसाम्यमपि सुरक्षितमस्ति सर्वासु तासु भाषासु। शब्दस्यास्यार्थबोधविषये विश्वकोशपरामर्शस्य आवश्यकतैव नास्ति। उपर्युक्तव्युत्पत्त्यनुसारम् अतिथिस्त्रिविधो भवितुमर्हति—

□ आगते ह्यत्यावश्यककार्ये प्राक्सूचनामदत्वैवागन्तुं यः विवशो भवति (एतादृगऽतिथिः अतिथिभेदप्रक्रियायामुत्तमकोटौ परिगण्यते)।

□ पूर्वनिश्चितेऽपि सकलकार्यक्रमे बन्धवे सुखदाश्चर्यं (वस्तुतोऽतिथिसेवकस्य तद् दुःखदाश्चर्यमेव भवति) प्रदातुं सूचनां विनैवागच्छन्ति (एतादृशः अतिथयः मध्यमकोटौ स्थानं प्राप्तुमर्हन्ति)।

☐ असत्सु कार्येष्वपि प्राक्सूचनामदत्वैवैते उपस्थिता: भवन्ति। सामान्यात् सामान्यस्यापि परिचयस्य अधिकादधिकं फलमिच्छन्त एते आतिथ्यकृद्भ्य: अवाञ्छितसाहाय्यं ग्रहीतुमपि पश्चात्पदा: न भवन्ति। एषामागमनार्थमावश्यककार्यस्यावश्यकता न भवति। अद्यतनीया: तथा-कथिता: अधिसंख्या: अतिथयोऽस्यामेव श्रेण्यामन्तर्भवितुमर्हन्ति (अतिथि-विशेषज्ञा: एतान् अधमकोटावेव स्थापयन्ति)।

एतत्सर्वमतिरिच्य अतिथिप्रभेदे चतुर्थोऽपि प्रकारो भवितुमर्हति। अवश्यमेतेषामतिथित्वस्वीकारे न भवति कश्चित् निजकृतो दोष:। यतो हि, एते विधिवत् सूचनाप्रदानपूर्वकमेवागन्तुं यतमानास्तिष्ठन्ति। परन्तु "डाकतार"-विभाग एतेषां पत्रं, "तारं" वा निरुद्दिष्टं कृत्वा बलादेतान् अतिथिश्रेण्यां स्थापयति। अत: व्युत्पत्त्या कृत्रिमातिथिश्रेण्यामेषां परि-गणनमुचितं प्रतिभाति।

अतिथिशब्दस्य सत्यामप्येतादृश्यां सार्थकव्युत्पत्त्यां यथाविधि: सूचनाप्रदानपूर्वकं ये पूर्वनिर्धारितकार्यक्रमानुसारं यथाकालं, यथास्थलं चोपस्थिता: भवन्ति तेषां कृते अतिथिशब्दस्य प्रयोग: कियान् युक्तिसङ्-गत इति तत् पाठका एव निर्णेष्यन्ति। वस्तुतोऽयमतिथिशब्द: अस्माकं समाजे रूढ़िशब्दतया प्रचलितोऽस्ति। यद्यप्यस्य शब्दस्य कश्चिद् यौगि-कोऽर्थ: सम्भवति तथापि भाषावैज्ञानिकदृष्ट्याऽत्र अर्थविस्तारस्य सम्भा-वनाम् आवश्यकताञ्चाङ्गीकृत्य यौगिकार्थस्यास्वीकरणमेव वरं मे प्रतिभाति। यथा "तिले भवं तैलमिति" सत्यामपि तैलशब्दस्य व्युत्पत्त्यां मृत्तिकागर्भान्तर्गत: ज्वलनशील: रासायनिक: पदार्थोऽपि तैलशब्देन व्यवह्रियते। अनयैव रीत्या आगमनतिथे: प्राक्सूचनाप्रदानानन्तरमपि ये कस्याप्यातिथ्यं स्वीकुर्वन्ति तेऽपि अतिथिपदवाच्या: भवन्ति।

पुराकाले तु केवलमपरिचिता एव आगन्तुका अतिथयो भवन्ति स्म। परिचिता आगन्तुकास्तु बन्धुशब्देनाभिहिता: भवन्ति। साम्प्रतं तु अतिथिशब्द: केवलं बन्धुशब्दस्य पर्यायवाची भवति। पूर्वकालिका अतिथय: समाजे देवतावदादरं सत्कारं च लब्ध्वा गौरवान्विता: भवन्ति स्म। अत एव वैदिकवाङ्मये "अतिथिदेवो भव" इत्यादर्शवाक्यं प्रसिद्ध-यतितराम्। अद्यत्वे किन्तु सा परम्परा यद्यपि न लुप्ता तथापि लुप्तप्राया

वर्तते। अतिथिसेवां जना अनावश्यकव्ययबुद्ध्या उपेक्षन्ते। संकटापन्नोऽपि जनोऽद्य गृहं प्रवेष्टुं नार्हति। गृहं तु दूरं सोऽलिन्देऽपि स्थानं न प्राप्नोति चौरभयेन।

स्थानकालपात्रनिर्विशेषेण अतिथिशब्दोऽतीव श्रुतिमधुरोऽस्ति। न केवलं श्रुतिमधुरः अपि तु मुखमधुरश्च। शब्दोऽयं यावन्मधुरः श्रोतुं, तावन्मधुरः वक्तुमपि। शब्दस्यास्योच्चारणसमये अथवा श्रवणसमये श्रद्धया, भक्त्या च शिरः स्वतः नतं भवति। अन्तःकरणस्थं अतिथिसेवाचक्रं दोलायमानं भवति। "अतिथिः, अहो सुन्दरता शब्देऽस्मिन्!" सति सौभाग्ये तु अतिथयो गृहमागच्छन्ति। तदर्थमस्माकं पूर्वजाः वदन्ति स्म—"अतिथिः मनुष्यो नास्ति अपि तु साक्षाद् देवता।" अत्र उक्त्यर्धस्य तात्पर्येऽस्माकमनुमोदनमस्ति। अतिथिः मनुष्यो नास्ति। यदि अतिथिस्तर्हि मनुष्यता कुत्र?

अवशिष्टे चोत्तरार्द्धेऽस्माकं मतानैक्यम्। अतिथिः साक्षाद् देवता भवतीति तथ्यम् अस्माकमजीर्णं भवति। प्रसङ्गेऽस्मिन् पूर्वजैः सहास्माकं मतैक्यं न सम्भवति। अरे भ्रातः! यदि मनुष्यो न भवति तर्हि अन्यः कश्चिद् भवतु—छागः, व्याघ्रः, शूकरः, कुक्कुरो वा। देवता किमर्थम्? अतः उक्तेरुत्तरार्द्धस्य विवादास्पदता तथैव वरिवर्ति। उक्तवाक्यांशस्य तात्पर्यं यद्यपि सुस्पष्टं तथापि औचित्यानौचित्यविचारविषयेऽस्माकं हृद्बोधः पूर्णतया न सम्भवति। अतिथीनामागमने यद्यस्माकं स्वतः नासिकाकुञ्चनं भवति तर्हि तेषां साक्षाद् देवतात्वग्रहणे कुतो यौक्तिकता?

अपरं च देवतासाक्षात्कारोऽस्माकमद्यावधि न जातम्। केवलं पुराणेषु, शास्त्रेषु, दूरदर्शने वाऽस्माभिस्तेषां स्वरूपविषये पठितं, दृष्टमपि। ते तु कदाचित् चतुर्भुजाः, कदाचिदष्टभुजाः, चतुराननाः, पञ्चाननाः, षडाननाश्च भवितुमर्हन्ति। वस्तुतः, अतिथीनां शारीरिकगठनव्यवस्थां दृष्ट्वा तेषां कृते देवताशब्दस्य प्रयोगः न रोचतेऽस्मभ्यम्। अवश्यम् एते परनिन्दायां, परचर्चायां क्वचित् षडाननाः, दशाननाः, शताननाः, सहस्राननना अपि भवन्ति। अन्यच्च, आतिथेयेभ्य एतेऽत्राञ्छनीयं साहाय्यमपि लभन्ते। एतेऽपि चतुर्भुजसाध्यमपि कार्यं भुजद्वयेन संपादयन्ति। अतः, एतेषां कृते देवताशब्दप्रयोगे न काप्यापत्तिर्भवेत्।

प्रसङ्गेऽस्मिन् कतिचन स्वाभाविकप्रश्ना अस्माकं मनसि आयान्ति—

- ☐ किं पुरा अतिथयो वस्तुतो देवता आसन् ?
- ☐ यदि सत्यं, तर्हि किम् अद्यत्वेऽप्यतिथयः देवतापदवाच्याः सन्ति ?
- ☐ यदि सत्यं तर्हि किं तेऽद्यापि देवतावदादरणीयाः भवन्ति ?
- ☐ यदि न, तर्हि, अस्मत्पूर्वजाः कथं किमर्थञ्च एतादृशं मन्तव्यं दत्तवन्तः ?
- ☐ यदि पूर्वकालिका अतिथयः देवता आसन्, तर्हि अद्यत्वेऽतिथीनां देवतात्वे का वा आपात्तिः, किमर्थं च सा ?

एतेषां सर्वेषां प्रश्नानामुत्तरे यदि कश्चिद् एवं वदेत्—अद्यतनीयातिथीनां पूर्वकालिकातिथिवत् विलक्षणस्वभावो नास्ति, तर्हि अद्यतनीयप्रसंगे अतिथेर्लक्षणे, स्वरूपोक्तौ च किमपि परिवर्तनमपेक्षते। मम मते तु अतिथिशब्दस्य पूर्वोक्तलक्षणे परिवर्तनं विधाय अस्माकं पूर्वजानां तथा प्राचीनपरंपराया वा मर्यादोल्लंघनं भवति। अतस्तदपेक्षया अद्यतनीयप्रसङ्गानुरोधेन देवताशब्दस्य व्याख्यायां यत् किञ्चित् परिवर्तनं कर्तुं शक्यते। तदपि वरम्। येन "दण्डभग्नं विनापि सर्पः म्रियेत"। उक्तेरस्याः अयमेवाशयोऽस्ति यत् अतिथयो यद्यस्माकं राजनैतिकनेतार इव देवताः स्युस्तर्हि अत्र न कस्याप्यापत्तिरापतेत्। यदि मनुष्याः सन्तोऽप्यस्माकं नेतारो देवताः भवितुमर्हन्ति, तर्हि मनुष्यरूपीणामतिथीनां देवतात्वे कश्च ग्रहोऽशुद्धो भवेत् ? स्थानकालपरिस्थित्यनुसारं एकमेव तथ्यं बहुवर्णैः रञ्जयित्वा, अपरं च, यस्य स्तुतिस्तस्यैव प्रसङ्गान्तरे निन्दां कृत्वा यदि पञ्चाननाः षडाननाश्चास्माकं नेतारो (प्रसङ्गान्तरेषु सामान्यजना अपि) "वोट्"—लाभाय येन हस्तेनोपकारः विहितस्तेनैव हस्तेनापकारं कृत्वा चतुर्भुजधारिणो देवताः भवितुमर्हन्ति, तर्हिं अद्यतनीयानामस्माकमतिथीनां देवतापदवाच्यत्वे कस्य महानुभावस्यापत्तिः स्यात् ?

⚜⚜⚜

आविष्कारस्य आत्महत्या

बह्वध्यवसायानन्तरं डॉ० सोरेन् ईश्वरस्य सृष्टिं धर्षितुं समर्थोऽभवत् । कस्मिंश्चिद् बुद्धिहीने मनुष्ये (यः पशुवदाचरति स्म) अस्त्रोपचारं कृत्वा असम्भवसफलताम् अर्जितवान् सः । आत्मतृप्त्या हतवागासीत् डॉ० सोरेन् । तावत् नगरस्य मान्याः हस्तिनः, यथा विशिष्ट-नेतारः, विशिष्ट-बुद्धिजीविनः, समाजसेविनश्चागत्य पुष्पगुच्छैरन्यैश्चोपहारवस्तुभिः सम्वर्द्धनां ज्ञापयित्वा गतवन्तः । इदानीमपि केचन आगत्य अभिनन्दयन्ति वैज्ञानिकं डॉ० सोरेन् महाशयं तस्याभूतपूर्वसफलतायै । अतिक्लान्तोऽपि आनन्दातिशय्यात् सः स्वपितुं न शक्नोति । सफलतानन्देनोत्तेजितस्य तस्य हृद्यन्त्रं अतिवेगेन धावति । अद्य अपराह्णे धन्वन्तरीचिकित्सामहाविद्यालये एकः समारोहस्तस्याभिनन्दनार्थम् आयोजित आसीत् । आयोजककर्तृपक्षाणां शतशोऽनुरोधेऽपि स तत्र किञ्चिदुद्बोधयितुं न समर्थोऽभवत् । सभायाः समापनात् प्रागेव स आयोजकेभ्यः क्षमायाचनापूर्वकं विदायं गृहीत्वा गृहमागतवान् । शयितुं यतमानस्य तस्य शयनकक्षेऽपि मनः नारमत । अतोऽज्ञातवासाय प्रयोगशालामागत्य द्वारं पिहितवान् ।

कक्षाद् बहिः परिचारक आह्वानघण्टां मुहुर्मुहुः वादयित्वा क्लन्तोऽभवत् । परन्तु तथापि द्वारं नोद्घाटितवान् डॉ० सोरेन् । सार्द्धहोरानन्तरं सः स्वत एव द्वारम् उद्घाटितवान् । आस्थानकक्षे प्रतीक्षारत आसीत् नवनिर्वाचितः, प्रदेशस्य मुख्यमन्त्री शारदाप्रसादः । डॉ० सोरेन् महोदयाय हसमुखेन स्वागतं व्याहृत्य पुष्पगुच्छं समर्पयन्नवदत् । चमत्कारः डॉ० सोरेन् ! चमत्कारः ! भवान् न केवलम् प्रदेशस्याथवा देशस्य, अपि तु विश्वस्य गौरवम् । इतिहासो भवन्तं युगेऽतीतेऽपि न विस्मरिष्यति । परन्तु मन्मते भवान् अद्यापि न पूर्णसफलो वर्तते गवेषणायाम् । बुद्धिहीने मनुष्ये बुद्धिं योजयित्वा भवान् गवेषणाया एकस्यां दिशि निःसन्देहं सफलोऽस्ति । परन्तु अस्त्रोपचारबलेन यदि स्वयं सम्पूर्णं कञ्चिन्मनुष्यं बुद्धिविहीनं करिष्यति तर्हि भवान् पूर्णसफलो भविष्यति । वदतु, किमेतदपि कर्तुं शक्नोति भवान् ?"

त्रस्तोऽभवत् डॉ० सोरेन् । किम् सः श्रृणोति ? किमियमग्निपरीक्षा तस्य सम्मुखमापतिता ? मन्त्रिणः शारदा-प्रसादस्यैतादृशी विनाशोन्मुखी चिन्ताधारा किमर्थम् ? ईश्वरप्रदत्तया बुद्ध्या तन्निर्मितां सृष्टिं विनाश्य अदृष्टस्यावमाननां सः कथं करिष्यति ? साम्प्रतं स ईश्वरस्य सृष्टौ कमप्यभावं पूरयितुं समर्थोऽस्तीति विचिन्त्य गर्वितो भवति स्म । तदर्थं तस्य पादावपि भूमौ न स्पृशतः । परन्तु शारदाप्रसादस्तस्य सफलता-मुपहसति । कथं, किमर्थञ्च सः मनुष्यं पशुस्तरे आनेष्यति ? नहि, नहि । एतादृशममानवीयं कार्यं न सम्पादयिष्यति सः । प्रत्यावर्ततां शारदाप्रसादस्तस्य द्वाराद् रिक्तहस्तः । परन्तु समाजे प्रतिष्ठितोऽसौ प्रदेशस्य मुख्यमन्त्री शारदाप्रसादः । अस्मात् स्थानात् प्रतिनिवृत्त्य समग्रे राष्ट्रे दुष्प्रचारं करिष्यति यदहमद्यापि परीक्षायामसफलोऽस्मि । किमेतावन्तं दुष्प्रचारं स सोढुं शक्ष्यति ? कथं स शारदाप्रसादं प्रबो-धयिष्यति यत् सोऽपरस्यां दिश्यपि सफलोऽस्ति । वस्तुतः सहजसाध्योऽस्ति सोऽपरः पक्षः । परन्तु तस्य परीक्षणार्थं न तस्याग्रहः, न वा उत्साहः । किमस्यामपि परीक्षायामुत्तीर्णो भवितुं सकृत् परीक्षणम् अवश्यम्भावी तस्य कृते ?

—"भवान् विचलितो न भवतु डॉ० सोरेन ! अस्यां च दिशि अहं भवतां सहायको भविष्यामि । अस्त्रोपचारार्थम् अहमेकां व्यक्तिं भवतां पार्श्वे श्वः प्रेषयिष्यामि । भवान् केवलं तस्योपरि स्वपरीक्षणं सम्पादयतु ।" एवं स्पष्टशब्दैः श्रावयित्वा स्वगृहं प्रतिन्यवर्तत शारदाप्रसादः ।

किं कर्तव्यविमूढः डॉ० सोरेन् केवलं मौनमतिष्ठत् । एतादृश्याः कठिनपरीक्षायाः सफलपरीक्षणस्य मोहं त्यक्तुमपि सः प्रस्तुतो नासीत् । रात्रौ स्वपितुमपि नापारयत् डॉ० सोरेन् । केवलं शयनस्य व्यर्थचेष्टा-मकरोत् । अस्त्रोपचारं कृत्वा यदि सफलो भविष्यति तर्हि किमीश्वरस्य परिषदि सः क्षम्यो भविष्यति । अपरं च, संसारे बहवः मनुष्या अनिच्छया कस्यचित् स्वार्थिनः स्वार्थं पूरयितुम् एतादृशोऽस्त्रोपचारस्य लक्ष्यं भूत्वा बुद्धिहीनाः भवेयुः ।

परेद्युः प्रातः सप्तवादने मुख्यमन्त्रिणः शारदाप्रसादस्य "मारुति-कार्" यानं डॉ० सोरेन्महोदयस्य द्वारे स्थगितम् । द्वौ च बलिष्ठपुरुषौ

हस्तपादमुखप्रतिबद्धं कञ्चित् पुरुषं शून्ये, शून्ये उत्थापयित्वा प्रयोगशालां नीतवान् । एतद् दृश्यं दृष्ट्वा ताडपत्रमिवाकम्पत डॉ० सोरेन् । अनिच्छयापि सः यशःकामनया प्रयोगशालां प्रविष्टवान् । परीक्षाया-मनायासेन आशानुरूपः सफलोऽप्यभवत् सः । अस्त्रोपचारानन्तरं गवेषणार्थं परीक्षितायास्तस्याः व्यक्तेर्मुखात् पटमुदमोचयन् ते मुख्य-मन्त्रिणः क्रीतदासाः । हस्तपादयोश्च बन्धनं उन्मुक्तम् । परन्तु आश्चर्यम् ! बलेन गृहीतोऽपि सः पुरुषो धावितुं न प्रायतत । केवलम-पश्यत् सर्वेषां मुखानि । यथा कस्मादपरस्माद् ग्रहादागतोऽस्ति कश्चिद् जीवविशेषः । किञ्चिदध्येतुं, वोद्धं वा चेष्टते सर्वेषां मुखानि विलोक्य । पृष्टे सत्यपि किञ्चिद् वक्तुं नास्फुरत् तस्य बुद्धौ । किञ्चिद् वक्तुं प्रोत्साहितोऽपि नावादीत् किमपि । केवलं सर्वेषां मुखान्यपश्यत् । यथा कश्चित् सर्वथापरिचितः वन्याप्रभाविताद् देशान्तरादागत्य शरण-मिच्छति । अथवा दुर्घटनाग्रस्तः कश्चित् मनुष्यो मस्तके आघातं संप्राप्य स्वस्मृति हारितवान् । तं विलोक्य शारदाप्रसादोऽहसत् सशब्दं, विद्रूपञ्च किमपि व्यङ्ग्यमिश्रितं हसम् । अतीव प्रसन्नः सोऽहसत् उपहासमिश्रितम् अभीष्टं, कञ्चिद् विजयस्य हसम् । अयं च विजयः सत्यस्योपरि असत्यस्य । सम्भवतः निर्वाचनं विजित्यापि स एवं नाहसिष्यत् ।

—"चमत्कारः डॉ० सोरेन् ! चमत्कारः !!" भूरि प्रशंसितवान् मन्त्री शारदाप्रसादः । अस्त्रोपचारेण सद्यः बुद्धिहीनः सोऽपि अज्ञातो बलिः उच्चैरहसत् । शारदाप्रसादं च अन्वकरोत्—

—चमत्कारः डॉ० सोरेन् ! चमत्कारः !!

× × ×   × × ×   × × ×

परेद्युः सम्वादपत्रस्य मुखपृष्ठे, प्रमुखे स्तम्भे विशालाकारैः कृष्णा-क्षरैश्च प्रकाशितमासीत्—

"विशिष्टो विप्लवी, जननायकः समीरण-सामन्तरायः उन्मत्तो-ऽभवत् ।" एतस्यामेव पृष्ठायामपरस्मिन् स्तम्भे अपरश्च तादृशः दुः-सम्वादः—

—"डॉ० सोरेन् आत्महत्यामकरोत् ।"

तस्यामेव पृष्ठायामन्यस्मिन् स्तम्भे मुख्यमन्त्रिणः शारदाप्रसादस्य शोकवार्ता प्रकाशिता आसीत्—

—"अस्माकं देशोऽद्य द्वाभ्यामुज्ज्वलज्योतिष्काभ्यां वञ्चितोऽभवत् । एको विशिष्टजननायकः समीरणसामन्तरायोऽपरश्च प्रसिद्धवैज्ञानिकः डॉ० सोरेन् । इयं क्षतिः युगं यावदपूरणीया स्थास्यति ।"



अगणिः

तदानीं वार्तायामस्यां न विश्वसितवान् अगणिः। अनुजस्य सदानन्दस्य शवं हस्तयोर्धृत्वा तमाहूतवान्। तस्मात् किमप्युत्तरमप्राप्त्वा केवलमरोदीदुच्चैः। क्रन्दंश्च स्वशिरोऽताडयद् भूमौ !

बहिश्च ग्रामपथे बाला अनृत्यन्—"अगणिः आगतोऽस्ति"। अगणिरुन्मत्तोऽप्यद्य रोदिति। ग्रामे तस्य रोदनमेतावत्कालं यावत् न केनापि श्रुतम् स्यात्। ग्रामवासिनः सदानन्दस्य गृहे समवेता अभवन्। केचन प्रसन्नाश्चावदन्—"भगवतोऽसीमकृपावशादुन्मत्तस्यागणेः बुद्धिचक्रमकस्मात् सन्तुलितं जातम्। भ्रातुर्मृत्युः तं नितरामबाधत इति मन्यामहे। अन्यथोन्मत्तस्य तस्य मनस्येतादृशी चिन्ता किमर्थम्? कथं स ज्ञातवान् यत् सदानन्दस्तस्य भ्राता इति। यद् वा भवतु. बृहस्पतिखडिरत्नस्य वंशः कथमप्यग्रे चलिष्यति।"

× × ×　　　　× × ×　　　　× × ×

दशवर्षात् पूर्वमेव अगणिखडिरत्न उन्मत्तोऽभवत्। परन्तु एवमपि समय आसीत् यदा तस्य ज्योतिर्विद्यायां जनानां महती आस्था, प्रगाढविश्वासश्चास्ताम्। गणिते, फलिते, सामुद्रिके च सर्वत्रैव समाना गतिस्तस्यासीत्। तस्य यशसोऽभिवृद्धौ तदानींतनानां, समीपे दूरे च वर्तमानानां सर्वेषां ज्योतिषाचार्याणां व्यवसायो मन्दोऽभवत्। सर्वे च तस्य प्रसिद्धिमीर्ष्यावशात् नासहन्त।

अगणिस्तु बाल्यकालादेव बुद्धिमान् आसीत्। तस्य पिता बृहस्पतिखडिरत्नः ज्योतिःशास्त्रस्य न तथा सिद्धहस्तो विद्वान् आसीत् यथा तस्यानुजः, अर्थात् अगणेः पितृव्यः वाचस्पतिखडिरत्नः। अतः सः यदा, कदा स्वानुजेनापमानितः, लाञ्छितश्चाभवत् स्थाने, स्थाने शास्त्रचर्चायाम्। तस्य प्रतिशोधार्थं बृहस्पतिखडिरत्नः स्वज्येष्ठपुत्राय

अगणये विधिवत् ज्योतिषशास्त्रशिक्षां प्राददात्। विशिष्टज्योतिर्विदुषां सकाशात् तस्य तत्तद् ज्योतिषशास्त्राध्ययनं तमपरिणतवयस्येव ज्योतिःशास्त्रपारंगतमकरोत्। फलतः, निकटग्रामेषु, नगरेषु च वर्तमानाः ज्योतिर्विद्वांसः (ये च ज्योतिषशास्त्रस्य सामान्याध्ययनेन स्वजीविकां चालयन्ति स्म) शंकिताः, आर्थिकक्षतिग्रस्ताश्चाभवन्। तेषां व्यवसाये काचिन्मन्दता तैरनुभूता समये, समये। किशोरस्यागणिखडिरत्नस्य बुद्धिविद्याभ्यां सर्वे पराजयमधिगतवन्तः। बृहस्पतिखडिरत्नस्तु शान्त्या निःश्वसितवान्। स तदानीम् आत्मविश्वासेन परिपूर्णः सन् पथि वक्षः प्रसार्य गच्छति स्म। ततः प्रभृति अगणेः पितृत्वमेव तस्य मुख्यपरिचयोऽभवत्। वाचस्पतिखडिरत्नस्तु सत्यमिदं सोढुं न समर्थ आसीत्। परन्तु सहनं विना उपायान्तरं नासीत्तस्य। क्रोधितमना स रक्ततण्डुलम् अचर्वयन् केवलम्। पूर्वमधिगतां लोकप्रियतां पुनः प्राप्तुं व्याकुलमभवत् तस्य चित्तम्।

संयोगवशाद् भवतु, दुर्योगवशाद् वा भवतु, एकदा कस्यांचिद् विशेषविद्वद्गोष्ठ्यां वाचस्पतिखडिरत्नस्य शास्त्रस्पर्द्धा अगणिखडिरत्नेन सहाजायत। प्रसङ्गतश्चर्चायामगणिः किञ्चित् प्रतिशोधपरायणोऽप्यभवत्। वाचस्पतिखडिरत्नस्य शास्त्रीयदोषमन्विष्य तस्य काञ्चित् गणनां स सर्वेषां सम्मुखे मिथ्या प्रमाणितवान्। अपमानेन वृद्धवाचस्पतिः नतमस्तकोऽभवत्। क्रोधेन मुखमारक्तमभवत्तस्य। सर्वास्तस्य दीर्घकालिक्यः साधनाः, प्रतिपत्तयश्च मृत्तिकातले विलीना अभवन्निति मर्माहतोऽभवद् वाचस्पतिः। नहि, नहि। स एतावद् अपमानं न सहिष्यते। निरुपायस्य षष्टिवर्षीयस्य तस्य वृद्धस्य चक्षुषोः रक्तविन्दव इव लोतकविन्दवः स्रतः प्रावहन्। सः पुनरग्रे किञ्चिन्नाभाषत तस्यां सभायाम्। मनसा किन्तु अगणिं बहु अशपत्।

जना अगणिखडिरत्नस्यासाधारणबुद्धिं प्रशंसितवन्त इति तु सत्यम्, परन्तु मन्ये प्रथमे वयसि एतावन्ति महान्ति प्रशंसावचनानि न तमसहन्त। ज्योतिषशास्त्रे अतिशयाभिरुचिवशात्तस्य बुद्धिचक्रस्य सन्तुलनमसन्तुलितम्। क्रमशो वयस्यचरमेऽपि स उन्मत्तोऽभवत्। पितृव्यस्याभिशापात्तस्येयं दुर्दशा संजाता इति विश्वसितवन्तस्तत्प्रशंसकाः, तद्विरोधिनश्च ग्रामवासिनः।

प्रारम्भिकावस्थायां तस्योन्मत्तता कादाचित्की आसीत्। स तदानीं यदा, कदा ज्योतिषशास्त्रीय-श्लोकानुच्चार्य स्वयं तेषामन्वयं भावार्थं च व्यवृणोत्। अपृष्टोऽपि पथि गच्छतो जनान् तेषां राश्यनुसन्धानपूर्वकं ग्रहस्थितिम् असूचयत्। शनैस्तस्योन्मत्तता चन्द्रकलेव वर्द्धितानुदिनम्। वर्द्धितश्च तस्य असम्बद्धः प्रलापः। पथि गच्छतो जनान् अनायासं गालिमप्यभ्यभाषत। सौभाग्यात् पिता बृहस्पतिखडिरत्नस्तु पुत्रस्यैतादृशीमवस्थां द्रष्टुं संसारे नासीत्। गृहे तु केवलं तस्यानुजः सदानन्द एवासीत् यः ग्रामेषु अटन् जनान् पञ्चाङ्गं प्रदर्श्य, राशिफलं च श्रावयित्वा यथाकथञ्चित् स्वस्याग्रजस्य च उदरं भरति स्म। एकदा कस्मिन् प्रसङ्गे उत्क्षिप्तोऽगणिर्निर्ममो भूत्वा स्वानुजं सदानन्दं दण्डेनाताडयत्। तेन च तस्य वामपादस्यास्थिभग्नं जातम्। तस्माद् दिवसात् सदानन्दः पङ्गुरभवत्। उन्मत्तश्च अगणिः। किं वा स जानीयात् भ्रातृत्वसम्पर्कम्? गृहं परित्यज्य सः कदा, क्व चागच्छदिति न कोऽपि जानाति स्म। पङ्गोः सदानन्दस्य का दुर्दशा जाता इति द्रष्टुमेकवारमपि सः ग्रामं नागतवान्। संप्राप्ते वयसि सदानन्दः विवाहं कृत्वा संसारी चाभवत्। समयेन तस्य एकः पुत्रोऽपि जातः, योऽद्य-द्विवर्षीयोऽस्ति। परं हन्त! समीपस्थे ग्रामे कस्यचिद्यजमानस्य विवाहे ग्रहविप्ररूपेण पौरोहित्यं कृत्वा, वस्त्रतण्डुलमिष्टान्नादिकं गृहीत्वा प्रत्यावर्तनसमये ह्यः रात्रौ घनान्धकारे तं कश्चित् विषधरः सर्पो दंशितवान्। तया च सर्पदंशनपीडया यथाकथमपि सः गृहमागत्य द्वारदेशे प्राणांस्त्यक्तवान्।

बहुवर्षानन्तरं अगणिरद्य न जाने किमर्थं झडवद् ग्रामे समुपस्थितोऽस्ति। सम्भवतस्तस्य भ्रातरं सदानन्दं द्रष्टुमागतः स्यात्। परन्तु विधिना किमाचरितम्? तेन सह कोऽयं दारुणोपहासः? किं स एतादृशं करुणदृश्यं द्रष्टुमिहोपस्थित आसीत्? अथवा सम्भवतः अनुजपत्न्याः, तत्शिशुपुत्रस्य च रक्षणावेक्षणार्थम् अदृष्टेन सोऽत्र प्रेरितोऽस्ति।

सदानन्दस्य पत्नी शिरस्ताडयित्वा रोदिति पत्युः शवं गृहीत्वा। सा तु अगणिं नाभिजानाति। हठात् रोदनशीलः, अबोधः कश्चिद् बालोऽगणेः पादयोर्मध्ये आगतः। सम्भवतः सदानन्दस्य शिशुपुत्रः। हस्तयोर्गृहीत्वागणिस्तं स्वहृदये आलिङ्गितवान्। रुदन्तञ्च तम्प्रबोधितवान् आश्वासनापूर्णैः वचोभिः।

सुमित्रा

"ठक् ! ठक् !! ठक् !!!"

विभग्ना रतिकान्तस्य दीर्घनिद्रा । विरक्तया सः चक्षुषी उन्मोचयितुमयतत । नहि, नहि । न शक्ष्यति उत्थातुमिदानीम् । भीषणतया ज्वलतश्चक्षुषी तस्य । यः कोऽपि भवतु बहिर्देशे । एवं वारम्वारम् आहूय निराशो भूत्वा स्वयं पलायिष्यते । पार्श्वं परिवर्त्य रतिकान्तः शयनस्याभिनयमकरोत् केवलम् ।

"ठक् ! ठक् !! ठक् !!!"

कपाटे पुनः मृदुकराघातम् । विरक्तोऽभवद् रतिकान्तः—

—"ऊः ! न भविष्यति । कश्चिद् वराकः प्रातरेवागत्य मम निद्रायां व्याघातं जनयति ।" परिहितमधोवस्त्रं यथाकथमपि नियन्त्रयन् शय्यातः उदतिष्ठद् रतिकान्तः । पदाघातेन किञ्चित् सशब्दं खट्वाधोऽगच्छत् । तदानीं तस्योपेक्षां कृत्वा, क्रोधेनाग्निवद् भूत्वा सः कपाटमुदमोचयत् । परन्तु गृहस्य बहिर्देशे दण्डायमानं पत्रवाहं दृष्ट्वा तस्य क्रोधः विस्फोरणात् प्रागेव स्वतः शान्तोऽभवत् ।

—"बाबो ! विद्युत्-सन्देशः । निर्दिष्टे कर्गजे रतिकान्तस्य हस्ताक्षरं गृहीत्वा तस्मै विद्युत्-सन्देशं च प्रदाय विदायं नीतवान् सः पत्रवाहः । तस्माद् विद्युत्सन्देशं गृहीत्वा पुनः शय्यायामलुठद् रतिकान्तः । क्लान्तचक्षुष्युन्मिल्य पठितुं प्रायतत । बहिश्च प्रखराः सूर्यरश्मयो मध्याह्नस्य द्वादशवादनस्य । परन्तु गृहाभ्यन्तरे अद्यापि क्षीणालोकः । अतः विद्युत्सन्देशस्य पठने कष्टमनुभूतवान् रतिकान्तः । तस्यावशहस्ताद् विद्युत्सन्देशः स्वत एव अधः पतितः । तमन्वेष्टुमितस्ततः हस्तं प्रसारितवान् सः । उपरि कुत्रापि तस्य सन्धानं न प्राप्य स्वपन्नेव स्वहस्तं

खट्वासन्धौ प्रावेशयत्। द्वित्राः तैलचौराः युगपदेव तस्य हस्तस्योपरि आगतवन्तः। भयेन रोमाञ्चितश्च रतिकान्तः झटित्येव हस्तमुपरि नीतवान्। विरक्त्या चामन्यत—"अस्तु पतन्तां तत्र। अनन्तरं द्रक्ष्यामि। साम्प्रतं शयनं मे वरं प्रतिभाति"। शयितुं भृशं प्रायतत रतिकान्तः। परन्तु निद्रा नागता तस्य चक्षुषोः। किं लिखितं भवेद् विद्युद्-वार्तायाम्? कस्य सकाशाद् अत्यावश्यकी वार्तापि भवितुमर्हति। साहसं सञ्चयन् सशंकितश्च पुनः हस्तं प्रावेशयद् रतिकान्तः। प्राप्ते सति विद्युत्सन्देशे तद् गृहीत्वा झटित्येवोपरि आनीत्वान्। कष्टेन पठितुमशक्नोत् तत्रोल्लिखितां वार्ताम्—

"अक्टोबर्मासस्य द्वितीयदिनाङ्के 'धउली'ति द्रुतगामियानेन आगच्छामि।"

—सुमित्रा—

प्रकृतिस्थोऽभवद् रतिकान्तः—"अरे! इयमस्ति सुमित्रायाः विद्युद्वार्ता। अक्टोबर्मासस्य द्वितीयदिनाङ्के आगच्छति सा। अद्य कोऽस्ति दिनाङ्कः"? भित्तिस्थां पंजिकामपश्यत्। परं तत्र तु अद्यापि अगष्टमासो वर्तते। मासद्वयात् पृष्ठपरिवर्तनं न जातं तस्मिन्। स्वस्मृतौ किञ्चिद् बलं प्रदत्तवान् रतिकान्तः—"अरे! ह्यस्तु अक्टोबर्मासस्य प्रथमो दिनाङ्क असीत्। वेतनदिवस एवासीत् सः"। मासत्रयस्य वेतनं ह्य एव प्राप्तवान् रतिकान्तः। अत एव सुहृद्भिः सहकर्मिभिरनुरुद्धः सः गृहे एकं विशालभोजम् आयोजितवान्। उपलक्ष्यं त्वासीत् तस्य पुत्रप्राप्तिः। साऽपि प्रथमः। अतः सहकर्मिणः, सुहृदश्च मद्येन, मांसेन चाप्यायितुं प्रेरयन्त आसन् एकमासात्।

तदनुसारम् अद्यैव द्वितीयो दिनाङ्कः अक्टोबर्मासस्य। गान्धी-जयन्ती। कार्यालयेऽवकाशः। तदर्थं ह्यः रात्रौ तैरिदं भोजमायोजितम्। येन परेद्युः पूर्णविश्रामः कर्तुं शक्येत। धउलिनामकं रेलयानं भुवनेश्वरस्थानके सार्द्धद्वादशवादने आयास्यति। परन्तु तेन त्विदानीमपि शय्या न त्यक्ता। शरीरमपि आलस्येनावशमस्ति। शय्यां त्यक्तुं कथमपि नेच्छति सः। अधिकमद्यपानाद् रात्रौ सुनिद्रा नागता। अनिच्छयोदतिष्ठद् रतिकान्तः। —"इस्! कियद् अपरिष्कृतमस्ति गृहम्।" शयनकक्षे इतस्ततः पञ्चषानि

मद्यपात्राणि विकीर्णानि वर्तन्ते। सर्वत्र च अर्द्धदग्धतमाखुनाली (सिगरेट्) खण्डानि। धवलवर्णत्वाद् अन्धकारेऽपि सुस्पष्टानि दृश्यन्ते। पादमपि स्थापितुं स्थानं नास्ति। किं तैः ह्यः रात्रौ एतावन्मात्रकं धूमपानं कृतम्? कथं न भवेत्? विशालं भोजमासीत्। पञ्चकिलो-परिमितं कुक्कुट-मांसम्। तिस्रः "ओल्डमन्करम्"-कूप्यः, द्वे "बोनिस्काट्-ह्विस्की"-कूप्यौ, एका "माकडोवेल्स-प्रीमियम्", एका च "कोलोनेल-स्पेशल" ह्विस्की-कूपी, विंशति-पोटलिका-परिमिता तमाखुनाली।

रतिकान्तस्य पुत्रोत्पत्तिरूपं सुसन्देशं पालयितुमायोजितेऽस्मिन् भोजे एतत् सर्वं व्ययितवान् सः। सुमित्रा गृहे नासीत्। अतः द्विसहस्ररूप्यक-विनिमयेनैतादृशभोजमत्रायोजितं तेन। अन्यथा कस्मिंश्चिद् भाटकगृहे अथवा भोजनालये एवैतस्यायोजनम् अकरिष्यत्।

अनुक्षणं चिन्ता व्यवर्द्धत रतिकान्तस्य। अर्द्धहोरानन्तरं ट्रेन् आगमिष्यति। स इदानीमपि शय्यायां सुखं शेते। गृहं त्वत्यन्तमपरिष्कृतं वर्तते। सर्वं परिष्कृत्यैव स्थानकं गन्तव्यम्। अन्यथा किं चिन्त-यिष्यति सुमित्रा? तस्यावासात् स्थानकस्य दूरत्वं तु पञ्च "किलोमिटर्"-परिमितं वर्तते। रिक्सायानेन गन्तव्यं किल। अर्द्धहोरापि तदर्थमपेक्षते। भाराक्रान्तं तस्य शिरोऽजायत। कष्टेन शय्यां विहाय "बेसिन्"-समीप-मागतवान्। तत्तु दुर्गन्धमयेन वमनावशेषेण पूर्णं वर्तते। ह्यः रात्रौ तेन कतिवारं वमितमिति सः सम्यक् न स्मरति। सहकर्मिणामनुरोधेन किञ्चिदधिकं मद्यपानं कृतमिति तु केवलं स्मरति सः। मद्यप्रभावेण ज्ञातं नाशक्नोत् यत् कियत् पातव्यं, कियच्च तेन पीतमिति। सम्मुखस्थं दर्पणमपश्यद् रतिकान्तः। चक्षुषी इदानीमपि आरक्ते वर्तेते। श्मश्रूपूर्णं च विवर्णं मुखमण्डलम्। कतिचन शुष्कानि वमनावशेषचिह्नानि मुखे सुस्पष्टानि। इदृशं रूपं दृष्ट्वा किं चिन्तयिष्यति सुमित्रा? मुखप्रक्षा-लनार्थं जलनलमुदमोचयत्। परन्तु जलविन्दुरपि न पतति तस्मात्। भुवनेश्वरे तु नववादनं यावत् नगर-महापालिकाजलमायाति। अनन्तरं संगृहीतजलेनैव कार्यं चलति तत्रत्यजनानाम्। तेन तु जलमपि न संरक्षि-तमद्य जलपात्रे। न च संगृहीतं "फिल्टर्-"मध्ये पानीयजलम्। स्नानं तु दूरं, "मग्"-परिमितं जलमपि नास्ति गृहे मुखप्रक्षालनाय। निराशः रतिकान्तः अगत्या पुनः शयनकक्षं प्रतिन्यवर्तत। तावत् तस्य दृष्टिः

पाकशालायां गता । तत्रत्यां व्यवस्थां विलोक्य विव्रतोऽभवद् रतिकान्तः । इतस्ततश्च विकीर्णानि पाकपात्राणि दृष्ट्वा तस्य चिन्ता द्विगुणीभूता । तान्यपि सज्जीकर्तुं साहसं न कृतवान् सः । अतः, किंकर्तव्यविमूढस्य तस्य शयनमेव सर्वथा वरमिति विचिन्त्य शयनकक्षं गत्वा मौनमस्वपत् ।

—"सा दुष्टा वासन्ती अपि अद्य नागच्छति । परन्तु मासिकवेतनं नेतुं एकदिनमपि विलम्बं न सहते सा वराकी । उपरि तु मासद्वयस्य, मासत्रयस्य वा अग्रिममपेक्षते ।"

वासन्ती, तस्यात्पकालिकी परिचारिका । प्रतिदिनमागत्य तस्य गृहे गृहमार्जनं, पात्रप्रक्षालनादिकं कार्यं सम्पादयति । तस्यामेव सर्वं क्रोधमागतं रतिकान्तस्य— अरे ! इदानीमेव स संस्मरति यदद्य नागन्तुं पूर्वानुमतिं संप्राप्यैव वासन्ती गतवती । कुत्र बन्धुगृहं गन्तव्यमासीत् तस्याः । किं वा कर्तुं शक्नोति रतिकान्तः परिस्थित्यामस्याम् ? रेलस्थानकं गमिष्यति, अथवा मार्जनीं गृहीत्वा विना जलेनापि यथाकथञ्चिद् गृहं परिष्करिष्यति ? भित्तिस्थां घण्टां दृष्ट्वा गुणीभूता तस्य व्यग्रता । अतीव व्यस्तश्चाभवत् सः । सार्द्धद्वादशवादनार्थं केवलं पञ्चनिमेषा एवावशिष्यन्ते । अतः, इदानीं रेल-स्थानकगमने न कापि यौक्तिकता वर्तते । अन्ततः स्वल्पं, बहु वा गृहमार्जनं कर्तव्यम् । असत्याश्रयेण सुमित्रां वञ्चयित्वात्मरक्षां करिष्यति । तां मिथ्या वदिष्यति यत् विद्युत्सन्देशो न प्राप्तस्तेन ।

परन्तु मार्जनं वा भवतु परिष्करणं वा भवतु तत् कथं सम्भविष्यति जलं विना ? अन्ततः वमनावशिष्टेनावरुद्धः 'वेसिन्'-मार्गः परिष्कर्तव्योऽस्ति । अन्यथा तथैवास्ताम् । सुमित्रां द्वितीयमिथ्यापि वदिष्यति यत् शरीरास्वास्थ्यात् बहु वमितं तेन रात्रौ । जलाभावे तु तत् सर्वं पूर्ववद् वर्तते ।

अतः केवलं गृहं परिष्करिष्यति सः । इतस्ततः विकीर्णास्ताः मद्यकूपीः खट्वाधः न्यक्षिपत् । परन्तु मार्जनी कुत्र ? मार्जनीमन्विष्टवान् सर्वत्र । गृहे, गृहाङ्गणे च कुत्रापि न दृश्यते सा । केवलं वासन्तीमभ्यक्रुध्यत् रतिकान्तस्तदानीम् । सम्मुखे पुरातनीं काञ्चित् कर्दमाक्तां मार्जनीं दृष्ट्वा तामेव ग्रहीतुं यावदनमत् तावद् उदरादधः कटिभागे काञ्चित् मृदुपीडामनुभूतवान् । कुत्र पवनोऽवरुद्धः स्याद् रात्रौ । शयने, पार्श्वपरि-

वर्तने वा किमपि जातमिति विचिन्त्य निराशो भूत्वा केवलम् अस्वपत् उपधानं गृहीत्वा। चलच्चित्रमिव तस्यान्तःकरणे सुखमयं किञ्चित् पारिवारिकचित्रं प्राचलत्—

—"सुमित्रा अद्य आगच्छति। तया सहागच्छन् स्यात् नवागन्तुकस्तस्य शिशुपुत्रः। किं तस्य नामकरणं कृतं सुमित्रयेत्यपि न जानाति सः। रूपेण सः कमनुकुर्वीत ? मातरं, पितरं वा ? नूनं पितरमनुकुर्यात्। मासद्वयानन्तरमायाति सुमित्रा। एतावता पुत्रोऽपि तस्यैकमासीयोऽस्ति। पुत्रजन्मन एकविंशदिवसं पालयितुं तस्यापि तत्र गन्तुम् इच्छासीत्। परन्तु अवकाशो न प्राप्तः कार्यालयात्। मासद्वयात् प्राक् सुमित्रायाः भ्राता आगत्य तां स्वग्रामं नीतवान्। प्रथमसन्तानस्य जन्म मातामहगृहे भवेदित्यस्ति तेषां परम्परा। तामेव परंपरां पालयितुं सा गतवती स्वपितृ-गृहम्। रतिकान्तस्य ग्रामे तु एषा परंपरा नास्ति। अतस्तस्य पितरौ मनसि किञ्चिद् दुःखमप्यनुभूतवन्तौ।"

इदानीम् एकवादने केवलं पञ्चनिमेषा एव अवशिष्यन्त। एतावता सुमित्रायाः गन्त्री आगतापि स्यात्। रेलस्थानके मत्कृते प्रतीक्षमाणा भवेत् सा। आत्मानं धिगकरोद् रतिकान्तः। अद्य तु तस्य स्थानकगमनमत्यावश्यकमासीत्।

मुख्यद्वारमुन्मुक्तं वर्तते। सज्ञानेनैव तत्तेनोन्मुक्तं स्थापितम्। कस्य पादशब्दं क्रमशः निकटतरं भवतीति शृणोति रतिकान्तः। मन्यते च कश्चिद् गृहं प्रविशतीति। मार्जाराशंकया मूषिक इव भीतोऽभवद् रतिकान्तः। सम्भवतः सुमित्रायाः पादशब्दः। सा एव आगता स्यात्। त्वरया हस्तस्थं विद्युत्-सन्देशम् उपधानस्य नीचैः स्थापयित्वा शयनाभिनयमकरोद् रतिकान्तः। प्रतीक्षायां च दत्तावधानोऽतिष्ठत् सुमित्रायाः अग्निवर्षीणीं गालिं श्रोतुम्।



त्यक्तबलिः

कमपि विशेषप्रयोजनमुद्दिश्य शरणपुरग्रामस्य मुक्ताकाशसभामण्डपे काचिद् ग्रामसभायोजितासीत् । ग्रामस्य मुख्यः केदारनाथ महान्ती (केदारबाबुः) सभायां चिन्ताग्रस्त उपविष्ट आसीत् । ग्रामीणाः सर्वे काममपि विषमां समस्यामधिकृत्य चिन्ताशीलाः दृश्यन्ते स्म । पक्षे गोहत्या, पक्षान्तरे च ब्रह्महत्या इव स्थितिस्तेषां सम्मुखे । अस्यां सङ्कटमय्यां परिस्थितौ किं कर्तव्यं, किञ्च न कर्तव्यमिति निष्पत्तिंस्तु केवलं ग्राममुख्यमहोदयः श्रावयिष्यति । यदा, कदा ग्रामस्य बह्वीनां गम्भीरसमस्यानां निष्पक्षसमाधानं तेन कृतम् । किं सोऽद्यासफलो भविष्यति ? किं स स्वकीयां पूर्वप्रतिष्ठामक्षुण्णां न द्रष्टुं शक्ष्यति ?

धर्मावतारः स तदानीं न केवलं ग्रामस्य मुख्योऽपितु तत्रोपविष्टानामेकशतजनानां मुखम् । यदि सः मुखं नोन्मोचयिष्यति तर्हि न कोऽपि स्वमुखमुन्मोचयिष्यति । ते तु ग्रामवासिनः तत्प्रदत्तमभिमतं केवलं समर्थयिष्यन्ति । तस्मिन् ग्रामे नवीनाभिमतप्रदाने तु केवलं मुख्यमहोदयस्य केदारबाबोरधिकारः । विषयेऽस्मिन् बहु विचिन्त्य, अन्ततः द्विधाभावं प्रकटयन् मुख्यमहोदयः अवदत्–ऐषमः पूजायां छागस्यास्य बलिः देव्यै समर्पयिष्यते चेत्तर्हि का हानिः स्यात् ? तदनीं तु एष बालक आसीत् । अतः, देव्याः स्वप्नादेशानुरोधेन बलिमुखात् अस्य सुरक्षा विहिता अस्माभिः । साम्प्रतं त्वेषः प्रौढोऽस्ति । मन्ये इदानीमेतस्य छागस्य देव्यै बलिप्रदाने न काऽपि बाधा दृश्यते ।

ग्राममुख्यमहाशयस्य वक्तव्यं यावन्न संपन्नं तावत् समर्थनरूपां स्वसम्मतिं ज्ञापयितुं दश-पञ्चाशद् जनाः एकस्वरेणावदन्—"सत्यम्, सत्यमुक्तं भवता । एष हि मातुश्छागोऽस्ति । एतस्य बन्धनमपि न श्रेयस्करम् प्रतीयते । अन्यथा आरम्भाद् यदि सतुरामलिक इमं स्वछागगोष्ठ्यां प्रति-

बध्य साधारणछागानिवापालयिष्यत् तर्हि कापि समस्यैव नाभविष्यत् । देवीभयेन कियत्कालं मौनमाश्रयिष्यामः ? एषु दशपञ्चदशदिवसेषु न्यूनातिन्यूनं दशजनाः मत्तछागेनानेनाहता अभवन् । तेष्वेकस्य बालकस्यावस्था तु शोचनीयाऽस्ति, यः सर्वकारचिकित्सालये मृत्युना सह संघर्षरतोऽस्ति । परिचिता अपरिचिताः वा भवन्तु, सर्वे छागस्यास्याकृतिं दृष्ट्वा आश्चर्यं प्रकटयन्ति—

—"किमसौ छागः ? अथवा कश्चिद् वृषभः ? देवीनाम्ना सर्वान् भीषयित्वा असौ वराकः यद् यद् इच्छति तत्तदश्नाति । एतस्य शृङ्गौ हस्तपरिमितौ वर्तेते । नेत्रयुगं तु साक्षात् यमराजस्य नेत्रे इव भयंकरं दृश्यते । तस्माद् भीताः बालास्तु एषु दिनेषु गृहान्न बहिरागच्छन्ति । अस्माभिः बह्वाचरिता पशुसेवा । साम्प्रतं मानवकल्याणमेव द्रक्ष्यामः । अतः, बहुजनहिताय आगामिन्यां पूजायाम् एषः देव्याः प्रथमो बलिर्भवतु । स च बलिप्रसादः शरणपुरग्रामे सर्वेभ्यो प्रदास्येत । एवमाचरितेसत्येव शरणपुरग्रामस्य कल्याणं सेत्स्यति" इति स्पष्टमतमुपस्थापितवन्तः ग्रामवासिनः ।

प्रस्तावोऽयं यावन्नानुमोदितः ग्रामवासिभिस्तावत् स छागस्तत्र झटित्याविर्बभूव । सभायामकस्मात् 'कोकुआ'–भयः, आतङ्कश्च समाच्छन्नः । महाबलव्याघ्रमिव तं छागं दृष्ट्वा अनेके आतंकिताः सन्तोऽकम्पन्त । केचन भयेन सभां त्यक्त्वा गन्तुमपि यावदुद्यता आसन्, तावत् सर्वेषां पूर्वधारणां मिथ्या प्रमाणयित्वा सः छागः ग्राममुख्यस्य केदारबाबोः पादयोरलुठत् स्वपादौ प्रणतिमुद्रायामेकीकृत्य । तदानीं सोऽसाधारणधीरस्वाभावो दृश्यते स्म । चक्षुषोर्नासीत् सिंहस्य कटाक्षम् । न चापि पादेषु महाताण्डवनृत्यस्य मुद्रा । मन्ये नतमुखः अश्रूणि विमोचयन् कदाचित् स एवं वदन् आसीत्—"क्षम्यतां महाशय ! मया त्वपराधः समाचरितः । अद्य प्रभृति ग्रामे उपद्रवाणि नाचरिष्यामि । अहं तु प्रायश्चित्तकामोऽस्मि । मृत्युमुखाद् सुरक्षां प्रदाय भवता कल्पितं मे द्वितीयां जन्म । भवानेव मे पितरौ । बालानां सकाशाद् अपराधास्तु भवन्त्येव । परन्तु पितरौ किं तान् मृत्युना दण्डयतः ? देवीकृपातः स्वप्नादेशो भवतां कृते आसीत् । मम रक्षकस्तु भवानेव । घातकस्यासि-

मुखात् मम त्राणं भवतैव विहितम्। अहं देवीं न तथा विजानामि यथा भवन्तम्। भवानेव मे देवता।

×× ×× ××

छागोऽसौ शरणपुरस्य मातुः काल्याः त्यक्तबलिरासीत्। इयं कालीमाता तु न केवलं प्रतिमामयी, अपि तु प्रत्यक्षफलदात्री देवी। भक्त्या आहूता सती साक्षादुत्तरं ददाति। परन्तु सातीव छागबलिप्रियाऽस्ति। छागबलिविनिमयेन यत् किञ्चिद् याचते उपासकः तदविलम्बेन सा प्रयच्छति। वरप्रदाने सा यथा मुक्तहस्ता शापप्रदानेऽपि तथैव मुखरा। प्रकृत्या कोपनशीला सा यदा कुपिता भवति तदा सर्वेषां गतिश्चिन्तनीयैव भवति। बलिप्रदानसमये घातकं विहाय यदि कश्चिदन्यः देव्याः सम्मुखे भ्रमादपि आयाति तर्हि तस्य महदनिष्टं भवति। सा तु साक्षात् तस्य रक्तं चक्षुर्भ्यामेव पिबति। अतः, बलिकाले प्रायो न कोऽपि तस्याः सम्मुखमायाति। बलिदर्शनेच्छवः भक्तास्तु प्रच्छन्नतया बलिं पश्यन्ति। तद्रक्तं च मस्तके लेपयन् स्वमनोरथान् अभिलषन्ति।

बलिकालादतिरिक्तेऽपि समये यदि कोऽपि देव्याः सम्मुखेऽपचारमाचरति तर्ह्यपि माता तं साक्षाद् दण्डयति। वर्षद्वयात् प्राक् कालिपूजावसरे काचित् नाट्यसंस्था तत्र आगतासीत्। नाटकमञ्चनात् पूर्वं केचन अभिनेतारो देव्याः दर्शनार्थमागत्याज्ञानेन तस्याः अनादरं कृतवन्तः। 'लुंगी'-वस्त्रं, चर्मनिर्मितं पादत्रं च परिधाय यदा ते प्रणामार्थं नतमस्तका अभवंस्तदा स्वमस्तकानि पुनः उपरीकर्तुं नाशक्नुवन्। अष्टादशयुवानस्तत्रैव भूमौ भग्नग्रीवा अपतन्। एतदलौकिकं दृश्यं दृष्ट्वा नाट्यप्रबन्धकः भीतोऽभवत्। तेषां जीवनरक्षार्थं परामृष्टः पूजकः रघुनाथदासः प्रतीकारस्य उपायरूपेण देव्यै अष्टादश-छागानां बलिम् आदिष्टवान्। वस्तुतः, छागप्रतिश्रुतेः परं ते सर्वे उत्थाय उपविष्टवन्तः। मातुः काल्याः जयजयकारेण गगनपवनौ मुखरितावभवताम्। घण्टामर्दलनादेन च कालीपीठम् अकम्पत। एवं श्रूयते यत् तस्मिन् वर्षे सा नाट्यसंस्था निःशुल्कमेव तत्र नाटकमञ्चनमकरोत्।

×× ×× ××

ह्य इव स्मर्यते यदा कालीपूजावसरे केनचिद् भक्तेन बलिप्रदानार्थम् एषः छागशिशुः मातुः सम्मुखे आनीत आसीत् । दीपावली-अमावास्यायाः पूर्वस्यां रात्रौ देवीसम्मुखे सर्वप्रथमं कुष्मांडबलिः प्रदीयते । तदनन्तरमेव छागबलिकार्यक्रमः प्रारभ्यते । एवम् रात्रेः अन्तिमे प्रहरे प्रारब्धः स बलिकार्यक्रमः दिवा-दशवादनं यावत् प्राचलत् तस्मिन् वर्षे । तथापि पञ्चषाः बल्यः अवशिष्टा आसन् । स्नानपूजनात् परं यदाऽयं छागशिशुः बलिस्थानमानीतः तदाऽकस्माद् देव्याः मस्तकात् पुष्पमेकमपतत् । एतं चमत्कारं दृष्ट्वा, तञ्च देव्याः साङ्केतिकमादेशमङ्गीकृत्य पूजकः घातकमादिष्टवान्—"विरमत, विरमत घातक ! एषः छागशिशुः वधयोग्यो नास्ति। एवं मातुरादेशोऽस्तीति वयं प्रतिजानीमः।"

वर्षद्वयात् प्रागपि तत्रैतादृशी काचिद् घटना घटितासीत् । अज्ञानवशात् कश्चिद् भक्तः श्वानोच्छिष्टमेकं छागं बलिप्रदानार्थमानीतवान् । तमपि छागं देवी न स्वीकृतवती। एवं मस्तकात् पुष्पं पातयित्वा सङ्केतेन, स्वप्नादेशेन च तादृशीं बलिं स्थगितवती। अद्य प्रसङ्गान्तरे पुनस्तथाविधायाः घटनायाः पुनरावृत्तिं दृष्ट्वा भक्ताः देव्याः दयामयरूपं भूयो भूयः प्रशंसितवन्तः। बल्याः स्थगनानन्तरं सर्वे देव्याः स्वप्नादेशप्रतीक्षायां समुत्सुकाः अञ्जलिबद्धाश्चातिष्ठन् । अस्य छागशिशोः कृते देव्याः क आदेशोऽस्तीति जिज्ञासमानास्ते केवलं परस्परस्य मुखानि दृष्टवन्तस्तदानीम् ।

कियत्क्षणानन्तरं ग्रामस्य 'परिआ'-नाम्नि रजके देवी प्रादुर्भुता। नृत्यं कुर्वन् सः देवीमण्डपमागत्य पूजकाय आदिष्टवान्—"अयं छागशिशुरद्यापि मातृस्तन्यपायी वर्तते । यस्य छागस्य वयः एकवर्षादपि न्यूनं भवति सः बलियोग्यो न भवति। अतः, इदानीमेव मुञ्चतामेनं छागशिशुम् । तं न कोऽपि विक्रेष्यति, न वा कोऽपि बन्द्धुं शक्ष्यति । स च मदाश्रयेऽत्र शरणपुरग्रामे अभयो विचरिष्यति" ।

तस्मात् क्षणादारभ्य अद्य यावत् सम्भवतः दशवर्षेभ्यः सोऽत्रैव अभयो विचरति । यदा, तदा यत्तद् खादितुमिच्छति सः छागः भक्ताः ग्रामवासिनश्च तस्मै अचिरं प्रदत्तवन्तः, प्रददाति च । वटकं, मिष्टान्नं, सुस्वादुप्रसादं च विहाय सोऽन्यत् किमपि न खादति । तेनाद्यापि घासः

न खादितः इति ग्रामवासिनः प्रमाणयन्ति । परन्तु विगतेभ्यः दशदिवसेभ्यस्तस्मिन् कथमेतादृशं परिवर्तनं जातमिति न कोऽपि अवबोद्धुं शक्नोति ।

कदाचिदेष उन्मत्तो जात इति विश्वसन्तः जनास्तस्माद् बिभ्यति सांप्रतम् । एवं संकटापन्नास्ते ग्रामवासिनः मातुरादेशं विस्मृत्य विवशा अद्य बलिरूपेण तस्य वधविषये विचारयन्त आसन् । परन्तु छागेऽकस्मात् किमर्थमेषः अलौकिको व्यवहारः ? किमसौ तेषां वचांस्यवगत्य एवं व्यवहरति ? अथवा मात्रा प्रदत्तया सद्बुद्ध्या अयमेवं व्यवहरन्नस्ति ? सम्भवतः, एतादृशेन मृदुव्यवहारेण कदाचित् सः स्वापराधस्य प्रायश्चित्तं चिकीर्षति ।

छागस्यैतादृशमलौकिकव्यवहारं दृष्ट्वा ग्राममुख्यः केदारबाबुः ग्रामवासिनां मुखानि अपश्यत् तेषामभिमतं विज्ञातुम् । परन्तु तेषां प्रतिक्रियाश्रवणात् पूर्वमेव सः स्वकीयमभयहस्तं तदुपरि प्रसारितवान् । सामूहिककरतालिकावादनपुरःसरं ग्रामवासिनः तन्मतं समर्थितवन्तः ।



निर्यासो नापितमुण्डे

—"अये महाशय ! कुत्र मे हस्तः ? स्वहस्तमन्विष्य न प्राप्नोमि। हे भ्रातः ! मम हस्तसमीपे तत्र कोऽस्ति ? इतः पश्यन्तु, अहं वदामि। सदयो भूत्वा कण्डूयमानं हस्तं मे स्वकरजैः शाम्यताम् किञ्चित्। ऊः……! बहु कष्टम् अनुभवामि।" बस्-यानस्याकथनीयसंमर्दात् कश्चिद् यात्री चीत्कुर्वन् आसीत् यस्य स्वहस्तोऽपि अपरहस्तस्यान्वेषणेऽसमर्थ आसीत्।

—"महाशय ! मत्सविधे कस्यचिद् भद्रजनस्य हस्तो दृश्यते। कृपया वदतु, भवतां हस्तः गौरवर्णः अथवा कृष्णवर्णोऽस्ति ? स्थूलो वा क्षीणो वा ? अप्येषः लोमशोऽथवा लोमहीनश्चिक्कणः" ? कण्डु-पीडितस्य यात्रिणः यथोक्तं करुणरसं दृष्ट्वा दयार्द्रः सन्नहं पृष्टवान्।

—"किं पृच्छति भवान् ? किं वा प्रयोजनं भवतां मम हस्तस्याकृत्याम् ? कृष्णः, गौरः, स्थूलः, क्षीणः, लोमशः, चिक्कणः यो वा हस्तः भवतां समीपेऽस्ति तस्य कण्डूः अपनयतु। बहु कष्टमनुभूतं मया। कृपया कालक्षेपं न करोतु। अविलम्बेन संपादयतु लोकहितकरं कार्यमिदम्। अहं त्वग्रिमे स्थानकेऽवतरिष्यामि। किं जातम् ? विलम्बः किमर्थम् ?" मन्ये किञ्चिद् अतिष्ठोऽभवत् सः यात्री कण्डूपीडया।

—"भवांस्तु मम प्रश्नस्योत्तरं न ददाति ? संप्राप्ते चोत्तरेऽहं हस्तं चालयिष्यामि।" परोपकारस्य महतीं पटुतां प्रदर्श्याहमविलम्बेनोत्तरं प्राददाम्।

—"ऊः··· ! इतः परं न सोढुं समर्थोऽस्मि। अस्तु, शृणोतु तावत्—अहं गौरवर्णोऽस्मि। हस्तो मे लोमहीनः, क्षीणश्च। शीघ्रं सम्पादयतु। किं जातम् ? विलम्बः किमर्थम्" ? कण्ड्वा पीडितो भद्रजनः विलम्बं सोढुमसमर्थः सन्नवदत्।

—"तर्हि अहं दुःखितोऽस्मि महाशय ! मत्सविधे तु एकः कृष्णवर्णः हस्तोऽस्ति । स तु स्थूलः, लोमशोऽपि वर्तते । अन्यथा न मन्यताम् महाशय ! अहं निरुपायोऽस्मि । भवता वर्णितेषु त्रिषु च स्वरूपेषु एकमप्यस्मिन् हस्ते न दृश्यते । मयि विश्वसितु, अन्यथाहं साहाय्यमकरिष्यम्"। असहायस्वरेणाहं स्वीयमसामर्थ्यं प्रकटितवान् ।

—"महाशय ! ममपार्श्वे त्वेकः क्षीणकायः, लोमशून्यश्चगौरहस्तोऽस्ति । मन्ये सम्भवतः भवतामेव स्यात् । त्वरया न भाव्यम् । किञ्चिदपेक्षताम् । आपरितोषं ते कण्डवपनोदनं करिष्ये ।" मादृशः कश्चिदपरोऽपि परोपकारी भद्रजनः कण्डूयनकष्टमनुभवन्तं तमाश्वासितवान् ।

×× ×× ××

—"किम् ? किमाचरति भवान् ? भवतो गृहे मातारः, भगिन्यः, वध्वो वा न सन्ति किम् ? बस्–मध्ये दिवालोके मत्कृते अश्लीलेङ्गितं प्रदाय हस्तं मे चालयन्नस्ति । अस्मद्देशे दुर्नीतयस्तु सीमानमतिक्रामन्ति अनुदिनम् । का च दुरवस्था भविष्यत्यस्य देशस्य" ? कलकण्ठेन काचिद् भद्रमहिला अश्राव्यां गालिमददात् सर्वेषां समक्षम् ।

— 'केन, कुत्र, किमाचरितम् ? कश्चास्ति स दुराचारी ? तस्य दुःसाहसं पश्यतु । दिवालोकेऽपि अत्याचारः नारीणामुपरि । दास्याः पुत्रं बलाद् आकृष्य बहिर्निक्षिप्यताम् । येन तस्य नारीधर्षणरूपा कुप्रवृत्तिर्व्यपगमिष्यति ।"

यथा भवन्तः जानन्ति–नारीणां कृतेऽत्यन्तं सम्वेदनशीलो वर्ततेऽस्माकंसमाजः । सम्पूर्णस्य बस्-यानस्य यात्रिणो वानरा इव दन्तान् प्रदर्श्य अग्रे सृतवन्तः—"सार्वजनीने स्थले, दिवालोके च नारीणामुत्पीडनम्"। अस्माकं देशे जनाः सर्वं सहिष्यन्ते न तु नारीनिर्यातनाम् । बस्मध्यादागच्छन्नासीत् 'धूम्-धाम्', 'भुस्-भास्'-शब्दः । मन्ये कश्चित् खण्डयुद्धः प्रारभत । यो यत्रासीत् चपेटां, मुष्टिकां च मारितवान् । नैकोऽपि प्रहारः व्यर्थो गच्छति स्म । तत्रत्याः सर्वे परस्परस्य समीपे दण्डायमानस्योपविष्टस्य वा जनस्योपरि प्रहारं कृतवन्तः । कोऽत्र दोषी, कश्च निर्दोषीति निर्णेतुं कस्य वा समयोऽस्ति, कुत्र वाऽवसरः ?

तावता मूले छिन्ने यथा कश्चिद् वृक्षः भूमौ पतति तथैव सशब्दः कश्चिद् चलमानाद् बस्यानान्नीचैः राजमार्गेऽपतत् । तञ्च दृष्ट्वा यात्रिद्वयं विहाय बस्यानस्थाः सर्वे यात्रिणः एकस्वरेणावदन्—

—"दास्याः पुत्रः ! श्यालकः !! स्वापराधस्य कृते समुचितं दण्डं प्राप्तवान् । भविष्यत्काले एवंविधं दुष्कर्म समाचरितुं साहसमपि न करिष्यति। एतादृशमाघातं सम्प्राप्य यदि स न मरिष्यति तर्हि आमरणं चिकित्सालये दिनानि गणयिष्यति। अथवा, आजीवनं पङ्गुः भूत्वा स्वापकर्मणः कृते पश्चात्तापं करिष्यन् धृतः शरीरेण मृत इव स जीविष्यति ।"

परन्तु वस्तुतः येन दुःसाहसिकं दुष्कार्यमिदं समाचरितम्, येन च सः दुराचरणाय प्रचोदितः, उभौ तौ नीरवावेवास्ताम्। तावपि परस्परं नाभिजानीतः । परन्तूभयोर्मनसि समान एव भयः। उद्घाटिते च रहस्ये महती दुर्गतिर्भविष्यतीति ।

चालकेन बस् स्थगितम्। अधिसंख्याकाः यात्रिणः युगपदेव बहिरागतवन्तः। परं ते सर्वेऽत्र कं पश्यन्ति ? तस्यैव बस्-यानस्य मार्गपरिष्कारकः, हसमुखः सः किशोरः रक्ताक्तो भूमौ लुठति। तं दृष्ट्वा सर्वे चैकस्वरेणावदन्—"स्वामी तु पनसमखादत्, परं हन्त ! निर्यासं नापितमुण्डे अप्रोञ्छत् ।"

विजयी पराजयः

निरन्तरमात्मचेष्टायामसफलः डॉ० जयन्तविश्वालोऽद्य निरुपायः। स न केनापि प्रकारेण हेमन्तं जीवयितुं शक्नोति। 'एड्स'-रोगेणाक्रान्तः स्वजीवनस्यान्तिमपर्याये चिकित्सालये जीवनाय संघर्षरतः हेमन्तः। 'एड्स' तु साम्प्रतं दुरारोग्यव्याधिरूपेण परिगण्यते विंशशताब्द्या अन्तिमे भागे। एकविंशशताब्द्यामप्ययं रोगः महातङ्करूपेण परिगणितो भवष्यतीति विश्वस्वास्थ्यसंस्था-(WHO) ऽनुमनुते। यदि हेमन्तस्य मृत्युरनिवार्यस्तर्हि तद्विषये गोपनेन को लाभः? स यदि स्वमृत्यु-विषये मृत्योः पूर्वमेव ज्ञास्यति तर्हि कदाचित् स्वान्तिमेच्छापूरणाय कमपि सुयोगं लप्स्येत। दूरदर्शने, सम्वादपत्रे, आकाशवाण्यां वा यदि तस्य मृत्योः पूर्वसन्देशः प्रचारयिष्यते तर्हि समाजस्य कश्चिदुपकारोऽपि स्यात् तेन।

एड्स—विशेषज्ञस्य डॉ० जयन्तस्याकलनानुसारं हेमन्तः अधिक-तमं मासमेकं जीवितुं शक्नोति। अवशिष्टेऽस्मिन् एकमासे कां वा विशिष्टाम् अन्तिमेच्छां पूरयितुं शक्ष्यति सः? मरणं यावत् जनानां पुरातनेच्छाभिः सह नूतनेच्छा अपि जागरिताः भवन्ति। इच्छा न कदापि समाप्तिमेति, एष्यति वा। आशरीरमिच्छाया अस्तित्वम्। अतः, अन्तिमेच्छायाः प्रश्नो हि निरर्थकः। तस्याः पूरणं कथं सम्भविष्यति?

परन्तु अप्रियं सत्यमिदं हेमन्तं ज्ञापयितुं न शक्नोति डॉ० जयन्तः। चिकित्सकः सः। एड्सविशेषज्ञोऽपि। प्रतिदिनम् अन्तिमे मुहूर्ते आगतान् प्रायः सर्वान् रोगिणः स एतादृशमप्रियसत्यसन्देशं श्रावयन्नस्ति। अद्य किमर्थमेतां वार्तां हेमन्तं ज्ञापयितुं तस्य हृदयं कम्पते? चिकित्सका अपि मनुष्या इति तु सत्यम्। किन्तु तेषां हृदयं लौहवत् काठिन्येन भाव्यम्। यमदूतवत् तेऽनायासेन रोगिणं तस्य मृत्युसम्वादं श्रावयितुमभ्यस्ताः भवन्ति किल?

हेमन्तो नवयुवकः। स्नातकविज्ञानकक्षायाश्छात्रः। न जाने कं, कं यौवनोचितं स्वप्नं दृष्ट्वा सः प्रतिदिनमात्मविह्वलोऽभविष्यत्। परन्तु हन्त ! सोऽद्य स्वजीवनस्यान्तिमदिनानि आकलयितुं विवशोऽस्ति। तस्य पितरौ, प्रेमिका मनीषा, अन्ये च सहपाठिनः प्रतिदिनं तं मिलितुमागच्छन्ति। एनमधिकृत्य बह्व्यः आशाः भवेयुस्तेषामन्तःकरणे, गभीरे चावचेतने। किमिदानीं स एतन्निष्ठुरसत्यं श्रोतुं प्रभविष्यति ?

बहुवारं मनसि साहसं सञ्चयन् हेमन्तस्य शय्यायाः समीपं गतवान् डॉ० जयन्तः। परन्तु तस्योदासमुखं दृष्ट्वा स पराजितो भवति प्रतिवारम्। तस्मिन् मुखे दीर्घजीवनस्य विफलाशाऽद्यापि देदीप्यमाना तमुपहसति। सः केवलं तस्य कुशलजिज्ञासां कृत्वा कापुरुषवत् प्रत्यावर्तते। नियताश्च सन्ति तस्य ताः जिज्ञासाः—

—"कथं ते स्वास्थ्यम् ? अपि पीडामनुभवसि ? रात्रौ निद्रा कथं भवति ? भोजने किं किं गृहीतम् ?" एते प्रश्नास्तु डॉ० जयन्तस्य मुखस्थाः सन्ति। यदा, कदा स हेमन्तं मिलित्वा एतानेव प्रश्नान् प्रष्टुं न विस्मरति।

विंशतिवर्षवयसि किं कश्चिद् स्वमृत्युवार्तया प्रसन्नो भविष्यति ? अथवा, किं मृत्युः विंशतिवर्षीयं नवयुवकं दृष्ट्वा भीतः पलायिष्यते ? परन्तु हेमन्ते युवशक्तेः तादृशी उद्दामता वा कुत्रास्ति यां दृष्ट्वा मृत्युरपि भीतो भविष्यति। अपरं च, मृत्युर्न जानाति यद् दयानामा कः पदार्थः संसारे विद्यते इति। वस्तुतः, चिकित्सकानां कृते सम्वेदना गुणो न भवति अपितु दोष एव सः। अस्तु, विषयेऽस्मिन् तस्य पितरावेव ज्ञापनीयौ। परन्तु एकपुत्रकौ तावपि सम्वेदनीयौ स्तः। तौ च जीवनस्य चरमावस्थायां वर्तेते। अतः सः स्वयं हेमन्तेनैव सूचित आसीद् यत् रोगस्य विषमावस्थाविषये तस्य पितरौ न सूचनीयाविति। अन्ततः डॉ० जयन्तः निर्णीतवान् यत् येन केन प्रकारेण हेमन्त एव ज्ञापनीयोऽस्ति विषयेऽस्मिन्। कश्चित् पूर्वाभ्यासोऽप्यपेक्षते एतदर्थम्। अतः, मनसा तेन सह कश्चित् सम्वादः प्रस्तुतः—

—हेमन्त !

—आम् !

—तव कस्मिन् अधिका आस्था वर्तते ? जीवने उत मृत्यौ ?

—मृत्यौ अवश्यम् । जलबुद्बुदवदस्मिन् जीवने किं कस्याप्यास्था भवितुमर्हति ?

—समीचीनम् । ममापि अत्रैव सहमतिः । यतो हि इच्छन्नपि कश्चिज्जीवितुं न शक्नोति । किन्तु मरणे यदि कस्यचिदिच्छा स्यात् तर्हि न काऽपि शक्तिस्तमवरोद्धुं शक्ष्यति ।

—परन्तु अद्यायं प्रश्नः किमर्थं महाशय !

—न कश्चिद् विशेषः । एवमपृच्छम् ।

—किं भवतामपि जीवने आस्था नास्ति । आश्चर्यम् ! एकविंशशताब्द्याः द्वारदेशे सन्तः चिकित्सका अपि दार्शनिका भवन्तीति इदंप्रथमतया जानामि । किमेतादृश्या आस्थया रोगिणो मंगलं कर्तुं प्रभविष्यन्ति भवन्तः ?

अग्रे किमपि चिन्तयितुं नाशक्नोत् डॉ० जयन्तः । अस्यान्तिमप्रश्नस्योत्तरं तु तत्सविधे नासीत् । यद् वा भवतु, एतावत्या भूमिकया सोऽद्य हेमन्ताय सर्वं तथ्यं विज्ञापयिष्यति । सः द्राक्तरो भूत्वा यद्येवं चिन्तयिष्यति तर्हि अन्येषां रोगिणां हितं कथं सम्पादयिष्यति एवंविधायामातत्याम् ? अन्ततः, किञ्चिज्जलं पीत्वा हेमन्तस्य शय्यामुपसर्पितवान् डॉ० जयन्तः । संयोगवशात् हेमन्तः एकाकी एवासीत् तदानीम् । शयानः सः कस्याश्चित् साहित्य-पत्रिकायाः कथा-विशेषाङ्कं पठन्नासीत् । असमये स्वसमीपे डॉ० जयन्तं दृष्ट्वा अभिवादनपूर्वकम् शय्योपरि उपाविशत् सः ।

—हेमन्त !

—आम् !

ततः पुनर्नीरवोऽभवत् डॉ० जयन्तः । पूर्वाभ्यासानुसारमग्रे सम्वादं प्रवर्तयितुं नाशक्नोत् सः । फलतः, अतीव विव्रतोऽभवत् । किमर्थं तस्यायम् पराजयः हेमन्तस्य समीपे ? हेमन्तः किन्तु डॉ० जयन्तस्य विवशतामधीत्य स्वाभाविकशैल्या अवदत्—

—महाशय ! मद्विषये भवान् अधिकं न चिन्तयतु। अहं तु कुशली वर्ते। भवतामिदृशीमवस्थां दृष्ट्वा मयि दया आगच्छति। जातस्य हि मृत्युः ध्रुव इति सृष्टेः परमं सत्यम्। अहं स्पष्टं जानामि यदहं अधिककालं जीवितो न स्थास्यामि। नैतद् भवतामसामर्थ्यम्। मद्दृष्टौ न कोऽपि दोषी वर्तते। एतत् तु केवल मम दौर्भाग्यम्, यस्य फलाफलं मम पितरावेव भोक्ष्यतः। मम रोगविषयेऽहं पूर्णसचेतनोऽस्मि। अहं तु विज्ञानछात्रोऽस्मि। रोगस्य लक्षणात्, किञ्चित्, किञ्चिद् अववोद्धं शक्नोमि। भवद्विषये अहं चिन्तित आसम्। साम्प्रतं भवते सर्वं ज्ञापयित्वा किञ्चिदाश्वस्तोऽस्मि।

हेमन्तस्यैतादृशीं स्पष्टोक्तिं श्रुत्वा स्वकर्णौ विश्वसितुमसमर्थ आसीत् डॉ० जयन्तः। अपि स एतत् सर्वं सत्यं शृणोति ? अथवा कश्चिदयं दुःस्वप्नः ? किञ्चिद् विचिन्त्य पुनः प्रारभत हेमन्तः—

—"इतः परं कतिपयदिनानि जीविष्यामि इति तु न जानामि। परन्तु भवत्प्रदत्तं रोगविवरणं दृष्ट्वाऽनुमिनोमि यत् मम जीवनमिदानीं दिवसैः गणनीयमवशिष्यते न तु मासैः। 'एड्स' तु साम्प्रतं दुरोरोग्यो व्याधिरस्ति। अन्तिमावस्थायां किं वा भवान् कुर्यात् ? मम पीडा तु समीचीनतया भवता शामिता। अतः भवते धन्यवादान्, स्वकीयं कार्तज्ञ्यं च ज्ञापयामि। भवान् यदीदृशं भावं प्रदर्शयिष्यति तर्हि मम पितरावपि अप्रियमिदं तथ्य ज्ञास्यतः, येन महदनिष्टं भवेत्। आजीवनमहं तौ सुखिनौ द्रष्टुमिच्छामि। एतादृशीं सूचनां श्रुत्वा यदि तौ रोदिष्यतस्तर्हि आततिग्रस्तोऽहं नियतमृत्योः प्रागेव मरिष्ये, येन मम जीवनविषये भवता प्रदत्तमाकलनमप्यसत्यं सेत्स्यति।"



पद्मारात्री

अकस्मात् स्वबालाननाथांस्त्यक्त्वा तारा कुत्रापलायत इति न कोऽपि जानाति। वर्षाणि यावत् भरणपोषणैः ये लालिताः, पालिताश्च तेषां मोहं कथं सा त्यक्तवती ? अपि तारा कैश्चिद् अपहृताऽस्ति ? अथवा स्वेच्छया स्वपत्युः समीपं गता वर्तते ? यदि पत्युः समीपं गता स्यात्तर्हि तस्याः प्रत्यावर्तने एतावान् विलम्बः किमर्थम् ? सा तु एवमनेकवारं स्वपतिं मिलितुं गच्छति। परन्तु समयेनैव प्रत्यावर्तते स्म। अद्य पुनः किं जातम् ?

ताराया: वस्तुतः किं नामासीदिति तत्रत्यः न कोऽपि जानाति। परन्तु अस्य महानगरस्य पद्मायां तिष्ठन्तो जनास्तां "तारा" अथवा "टाउन्तारा" इति नाम्ना जानन्ति स्म। यतश्च तादृश्यः रूपवत्यः विरला एव भवन्ति पद्मासु। तस्याः रूपं दृष्ट्वानुमातुं शक्यते यत् सा मूलतया कस्यचित् कुलीनवंशस्य सन्ततिर्भवेत्। परिस्थित्याः दासी सा विवशतयाऽत्र तिष्ठतीति पद्मास्थिताः सर्वे तस्याः कञ्चित् सम्मानमपि कुर्वन्ति। इदानीं सन्तानत्रयस्य माता सा। तथापि तस्याः वास्तविकं वयः सहजतयाकलयितुं न शक्यते। कस्यचित् प्रथमश्रेणी-सर्वकारवृत्तेः सुविधाभोगिनः पदाधिकारिणः पत्नीव सा काचिद् आधुनिकापि दृश्यते। स्वगतौ, चलने, परिधाने वा सा नगरसभ्यतया सुष्ठु परिचिता इव प्रतीयते। श्यामापि सा सुन्दरस्य सुपुष्टशरीरस्य चाधिकारिणी वर्तते इति निःसन्देहं वक्तुं शक्यते। अतः, पथि गच्छतां जनानां दृष्टिः स्वत एव तस्यामाकृष्टा भवति। मुक्ताकाशतले पद्मास्थिते च नलकूपे यदा सा स्नाति तदा दश, पञ्चाशद् वा नेत्रयुगलं आर्द्रवसनविजडितं तस्याः यौवनं द्रष्टुं घूर्णयत् तिष्ठति।

त्रिभिः सन्तानैः सह तारा पद्मायां तिष्ठति, पद्मायाञ्च स्वपिति। वर्षातपयोः रक्षार्थं सा 'जनता-साइकल्मार्टः' लघ्वावासस्य विस्तृ-

तालिदस्य शरणं याति । सदयश्च तस्याधिकारी तां न प्रतिवदति तत्र स्थातुम् । तस्यापि तत्र स्वार्थो वर्तते । ताराया उपस्थितौ तस्य ग्राहक-संख्यायाम् अनुदिनं वृद्धिर्जायते इति सोऽनुभवति । स्वद्विचक्रिकाणां नवीकरणावसरे ते ग्राहकास्तारां दृष्ट्वा कालातिपातं कुर्वन्ति स्म। साऽपि तेषां मनोरञ्जनार्थं भवतु, नारीसुलभचापल्यवशाद् वा भवतु यदा, कदा स्वाङ्गवैभवं प्रदर्शयन्ती तिष्ठति । स्वसन्ततये स्तन्य-प्रदानच्छलेन सा कदाचित् स्तनयोर्वस्त्रावरणं लघूकरोति । तेन चाप्या-यिताः, उत्साहिताश्च भवन्ति किशोराः, युवानः, अर्द्धजराः, वृद्धाश्च ग्राहकाः । एवं सुष्ठु प्रचलति 'जनतासाइकल-मार्टः' लघुव्यवसायम्।

ताराऽत्र किं कार्यं करोतीति प्रायः न कोऽपि जानाति । स्वस्य, बालानां चोदरं भर्तुं सा कां, कां जीविकामाश्रयते इति सा स्वयमेव जानीयात् । कस्तस्याः पतिः ? तौ च दम्पती सर्वथा विच्छिन्नावेव तिष्ठतः अथवा यदा, कदा कुत्र मिलतः इत्यपि तथ्यं रहस्यमयं वर्तते । परन्तु समये, समये सा स्वकनीयांसौ बालौ ज्येष्ठपुत्रस्य संरक्षणे निधाय कुत्रचिद् गच्छति । पञ्चवर्षेभ्यः प्राग् यदा साऽत्र प्रथमतया-गतासीत् तदा एकस्यैव सन्तानस्य जननी आसीत् । परन्तु एषु पञ्च-वर्षेषु सा अपरस्य सन्तानद्वयस्य माता कथमभवदिति जिज्ञासमानाः केचन जनाः केवलं स्वभ्रुवमाकुञ्चयन्तस्तिष्ठन्ति ।

दिनस्य द्विप्रहरं यावत् तारा न प्रत्यावर्तत इति वार्तां ज्ञात्वा 'जनता-साइकलमार्टो'ऽधिकारी स्थानीयं पोलिस्स्थानकं गत्वा सर्वं तथ्यं सूचितवान् । तावत् तस्याः सन्तानानि क्षुत्पीडितानि, रोदनशी-लान्यासन् । उदारचेता सः तेषां कृते सामयिकीं भोजनव्यवस्थामपि कृतवान् । बालानां तेषामीदृशीं दुर्दशां दृष्ट्वा यथाशीघ्रं भटास्तस्या अन्वेषणमप्यङ्गीकृतवन्तः ।

तस्मिन्नेव दिने सायंकालं यावद् भटास्तारामन्वेष्टुं सफला अभवन्। समुद्रकूलस्थे निर्जने कस्मिंश्चिद् वस्त्रपटवेश्मनि भटाः तामचेतनावस्थायां नग्नां प्राप्तवान् । विगतायाम् रात्रौ वहुभिर्मद्यपैर्धर्षिता सा तत्राचेतना भूत्वा जीवनाय संघर्षरतासीत् । महानगरस्य ते भटास्तां सर्वकार-चिकि-त्सालयं स्वास्थ्यलाभार्थं, परीक्षणार्थं च प्रेषयित्वा तत्र संपृक्तानि असामा-

जिकतत्त्वानि अन्वेष्टुं प्रारभन्त । ते अनतिदूरे नारिकेलवृक्षे प्रतिबद्धं कञ्चित् निःसहायं पुरुषमपश्यन् यस्य मुखमपि पटावृत्तमासीत् । यावद् भटास्तस्य मुखमुदमोचयन् तावत् सः त्रिगत-रात्रौ संघटितं सर्वं वृत्तान्तं सविस्तृतं वर्णितवान् ।

भटैर्गृहीतः सः पुरुषः स्वनाम जगमोहनः (जग्गु) इति निवेदितवान् । स तु न कोऽप्यन्य आसीद्, अपि तु कथा-नायिकायाः तारायाः पतिः । इहकालस्य, परकालस्य च देवता । अपराधेऽस्मिन् सम्पृक्तानामसामाजिकतत्त्वानामन्यतमोऽपि सदस्यः । पञ्चवर्षेभ्यः पूर्वं यदा सोऽमुं महानगरं वृत्त्यन्वेषणार्थं स्वग्रामादागतवान् आसीत् तदा बहुधा यतमानेन तेन न काऽपि क्षुद्रा महती वा वृत्तिर्लब्धा । अतः स्वस्य, स्वपत्न्याः, सन्तानस्य च भरणपोषणार्थं सहजतयोपलब्धामिमामसामाजिकीं वृत्तिमनिच्छया स्वीकृतवान् सः । स्वपत्नीं, बालकपुत्रं च तेषामसामाजिकतत्त्वानां पापदृष्ट्याः रक्षितुं पद्मावासादतिरिक्तमुपायान्तरं नासीत् तत्सविधे । तस्माद् दिनात् प्रारभत तारायाः पद्मावासरूपम् एकाकिजीवनम् । भरणपोषणं तु पत्या जगमोहनेन प्रच्छन्नतया दीयते स्म तस्याः कृते ।

जगमोहनस्तु स्ववृत्तिविषये कदापि पत्न्यै सत्यं न निवेदितवान् । नगराद् दूरे काञ्चिद् रात्रिवृत्तिं समाचरति । अतः स्वकार्यानुरोधेन सः तया सह न स्थातुमर्हतीति स्वविवशतां प्रकटितवान् । परन्तु वस्तुस्थितिस्तु काचिद् भिन्नैवासीत् । विगतेषु पञ्चवर्षेषु तेन, तत्सहकर्मिभिश्च बहूनां धनं, जीवनञ्च चोरितम् । बह्वीनां विवाहितानामविवाहितानाञ्च युवतीनां सतीत्वमपहृतं तारायाः अज्ञाने । तस्यैवापकर्मणः फलं सोऽद्य भुङ्क्ते इत्यनुभवन् पश्चात्तापेनाग्निना दग्धीभवति ।

दौर्भाग्याद् ह्य रात्रौ जगमोहनस्य सहकर्मिणः मद्यपानानन्तरं तारां समुद्रकूले स्वपत्या सहापश्यन् तयोः पूर्वनियोजिते संकेतस्थले । तस्याः सौन्दर्येण आकृष्टास्ते उपभोगार्थं तारां समर्पयितुं जगमोहनाय । निवेदितवन्तः । विरोधं कुर्वाणं जगमोहनं ते नारिकेलवृक्षे प्रतिबध्य तस्यैव समक्षं तारां निर्ममतया धर्षितवन्तः ।

स्वसन्तानानि व्यवस्थितानि दृष्ट्वा स्वेच्छया कारावासमङ्गीकरिष्यतीति प्रतिज्ञातेन जगमोहनेन अनुरुद्धाः भटास्तस्मै दयां प्रदर्शितवन्तः । जगमोहनाय स्वसन्तानेभ्यः मिलितुमनुमतिं च प्रदत्तवन्तः । एवमधिकोपार्जनार्थमागतः कश्चिद् ग्रामीणः महानगरस्य महामायया छलितोऽभवदिति जगमोहनाय संवेदनां ज्ञापितवन्तः पद्मायां तिष्ठन्तस्तारायाः प्रतिवेशिनः ।

प्रियतमा दैनन्दिनी तथा मे श्रीमती

अहमिदानीं भवन्तं व्यक्तिनिष्ठामात्मीयां काञ्चिद् आत्मकथां श्रावयितुं सन्नद्धोऽस्मि। सधैर्यं यदि भवन्तः कथामिमां समाप्ति यावत् श्रोष्यन्ति तर्हि कथाकारस्य धन्यवादभाजनानि भविष्यन्तीत्यत्र सन्देहस्यावकाशो नास्ति। कथाकारोऽयम् इदंप्रथमतया जीवनस्य किमपि व्यक्तिगतं, गोपनीयं चोपाख्यानं सार्वजनीनरूपेण श्रावयितुमात्मानं प्रस्तौति। भवन्तः किन्तु स्वतुण्डवाद्येन वार्तायाश्चास्याः प्रचारं, प्रसारं वा न कृत्वा गोपनीयतामक्षुण्णां स्थापयन्तु इति मे सहस्रशोऽनुरोधः। लेखकस्य विश्वसनीयाः स्थास्यन्ति चेत्तर्हि भविष्यत्कालेऽप्येतादृश्यः नैकाः कथाः पठितुं, श्रोतुं वा शक्ष्यन्ति विवधपत्रपत्रिकासु। अन्यथा इच्छया भवतु, अनिच्छया वा भवतु अनया कथयैव भवन्तः लेखकस्य इतिश्री-रूपमन्तिमवाक्यं श्रोष्यन्ति। आगच्छन्तु तर्हि अधिकं कालक्षेपं न कृत्वा पूर्वापरप्रसङ्गाभ्यां सह कथामिमां प्रारप्स्यामहे—

भवन्तो मां कवेर्लेखकस्य वा स्थानं ददातु, न वा ददातु, अहं किन्तु मम दैनन्दिन्यामतीव प्रीणामि। वार्तामिमां श्रुत्वा भवन्तश्चकिताः, हतबुद्धयश्च भवेयुर्यत् लेखकस्य दैनन्दिनीप्रेम्णा अस्याः कथायाः कः सम्पर्कः स्यादिति ? आम्, कश्चिदन्योन्याश्रयः सम्पर्कोऽस्ति तयोर्मध्ये। अत एव लिखामि। किं भवतां मते दैनन्दिन्यां प्रेम कवित्वलक्षणं भवितुं नार्हति ? किमहं प्रष्टुं शक्नोमि यद् भवन्तः स्वदैनन्दिन्यां किं लिखन्तीति ? किं वस्तुनः भवांस्तत्र तथ्यात्मिकां, कपटरहितां दनिकजीवनीं लिखितुं शक्नुवन्ति ? कदाचिल्लिखेयुरपि। मम किन्तु न तत्र विश्वासो न, वा काचिदास्था। स्वकीयायां दैनन्दिन्यामहं किं लिखामीति जानन्ति वा भवन्तः ? कल्पनामिश्रितां सर्वथा मिथ्यावाचमेव लिखामि। कदाचित् कथाम्, कदाचिच्च कविताम्। भवन्तः प्रष्टुं शक्ष्यन्ति यत् कथां, कवितां वा लेखनपुस्तके न लिखित्वाहं दैनन्दिन्यां किमर्थं लिखामीति। भवतां प्रश्नोऽस्वाभाविको नास्ति। तत्र आमूलात् चूडं यावद् यथार्थता वरिर्वति। अत एवाहं प्रश्नस्यास्योत्तरप्रदाने प्रकारान्तरेण विवशोऽस्मि।

मन्मतेऽहं कश्चिदसिद्धहस्त (सिद्धहस्तस्य विपरीतार्थकः) एव लेखकोऽस्मि । अतः, लिखितव्यालिखितव्ययोरन्तर्युद्धात् जातान् मल्लेखान् प्रदर्शयितुमपि दुःसाहसं न करोमि । बिभेमि यत् मया तु किमप्यखाद्यं लिखितं स्यात् । न जाने तत् पठित्वा सुधीपाठकाः किं मंस्यन्ते । अतोऽहम् इतस्ततो न लिखित्वा सर्वान् लेखान् दैनन्दिन्यामेव लिखामि येन व्यक्तिगतमिति विचिन्त्य भवन्तस्तान्न पठिष्यन्ति । गोपनीयतया यदि वा कश्चित् पठिष्यति तर्हि सङ्कोचवशाद् अन्यत्र न प्रकाशयिष्यतीति मे विश्वासः । यतश्च अन्यस्य दैनन्दिनीपठनं तु अस्मत्समाजेऽपराध एव भवति ।

शृण्वन्तु, साम्प्रतं वास्तविकं तथ्यम् अर्थात् कथायाः कथावस्तु प्रकाशयिष्यामि । दैनन्दिन्याः स्त्रीलिङ्गत्वे यदि भवतामापत्तिर्न स्यात् तर्हि तस्याः कृतेऽहं प्रियतमा-शब्दं प्रयोक्तुमिच्छामि । परन्तु प्रसङ्गेऽस्मिन् भवन्तमनुरुणध्मि यद् भवन्तस्तथ्यमिदं मम श्रीमतीं न ज्ञापयिष्यन्ति । यदि सा ज्ञातुं प्रभविष्यति यत् मम अपरापि काचित् प्रियतमा वर्तते इति तर्हि मद्गृहे "श्रीमती-सम्मार्जनी"-नाटकस्य पुनरावृत्तिर्भविष्यति ।

न जाने किमर्थम्, परन्तु अस्माकं श्रीमती तु मदीयां दैनन्दिनीं सोढुं न समर्थाऽस्ति । अहं मम दैनन्दिन्यां यावदान्तरिकतया स्निह्यामि सा तावत् तस्यै ईर्ष्यति । मन्ये ते पूर्वजन्मनि सपत्न्यावेवास्ताम् । एषा मेऽनुभुतिः नाद्यतनीया । बहुकालात् ममेयं बद्धमूला धारणाऽस्ति । यदि भवन्तः न विश्वसन्ति तर्हि मया सह मम गृहमागच्छन्तु । स्वत एव सर्वमवबोधयिष्यन्ति ।

तैललवणसंसारस्य कर्ममयव्यस्तततातः कञ्चित् समयं निष्कास्य यदाऽहं प्रियतमां मे दैनन्दिनीं गृहीत्वा कुत्रचिद्रहसि उपविशामि तदास्माकं श्रीमती क्रोधेन अग्निवद् भवति । तदा उत्कलीयस्य कविवरस्य फकीरमोहनस्य 'चम्पा'-चरित्रं मम स्मृतौ स्वत एव भासते । "गुम्-गुम् दुम्-दुम् चलनं तस्याः, चलति वा धावति वा विषमसमस्या" इत्येतादृश्यपि स्थितिर्भवति मम श्रीमत्याः । तदनन्तरं कोपाविष्टा सा कार्यस्योपरि कार्यान्तरं, कार्यान्तरस्योपरि अपरं च कार्यभारं मदुपरि न्यस्यति । यथा–

"सूपः चुल्यामारूढः परन्तु गृहे लवणं नास्ति । रात्रिभोजनार्थं गृहे शाकं नास्ति । 'ग्याससिलिण्डरो'ऽपि शून्यो वर्तते । आपणादेकं 'ब्रेड्' आनयतु, कुसङ्गे पातितः पुत्रः शनैर्दुःशास्यतरः, दुःशास्यतमश्च भवति । कनिष्ठा च क्रोडयोग्याऽस्मत्कन्यका गृहकार्यसम्पादने बाधिका भवति" इत्यादयः बहवः काल्पनिकाः, वास्तविकाश्चाभियोगाः भवन्ति तस्याः । तत्रैव समाप्तिमेति मम सारस्वतसाधनायाः दृढसङ्कल्पः, तथाकथितया प्रियतमया सह प्रणयपूर्णगुप्तमन्त्रणा च ।

वस्तुतोऽहं स्वगृहेऽपि प्रियतमां तां दैनन्दिनीं सावधानतया संरक्षन्नासम् । यत्र कुत्राप्यहं गच्छामि स्म सा मम पार्श्वे एव तिष्ठति स्म । कश्च जानाति कदा किं भविष्यतीति ? "स्त्रियः चरित्रं ... देवो न जानाति कुतो मनुष्यः" इति तु अस्माकम् पूर्वजा आचार्या एव प्रमाणयन्ति । अतः, सदैव मे श्रीमती मदुपरि कुपितैव तिष्ठति । मामभिलक्ष्य तु मनसा रक्ततण्डुलं चर्वति । मन्ये यदि सा कदाचिन्मे प्रियतमामेकाकिनीं प्राप्स्यति तर्हि तस्यास्तित्वमेव समापयिष्यति । परन्तु चतुरेण मयाप्ययं सुयोगस्तस्यै न दीयते । किञ्चित् चिन्तयन्तु भवन्तः, मां विहाय तस्याः दैनन्दिन्याः कोऽस्ति रक्षकः, आत्मीयो वाऽस्मिन् संसारे ?

पश्यन्तु, कथावस्तुरूपस्य वास्तविकतथ्यस्य प्रकाशनात् पूर्वमेव गन्त्रीयं नैकवारं 'लाइन'च्युता जाता । एतावता भवन्तः कदाचिद् एवममन्यत यदयं भद्रजनः स्वपत्न्यपेक्षयाऽधिकं दैनन्दिन्यामेव स्निह्यति । परन्तु भवतामस्मिन्नाक्षेपे अर्द्धसत्यं भवितुमर्हति न तु पूर्णसत्यम् । वस्तुतः स्वधर्मपत्न्यां मम परमेश्वरवत् प्रेम वरीवर्ति । पाणिग्रहणसमयेऽहं सुखेषु, दुःखेषु च तस्याः सहचरो भविष्यामीति अग्निं साक्षीकृत्य प्रतिज्ञातवान् । सापि उभयावस्थायां मम सहचरी भवितुं प्रतिज्ञातवती । परन्तु सा दुःखेषु यद्यपि न भवति तथापि सुखेषु मम सहचरी भवत्येव । अहं तदपि पर्याप्तं मन्ये । अत एवास्माकं परंपरायां पत्नी अर्द्धाङ्गिनी इति कथ्यते न तु पूर्णाङ्गनी । यद्युभयथा सहचरी स्यात् तर्हि पत्नी पूर्णाङ्गन्येव स्यात् न तु अर्द्धाङ्गनी ।

ज्ञापनीयं, सम्वेदनीयञ्च तथ्यं तु मया नाद्यापि प्रकाशितम् । कतिपयदिवासात् प्राक् प्राणप्रिया मे प्रियतमा दैनन्दिनी कुत्रादृश्या जाता ।

अदृश्या जाता इति तु न वक्तव्यम् अपि तु केनचित्, कयाचिद् वा सा अपहृता इति विश्वसिमि । सा दुराग्रहग्रसितेन केनापहृताऽथवा मया कुत्र परित्यक्ता इति तु कदाचित् स सर्वज्ञ ईश्वर एव जानीयात् । मम तु अस्माकं श्रीमत्यां शतप्रतिशतं सन्देहः । सा तां कस्मै अददात् अथवा कुत्र न्यक्षिपदित्यहं न जानामि । अथवा यौतुकलोभासक्ता काचित् श्वश्रूः इव कदाचित् सा तस्याः जीवन्तसंस्कारं कृतवती स्यादित्यपि न जानामि । परन्तु तामधिकृत्य मन्मनस्युत्थितम् एतं सन्देहमप्यहं तत्सविधे प्रकटयितुं नाशक्नुवम् । बहुवारं साहसं सञ्चयन् केवलमेतदेव वक्तुं प्राभवम्—"कुत्र मे दैनन्दिनी स्थापिता इत्यन्वेषणीयम्" । एतावतैव सम्पूर्णमहाभारतम-शुद्धं भवति स्म । श्रीमती मे विना वाद्येन कदा ओडिशिं, कदा भरतनाट्यं, कदा वा कथकं, कदा कुचिपुडिं, कदा मणिपुरीं, कदाचिच्च छउनृत्यम-नृत्यत् । नृत्येन सह कदा च 'पल्लवी' कदा वा "मङ्गलाचरणम्" । यथा-गृहे बहूनि कार्याणि अवशिष्टानि वर्तन्ते । खादितुमत्र बहवो जनाः सन्ति । परन्तु गृहकार्यं कस्यचिदेकस्य शिरसि बद्धमस्ति । एतत् सर्वं सम्पादयन्त्याः मे असमये एव केशाः शुभ्राः जाताः । मद्विषये न कोऽप्यत्र चिन्तयति । अस्य कृते तु दैनन्दिनी हि सर्वस्वं भवति । स्वधर्मपत्न्या अपि प्रियतरा । किं वा मिलिष्यति तस्याः पुरातनदैनन्दिन्याः संरक्षणात् ? वस्तुतः बाला-नामध्ययनमपि तयैव बाधितं भवति । अकाले सकाले यदा, कदा च पश्यन्तु असौ तामेव गृहीत्वोपविशति । कदा अध्ययनकक्षे, कदास्थान-कक्षे, कदा छद्युपरि, कदा च मम शिरसि ।"

सा वा कुतो जानीयादचेतनायास्तस्याः दैनन्दिन्याः मूल्यविषये । सा तु तां केवलं लेखनाधाररूपेण स्वीकरोति । अतः, मामुपहसितुं कदाचिद् विहस्य च वदति—"वर्षचतुष्टयात् प्रागेव सा दैनन्दिनी क्रीतासीत् । कति पृष्ठाः वावशिष्टाः स्युर्यदर्थं त्वं मनसि कष्टमनुभवसि । अहं तां कथं वावबोधेयं यद् रिक्तपृष्ठानां कृते मम व्यस्तता नास्ति । अपि तु अहं लिखितपृष्ठानां चिन्तयैव अन्नजलं न स्पृशामि । वर्षात्मको मे सकलः परिश्रमः, सकला च चेष्टा व्यर्थतां यास्यति कस्यचिदपरस्या-सावधानवशात् । सा तु एतत् श्रुत्वा मल्लेखोपर्यपि तीक्ष्णं, तिक्तञ्च आक्षेपं कर्तुं न विस्मरति—"किं वाऽस्ति महत्त्वं तव लेखस्याद्यतनीये प्रतियोगिताप्राधान्ये साहित्यव्यवसाये ? नूतनायामपि पत्रिकायां तव लेखाः न प्रकाश्यन्ते । प्रकाश्यमानासु नवीनासु पत्रिकासु प्रतिदिनं लेखाः

प्रेष्यन्ते। किन्तु केवलं 'डाक'-व्यय एव सारः भवति । तव लेखकत्वं, कवित्वं वा सर्वं प्रदर्शनार्थमेव भवतीति मन्ये। अस्या एव व्यर्थप्रवृत्तेः वशाद् बहुवर्षात् प्रागारब्धमपि शोधकार्यं न पूर्णतामेति।

अस्माकं श्रीमती अतीव कलहनिपुणाऽस्ति। अहो चातुर्यं तस्याः वाक्यनिर्माणे! एकवारं मुखमुद्घाटयति चेत् तां न कोऽप्यवरोद्धुं शक्नोति। मम स्वभावस्तु पूर्णतया विपरीतगामी। आजन्मादहं आवश्यकान्न्यूनमेव वदामि। समये, समये तस्याः विस्फोटकं शब्दचयं श्रुत्वा मम स्थितिस्तु जुकामुखे लवणसंयोगस्येव भवति। मौनमाश्रित्य तिष्ठामि केवलम्। कथं वाऽहं तां प्रबोधेयं यत् मल्लेखनं तु न केवलं कर्गजोपरि मसीचिह्नम्। वयसा कलमेन रुधिरतुल्यैरश्रुभिरहं लिखामि असमाप्यां कवितां, जीवनस्य च ज्वलन्तमितिहासम्। मम हृदयस्य स्पन्दनमद्यापि तस्यां दैनन्दिन्यां "टिक्-टिक्"–शब्दं कुर्वन् स्वास्तित्वं सूचयति।

ममैतां विरहकथामथवा विरहव्यथामहं बहुकालं यावत् श्रावयितुं शक्नोमि। परन्तु स्मृतायां, स्मारितायां च तस्यां कथायां मम क्रोधाग्निः "हुत्-हुत्" ज्वलति। अपरं च, उच्च-रक्तचापव्याधिरपि मां कवलीकरोति। अपि मे हृद्यन्त्रं स्थगिष्यति? नहि, नहि। सर्वं पूर्ववत् चलति। अस्याः कथायाः समाप्तेः प्राक् अहमेकामावश्यकीं सूचनां दातुमिच्छामि। दैनन्दिन्या अपहरणप्रसङ्गेऽस्माकं श्रीमती केवलं मामेव दोषिनं घोषयति-

—"भवांस्तु स्वयं भोलानाथः। कुत्रचिदतिसुरक्षितस्थाने प्रस्थापयित्वा विस्मृतवान् स्याद्, अथवा कुत्र चायापणे, बसस्थानके वा त्यक्त्वागतः स्यात्। अत्रागत्य यथा काणो मार्जरः तैलचौरकीटोपरि प्रभुत्वं विस्तारयति तथा मदुपरि स्वप्रभावं, अधिकारं च विस्तारयितुं यतते।

किं भवन्तोऽपि एवं मन्यन्ते यदस्माकं श्रीमती कश्चित्तैलचौरस्तथा अहं च कश्चित् काणः मार्जारः। कदाचित् सत्यमपि स्यात्। क्षुद्रकीटोऽपि तैलचौरः बुद्धिमान् वर्तते। अतः, तां वाऽवबोद्धुं कुतो मे सामर्थ्यम्? यदि चक्षुष्मान् स्याम् तर्हि कदाचित् किमपि कर्तुं शक्नुयाम्। परं हन्त! अहमस्मि काणो मार्जारः। न किञ्चिद् द्रष्टुं शक्नोमि, न वा श्रीमतीभयेन रोदितुमपि शक्नोमि।

अपमृत्योः पुनर्जन्म

ज्येष्ठमासीयः कश्चिद् रविवासरः। कार्यालयीयोऽवकाशः। परन्तु पारिवारिककर्मणः आतिशय्यम्। आवश्यकगृहकार्याणि पूर्वाह्णे एव सम्पाद्य मध्याह्नभोजनानन्तरं शयनकक्षे आतपभयेन स्वपन्नासम्। श्रीमत्याः शुभ्राया आह्वानेन यदाऽहं निद्रातो जागरितस्तदा चन्द्रमाऽप्याकाशे आविर्भवन्नासीत्। आकाशे इतस्ततः सघनः मेघराशिः विचरन्नासीत्। न जाने कस्मिन् मुहूर्ते तमश्छादयिष्यति मृदुशीतलज्योत्स्नायाः साम्राज्यम्। गृहोद्यानस्य अन्धकाराच्छादितात् कस्मादप्येकस्मात् कोणात् मन्दम् आगच्छन्नासीत् रजनीगन्धा-पुष्पाणां मृदुवासः। सुदीर्घैः स्वप्नैश्च ज्योत्स्नायित आसीत् बहिःस्थः 'इउकालि-पटास्'-वृक्षः। परन्तु समयविषये नाहं सचेतन आसम्। अन्यमनस्कतया अस्वपं दीर्घकालं यावत्। तथाप्यक्षिणी मे तन्द्रालसे आस्तां निद्राप्रभावात्।

मत्प्रकोष्ठस्य निकटस्थप्रकोष्ठात् 'रेडिओ'-यन्त्रात् श्रूयते स्म किञ्चिदतिपरिचितं मृदुमधुरं गीतम्। स्वरः अस्पष्टोऽपि शनैः शनैः स्पष्टात् स्पष्टतरोऽभवत्। तेन च स्वरमन्देन मदायिते चाभवताम् मम नयने। मध्ये, मध्ये असकृत् श्रूयमाणः शुभ्रायाः "रूणु-झूणु"-नूपुरशब्दः आकृष्यानयत् मधुरं कञ्चिद् घनान्धकारम्। एतादृशे समुत्तीर्णे सायंकाले प्रतिदिनं शुभ्रा पचति स्म नैशभोजनम्। चित्रिताः पतङ्गाश्च उड्डयमाना आसन् पक्षौ प्रसार्य चैत्रपवनस्य तालेन। एवं प्रतीयते स्म यथा अपूर्व-अन्यमनस्कतायाः कश्चिद् ऋतुः अवतरन्नासीत् मोहेनाच्छादयितुं मेऽनन्तमन्तरीक्षम्। आर्द्रायितेनोष्मणा प्रज्वालयितुं च मे निःसङ्गमात्मानम्।

—"अरे ! किमद्यापि न जागरितः ? हस्तमुखौ न प्रक्षालयिष्यसि"? मधुरो मेऽन्यमनस्कभावः दोलायितोऽभवत् शुभ्राया उपस्थितया। यथा चैत्रपवनेन वनमल्ली दोलायिता भवति। ततश्च परिवेषयति मृदुगन्धामोदं जगतः प्राणिनः।

—"अपि न शृणोषि ? काञ्च ते प्रेयसीं स्मरन्नसि" ? नीरवता मे पूर्णतया व्याहृता परिहासोक्तेन व्यङ्ग्यपूर्णेन शुभ्राया आक्षेपन ।

—"अस्तु, हस्तमुखौ प्रक्षाल्य त्वरितमेवागच्छामि । कृपया एक-चषकं चायं निर्मातु । अतीव श्रान्तोऽस्मि ।" पञ्चभिरङ्गुलिभिर-सज्जितं केशराशिं सज्जीकुर्वन्नवदम् ।

—"किमत्र नावीन्यम् ? प्रतिदिनं एतादृशस्तेऽसमय आग्रहः" । ओदनव्यञ्जनादिप्रस्तुतिकाले मम चायनिर्माणस्यानुरोधे एषोऽपि शुभ्रायाः दैनन्दिनोऽभियोगः । परन्तु मम स्नानगृहात् प्रतिनिवर्तनात्पूर्व-मेव चायं परिवेषितम् तया ।

—"अरे ! कथमियता स्वल्पेन कालेन संपन्नं ते चायनिर्माणम् ?" साश्चर्यमहमपृच्छम् ।

—"किमहं न जानामि यत् त्वं जागरित्वा सर्वप्रथमं चायं निर्मातुं वदिष्यसि ? अतोऽहं कियत्कालात्पूर्वमेव चायं निर्माय प्रतीक्षायाम् आसम् । इदानीं तु केवलम् उष्मीकृत्यैवानयामि ।" स्मितं हसन्त्यवादीत् शुभ्रा । अतीव निश्छलस्तस्याः हसः । तस्यास्तेनैव स्मितहसेनाहं क्रीतो-ऽस्मीति सा स्वयमपि सम्यग् जानाति । ततः परम् उद्यानस्य दोलायामुप-विष्टायाः शुभ्रायाः हस्ते एकं चषकं, तत्समीपे उपविष्टस्य मम हस्ते चापरम् । चायाद् उष्मवाष्पं निर्गच्छदासीत् । शुभ्राया उपस्थित्यां न कदापि शैत्यमनुभूयते मया । चिरं यावन्नावसीयते च दीर्घायिता आवयो-रात्मकथा । यथासमयं समयोऽतिक्रामति । शनैरवक्षीयते च रात्रिः । परंतु न कथमपि समाप्तिमेति साऽस्मदीया वार्ता । चन्द्रमसोऽनुक्षणं झरति च ज्योत्स्ना ··· ··· ज्योत्स्ना ·· ··· केवलं ज्योत्स्ना ······ ।

दीर्घाङ्ग्या तन्व्या चानया शुभ्रानाम्न्या युवत्या सह मम प्रथम-दर्शनमभवत् कस्यचित्प्रियसुहृदोऽग्रजस्य विवाहावसरे । स्वल्पेऽपि समये, अत्यल्पेन च वार्तालापेन महदात्मीयताप्रदाने समर्था इयं युवती मम जीवने तु प्रथमासीत् । मन्ये तस्य विवाहसमारोहस्य समग्र आनन्दोऽनु-भूतः मया केवलं युवत्यास्तस्या अपूर्वोल्लसितयोः नयनयोः । वरवध्वोः

जयमाल्यावसरे सोपानावतरणसमयेऽकस्मात् स्खलितौ तस्याः पादौ। निराश्रिता लतेव सा मदुपरि पतिता। अद्यापि स्मरामि तत् स्पर्शसुखम्।

ततः परं तया प्रायः प्रतिदिनं पत्रं लिखतं मत्कृते। कदाचित् ममोत्तरमप्राप्याऽपि तया लिखितम्। पत्रमाध्यमेन मत्कविताश्च तया भूयो भूयः प्रशंसिताः। सम्भवतः सा जानाति स्म यत् कवेः हृदयं जेतुं तत्कविताप्रशंसनमेव श्रेष्ठमाध्यमं वर्तते। बहुकालव्यवधानेन पुनरेकवारं ग्रामान्तरे तस्याः दर्शनं संयोगाद् जातम्। अहं तदानीं गुणपुरग्रामस्थम् आलोकनाम्नो मे कस्यचित् सुहृदः गृहं गतवान् आसम्। तदा च कार्यान्तिरेण स्वकीयपितृस्वसुः गृहमागच्छन्त्या तया सह मे आकस्मिकं मधुरदर्शनं जातम्। तदानीमपि पुनरेकवारं मां मन्त्रमुग्धमिवाकरोत् तस्याः उच्छ्वसित आवेगः। जीवनोद्यानस्य कस्मिंश्चिदेकस्मिन् कोणे बीजं वपदासीत् नीलवर्णं दुःखम्। मन्ये चन्द्रमसो गर्भगृहे यथा विलयमिच्छदस्ति समस्तसाम्राज्यम्। एवं गच्छता कालेनावां बहु अभ्रमताम्, बहु अवदताम्, सुखदुःखे च अवण्टताम्। अनन्तरमारब्धः अपूर्वोऽयमन्यमनस्कतायाः ऋतुः।

× × × × × ×

शुभ्रायाः ज्येष्ठभगिन्याः विवाहो ह्य एव सम्पन्न आसीत्। व्यस्ततायां ममातिथ्यं सम्यक्तया नाचरितमिति तया साग्रहमनुरुद्धोऽहं दिनद्वयं स्थातुं तस्याः गृहे। ममापि गन्तुं कुत्र इच्छा आसीत्?

इदृश्येवासीत् सा ज्योत्स्नामयी रात्रिः। अत्र, तत्र, सर्वत्रैव शुभ्रा, शुभ्रा तथा च शुभ्रा। एतादृश्याः मधुरस्मृतेरग्रेऽपि किमस्ति किञ्चिज्जीवनम्? आरात्रिरसंख्यानि पुष्पाणि प्रास्फोटयत् रजनीगन्धावृक्षः।

—"अपि निद्रा आयाति?" शुभ्रायाः कोमलस्वरः।

—"कुत्र? सा तु कस्मात् कालादपसृता मम नयनयोः।" इउकालिपटासवृक्षसन्धौ आत्मानं गोपायमानं चन्द्रमसं दृष्ट्वाहमवदम्।

—"त्वां किञ्चिद् वक्तुकामाऽस्मि।" मन्ये मत्सान्निध्यं स्वशरीरेऽनुभवितुमिव मम निकटतराऽभवत् शुभ्रा।

—"किं त्वं कदा निवारितासि मया तदाचरितुम् ?" शुभ्रायाः स्मितहसमिव परितो विच्छुरितां तां ज्योत्स्नां दृष्ट्वाहमवदम्। ततः शुभ्रा वक्तुं प्रारभत स्वेनाङ्गीकृतां काञ्चित् सुदीर्घामात्मकथाम्—

—"अहं तदानीं दशमश्रेण्याः छात्रा आसम्। स्नातकस्य प्रथमवर्षे चासीत् समीरः। मम दूरसम्पर्कीयः पितृस्वस्रीयो भ्राता। सः मां पाठयन्नासीत् तदानीम्। एकदा बीजगणितं पाठयन् आसीत् समीरः—'ए+बी'-रूपं तत् सरल-सूत्रम्। मत्कृते तदासीत् सरलीकरणस्य किञ्चित् उष्णमुपपाद्यम्। ततः परं माममनस्कामकरोत् संपूर्णं बीजगणितम्। ममाज्ञाने समीरः प्रावाहयत् मृदुमन्दसमीरं अप्राप्तयौवने मम मनसि। वक्षसः नीचैश्च अङ्कितवान् सुमधुरां नखरेखाम्। एवमेकदा संप्राप्ते त्ववसरे पक्षिणः अबाधगतियुक्तौ पक्षौ रक्तरञ्जितौ स्वार्थान्धेन समीरेण।"

× × × × × ×

अहमाकाशमपश्यम्। तत्रापि चन्द्रमसमाच्छादयति स्म कृष्णकायो मेघः। धूमधूलिवलयाभ्यन्तरे आच्छादितमिव दृश्यते स्म शुभ्रायाः मुखमण्डलम्। अत्यल्पदिनात्मको मे सम्पर्कः शुभ्रया सह। परंतु युगयुगान्तरस्य, जन्मजन्मान्तरस्य चात्मीयतामनुभवन्नासमहम्। अहो पटुता शुभ्रायाः वार्तालाप-कलासु ! दीर्घकालं यावत् वार्तामग्नाऽपि सा क्लान्ता न भवति।

—"किं वार्तालापे ते विशेषाभिरुचिः ? अपि प्रशिक्षितास्ति विभागेऽस्मिन् ?" एवं यदा, कदा परिहासव्याजेनाक्षिप्ता भवति स्म सा मया।

—"कदाचिद् भवेद्, त्वया सह वार्तालापप्रसङ्गे।" चमत्कारहसं विहस्य वदति स्म शुभ्रा।

विगते फाल्गुनमासे होलिकोत्सवावसरे असज्जितं तस्याः केशराशिं करयोः धृत्वाऽहं यदा गण्डयोस्तस्याः रागमलेपयम् तदा सा वृक्षोपरि लतेव मद्वक्षसि समर्पणमुद्रायामस्वपत्। यथा फाल्गुनस्य प्रबलतरङ्गैर्मक्षितं मे नयनरूपि नभः। ज्योत्स्नाधौतायामपि तस्यां रजन्यां सा मामयाचत एकान्तस्योष्मान्धकारम्। इदम्प्रथमतयाऽहं किञ्चिद् विचलितोऽभवम्। किं ममाज्ञातेऽवचेतनेऽहं शुभ्रायाम् इत्थं प्रीणामि? शनैश्चमत्करोति चन्द्रमाकाशे। ज्योत्स्नायितं च भवति समग्रमाकाशम्। गृहोद्यानस्य छायान्धकारे सर्वत्र विकीर्णः रजनीगन्धायाः सुवासः। मौनमाश्रित्य निश्चिन्तमुपविशति शुभ्रा। सम्भवतस्तस्य रन्धनकार्यं सम्पन्नमस्ति।

—"ए······! एवं मौनमाश्रित्य किमर्थमुपविशावः। त्वं किञ्चित् श्रावय।" मम नीरवतामन्यमनस्कतां च विभज्य एष आसीत् शुभ्रायाः चिरपरिचित आग्रहः।

—"किं कथयामि? परामृशतु भवती।" ममापि पूर्ववत् तादृश एव मोहाच्छन्नोऽनुत्साहितः स्वरः।

—"यद्यपरं न किञ्चित् तर्हि कामपि कवितां श्रावय। को लाभः मौनोपवेशने?"

—"मन्ये नीरवतायामेव पर्याप्तः कोलाहलो भवत्याम्। तेन चान्दोलितोऽस्मि।"

—"धृष्टता, दुष्टता च ते पूर्ववत् तिष्ठति। सर्वदा मां शब्दजालेन मोहयसि।" मामुद्दिश्य एतदेवासीत् शुभ्रायाः स्मितहासमिश्रितं सानुरागं मन्तव्यम्।

—"क्षम्यतां शुभ्रे! अद्य किं त्वं प्रारब्धुं न शक्नोसि?" सन्दिग्ध आसीत् मेऽनुरोधः। अनन्तरं शुभ्रा प्रारभत तस्याः अर्द्धवर्णिताम् असमाप्यां च कथाम्। तस्याः भाषणे यावत्यासक्तिरासीत्, तावती चासीत् मे श्रवणेऽन्यमनस्कता। आवयोः परितः सर्वत्रासीत् केवलं ज्योत्स्ना······ ज्योत्स्ना······अथ च ज्योत्स्ना······।

—"आगच्छ, खादावः।" मध्ये एव भाषणविरामः शुभ्रायाः।

—"किं त्वं क्षुधिताऽसि ?"

—"किं तव क्षुधा नास्ति ?"

—"तथापि कियत् क्षणं प्रतीक्षस्व"।

—"अरे भ्रातः! किमनन्तरं वार्तालापो न सम्भविष्यति ?" मदीय-मुत्तरमनादृत्य भोजनपरिवेषणार्थं शुभ्रा तावद् अन्तः गतवती।

× ×　　　× ×　　　× ×

—"एवमेकदाऽहम् अन्तःसत्त्वाऽभवम्।" भोजनानन्तरं पुनः प्रारभत शुभ्रा। "कमपि किञ्चिद् वक्तुं मे सामर्थ्यं, साहसो वा नासीत्। परवर्ती मे समयः सुखपूर्णो, दुःखपूर्णो वास्तीति ज्ञातुमपि मे सामर्थ्यं नासीत्। सशङ्किताऽपि यदा सोत्साहं तथ्यमिदं समीराय निवेदितवती तदा सः मिलनेऽपि उपेक्षाभावं प्रादर्शयत्। एव-मेकदा मया श्रुतं यत् सः ममैव प्रियसखीं सरितां गृहीत्वा कुत्र पलायितोऽस्ति। वार्तामिमां श्रुत्वा स्खलिताः मे पादतलयोः मृत्तिकाः। अहं तत्रैव धराशायिन्यभवम्। अन्वभवञ्च तदानीं यथा मे निःश्वासावरोधो भविष्यति। परन्तु अनन्तरमात्मानं सान्त्वयितुं कल्पनायां सयत्नमनुभूतं यत् समीरेण सह ममैषः क्षणिकः संपर्क आसीदेका मिथ्याभूता ज्योत्स्नामयी रात्रिः। ततः प्रभृति न केवलं समयात्, अपि तु सर्वस्मात् च विभग्नः मे कोमलः विश्वासः। अहं कदाचिद् विवशा आसमनुदिनं परि-वर्द्धितं तं भ्रूणं…… ।"

शुभ्रायाः मुखमण्डलं निरीक्षमाणेन मयाऽनुभूतं यत् तस्या उल्ल-सितो मुखः शनैः शुष्कीभवति। अन्धकारश्च व्याप्तुं यतते तस्याः नयने। शुभ्रा पुनः वक्तुं प्रारभत तस्या आत्मकथाया दुःखान्तमुपसंहारम्—

—"तस्माद् दिनाद् अहं मृता आसम् । केवलं शववत् तिष्ठन्नासं शरीरेऽस्मिन् । त्वञ्च पुनः मयि आत्मीयतायाः गङ्गाजलं सिञ्चसि । त्वयि ममाविश्वासः मनागपि नास्ति । परन्तु बिभेमि–किं त्वं चिरं यावत् (आजीवनं) मम विश्वासी भूत्वा तिष्ठसि ?"

एवं वदन्ती सजलनयना शुभ्रा भृशं शिरोऽताडयत् मम वक्षसि । दृढमालिङ्गितवती च माम् । मन्ये तस्यां तदानीमपि मिथ्या-ज्योत्स्ना-मय्याः रात्रेर्भयः विचरति स्म । अश्रुभिरार्द्रीभवति स्म मे वक्षस्थलम् । तस्याः क्रन्दनं यद्यपि न श्रूयते स्म तथापि अनुभूतं मया कश्चित् महान् विस्फोट स्तस्या अन्तःकरणे । यथा तत्र भिनत्ति काचिन्मृत्तिका, भिनत्ति च कश्चिदाकाशः । मयैतत् प्रथमवारमनुभूतं यत् शुभ्रायाः वक्षसोऽधोऽपि कियान् गंभीरः क्षतः ?

कयाश्वासनया शुभ्रां प्रबोधयिष्यामि ? आकाशे मलिनश्चन्द्रालोकः । तस्मिन्नस्पष्टालोके शनैः शनैश्चाहमस्पृशं तस्या असज्जितं केशराशिम् । अप्रोञ्छंश्च तस्याः चक्षुषोः निर्गलतः अश्रुविन्दून् ।

एवं तस्या असज्जितान् केशान् सज्जीकुर्वन्नवदम्—"शुभ्रे ! तव आशा, तव विश्वासः, तवाविश्वासश्च सर्वमाहृत्य निःसङ्गस्य एकाकिनो मे आत्मनः आश्रयः । त्वमस्येका पवित्रा गङ्गा शुभ्रे ! चिरपवित्रा । तव पवित्रता हि मे सौभाग्यम् ।"

× × × × × ×

अथ प्रकम्पितयोः मे अधरोष्ठयोः शुभ्रायाः उष्णौ अधरोष्ठौ । पुष्पवत् कोमलयोः, मधुवत् मधुरयोश्च तस्या अधरोष्ठयोः मृदुस्पर्शेन विह्वलोऽहमात्मानं विस्मृतवान् तदानीम् । पुनरेकवारं उज्ज्वलज्योत्स्नालोकेन आवामालोकितावभवताम् । अहो ! अपूर्वंशिहरणं उभयोरावयोस्तनुमनसोः । तस्मिन्नेव महानिर्वाणेऽहमन्वभवम् यत् समीरेण छलिता शुभ्रा मृता वर्तते । मद्वक्षसि समर्पिता युवती काचिदपरा शुभ्रा वर्तते यस्याः पुनर्जन्म सद्योऽभवत् ।

चक्रव्यूहः

आसन्नप्रायः सन्ध्यासमयः। महानगरस्य चतुष्पथस्य कस्मिंश्चिद् बस्-स्थाने बस्-यानाय प्रतीक्षमाणासीत् काचिन्नवयुवती। अनिन्द्यरूपस्याधिकारिण्यास्तस्याः वयः विंशतिः पञ्चविंशतिर्वा भवेत्। मार्गास्तु जनशून्याः, यानशून्याश्च दृश्यन्ते स्म। कर्फ्यूग्रस्तेऽस्मिन् क्षेत्रे को वा कथं वा भवेत्? गणेशमूर्तिविसर्जनार्थं प्रवर्तमानां शोभायात्रामधिकृत्य प्रवर्तितस्य कस्यचित् साम्प्रदायिकविवादस्योत्तेजनां, विभीषिकाञ्च शमयितुं महानगरप्रमुखेन मण्डलाधीशेन कर्फ्यूरादिष्टासीत्।

अकस्मादसुस्थं स्वप्रतिवेशिनं स्वकार्यानेन चिकित्सालयं प्रापयितुं गतवानासीद् विश्वम्भरः। प्रत्यावर्तनसमये बस्स्थानकस्यापरिष्कृते क्षुद्रे प्रतीक्षागृहे प्रतीक्षारतां तां नवयुवतीमेकाकिनीं दृष्ट्वा सः दयाभिभूतोऽभवत्। सम्वेदनशीले कर्फ्यूग्रस्तक्षेत्रे नियमस्योल्लंघनार्थं पूर्वस्मिन् चतुष्पथे स ताडित आसीद् मार्गभटैः। अतः, निषिद्धक्षेत्रे कार्चालनसमयेऽग्रे कुत्रापि न स्थास्यतीति स्वगतं प्रतिज्ञातवानासीत्। तथापि न जाने किमर्थं स तस्याः युवत्याः सहायतां संविधातुम् आत्मानं निवर्तयितुं न पारितवान्। किञ्चिदग्रेसृतमपि स्वकार्यानं पश्चगत्या युवत्याः सम्मुखमेवानीय स्थगितवान्।

सम्भवतः सा युवती कर्फ्यूविषयेऽनभिज्ञासीद्, अथवा सज्ञानाऽपि विवशतया बहुकालात् तत्र बस्यानस्य प्रतीक्षायामासीत्। तस्याः युवत्याः सहायता करणीया न वेति द्वन्द्वे पातितो विश्वम्भरः किंकर्तव्यविमूढ इव कियत्क्षणं यावत् तां युवतीं पश्यन्नेवातिष्ठत्। मनसि च तस्यासन् अनागतविपदः सम्भाविताश्चाशङ्काः। यथा—युगोऽयं न तथा सरलोऽस्ति यथा स चिन्तयन्नस्ति। अद्यत्वेऽसहायमहिलाभ्यः सहायता प्रदास्यते चेदनन्तरं तासु काश्चन दुष्टाः हत्याबलात्काररूपारोपैः प्रतिदिनं कति सरलपुरुषांश्छलयन्ति। असहाया इति मत्वा याः स्वयाने उपाविश्यन्ते ता

एव परवर्तिमुहूर्ते यानचालकान् अपहरणकारीत्याक्षिप्य स्वसुरक्षार्थं जनानां, भटानां वा सहायतां याचन्ते। यद्यपि विश्वम्भरस्य मनसि एतादृश्यः दुर्भावनाः नासन् तथापि स साहसं सञ्चीत्य तामामन्त्रयितुं सङ्कोचमनुभवति स्म। यदि सा तमधिकृत्य किञ्चिद् अन्यथा चिन्तयिष्यति, अथवा यदि सा तं दुराचारी, बलात्कारी वा विघोष्य जनान् एकत्रीकृत्य तत्कृते केषांचिदुत्तमध्यमादीनां सुव्यवस्थां करिष्यति, तेन गृहपरिवर्ते अस्मात् स्थानादविलम्बेन चिकित्सालये एव गमनस्यावश्यकता भविष्यति तस्य कृते। एवं तु एकवारं विना दोषेण पथि भटैस्ताडितो वर्तते सः।

परस्मिन् मुहूर्ते विश्वम्भरस्य सर्वाः प्राक्तन-धारणाः मिथ्या प्रमाणिताः। सा युवती विश्वम्भरस्याशयमवबुध्य तत्प्रदत्ताद् आमन्त्रणात् प्रागेव याने उपविष्टवती। सम्भवतः साऽपि भयभीतासीद् यानशून्यं, जनशून्यञ्च राजमार्गमवलोक्य। याने चोपविश्य त्रस्ता सा स्वगन्तव्यस्थानस्य सङ्केतमेवोक्तवती, नान्यत् किमपि।

विश्वम्भरः तस्याः सङ्केतस्थानविषये सम्यगवगत्य स्वयानं वेगेन चालितवान् येन पुनः भटानां सम्मुखीभवितुं नापतेत्। दशनिमेषं यावत् यानं चालयित्वा स युवत्या निर्दिष्टं सङ्केतस्थलं प्राप्तवान्। स्वगन्तव्यस्थानं च प्राप्य सा युवती विश्वम्भराय भाटकं दातुं स्वधनभस्त्रिकाकोषम् अन्विष्य काञ्चिद् व्यस्ततां प्रदर्शितवती।

—"अरे! अत्र तु केवलं पञ्चरूप्यकाणि वर्तन्ते। क्षणं तिष्ठन्तु, अहं गृहादानीय भवते भाटकं दास्यामि।"

—"नहि, नहि। तस्य आवश्यकतैव नास्ति। अहं भाटकार्थं यानं न चालयामि। अहं तु मम प्रतिवेशिनः सहायतामाचरितुं स्वयानेन चिकित्सालयं गतवानासम्। भवतीं तत्र बस्स्थानके असहायावस्थायां दृष्ट्वा मयि सुप्ता मानविकता जागरिताऽभवत्। अतोऽहं यानं स्थगयित्वा भवतीं गृहं प्रापितवान्। सानन्दं भवती गृहं गच्छतु। भवत्याः सहायतां विधाय अहम् आत्मसन्तोषमनुभवामि।"

—"क्षम्यताम्। अहं भवन्तं कार्चालकमिति मत्वा साधिकारं भवतां याने उपविष्टवती। अस्तु, महानुपकारो भवतां मदुपरि। अस्माक-

मावासे कियत्क्षणं विरम्य एकचषकं काफीं पीत्वा गच्छन्तु । अन्यथा भवताम् ऋणभारेण आजीवनं कष्टमनुभवन्ती तिष्ठामि । एतावता निषिद्धक्षेत्रमपि भवताऽतिक्रान्तम् । भटानां भयोऽपि व्यपगतोऽस्ति भवतां मनसः" ।

विश्वम्भरस्तु त्वरयासीत् । परन्तु युवत्याः विशेषाग्रहं दृष्ट्वा तया सह काफीं पातुं स्वकीयां स्वीकृतिं प्रदत्तवान् । परन्तु लौहद्वारस्य किञ्चित् समीपं गत्वा तत्र तालकं दृष्टवा सा व्यतिव्यस्ताऽभवत् ।

—"ओ ...... भगवन् ! महदाश्चर्यम् !! गृहे तालकं दत्वा कुत्र गताः वर्तन्ते मे माता, स्वसा, भ्राता च । साम्प्रतं किं करिष्यामि ? कुत्र गत्वा रात्रिं यापयामि ? मम त्वस्मिन्नगरे न तथा कश्चित् परिचितोऽपि वर्तते" ।

महति द्वन्द्वेऽपतत् विश्वम्भरः । इदानीं किं करणीयम् ? एतां युवतीमत्र एकाकिनीम् असहायावस्थायां विहाय गमनं किमुचितं भविष्यति ? तदस्तित्वे वर्तमाना मानविकता पुनः तं प्रेरितवती तस्याः सहायतार्थम् ।

—"महोदये ! अहं भवतीमेतादृश्यामवस्थायां परित्यज्य गन्तुं नोत्सहे । मया सह भवती मद्गृहमागच्छतु । तत्र भवती तावत् स्थातुमर्हति यावद् भवत्याः परिवारसदस्याः न प्रत्यागच्छन्ति । मन्ये ममातिथ्यस्वीकारे भवत्याः काचिदापत्तिर्न भवेत् ।" युवत्याः सहायतार्थं सहजमब्रवीद् विश्वम्भरः ।

—"ममात्र कापत्तिर्भवेत् ? अहं तु भवतां विषये एव चिन्तयामि । अपरिचिताया मम कृते कियत्कष्टम् अनुभवन्नस्ति भवान् । मां दृष्ट्वा भवतां पत्नी किं चिन्तयिष्यति । कदाचिद् भवन्तमन्यथा न गृह्णीयात्" । स्वाशंकां प्रकटितवती सा युवती ।

—' भवत्याः चिन्ता निराधारा। मम पत्नी सुधा तु अतीव सच्चरित्रा भद्रमहिलाऽस्ति। मदुपरि तस्याः महती आस्था, महांश्च विश्वासः। सन्तानद्वयस्य जननी सा तु भवतीं कथमपि अन्यथा न ग्रहिष्यति। निश्चिन्ता तिष्ठतु भवती"। एवं तां भद्रमहिलामाश्वासितवान् विश्वम्भरः।

—"भवान् कश्चिद् दयावान् पुरुषोऽस्ति । मदर्थं देवतायाः विग्रह-रूपेण सशरीरी आगतवानस्ति । भगवान् भवतां सर्वविधं मंगलं विद-धातु" । एवं विश्वम्भरस्य गृहं गन्तुं स्वकीयां स्वीकृतिं प्रदत्तवती सा युवती ।

× ×　　　　× ×　　　　× ×

विश्वम्भरस्य गृहेऽपि सर्वे तां युवतीं याथातथ्येन गृहीतवन्तः । तस्य पत्नी आगन्तुकायास्तस्याः स्वागतं विधाय समुचितसत्कारं कृतवती । उभे च तस्य सन्तानौ ताम् 'आण्टो'त्याहूय तया सह मिलितवन्तौ, खेलि-तवन्तौ च । तस्याम् रात्रौ तौ दम्पती शयनार्थं तस्याः कृते सुव्यवस्था-मप्यकुरुताम् । तेन तौ बहु आत्मसन्तोषमनुभूतवन्तौ । रात्रौ बहुकालं यावत् विश्वम्भरस्य पत्नी तया युवत्या सह वार्तालापे मग्नासीत् ।

परेद्युः प्रातरुत्थाय विश्वम्भरः पश्यति यत् सा युवती तस्य गृहस्या-लिंदे प्रातःभ्रमणं कुर्वती अस्ति । पत्नी च बालकयोर्विद्यालयगमन-प्रस्तुतौ व्यस्ता वर्तते । तयोर्बालिकयोः विद्यालयगमनानन्तरं सुधा चायं निर्माय उद्यानमागतवती यत्र विश्वम्भरः, आगन्तुका सा युवती च वार्ता-लापे व्यस्तावास्ताम् । सर्वे तत्रोद्याने एवोपविश्य चायपानं कृतवन्तः । चायपानप्रसङ्गे स्वदिनचर्याविषये आकलनं कुर्वता विश्वम्भरेण प्रस्ताव उपस्थापितः—

—"मध्याह्नभोजनान्तरं वयं सर्वे प्रतिवेशिनं द्रष्टुं चिकित्सालयं गमिष्यामः । भवती अपि अस्माभिः सह आगच्छतु । भवतीं तत्र भवत्या आवासे परित्यज्य वयं चलिष्यामः । मन्ये भवत्याः परिवारसदस्या एतावता आगता एव स्युः । यदि तत्र ते न भविष्यन्ति, तर्हि ततःसर्वे वयं चिकित्सालयं गत्वा प्रत्यावर्तन-समयेऽपि पश्यामः । यदि तथापि ते न मिलिष्यन्ति तर्हि पुनश्चास्माकं गृहं प्रत्यावर्तिष्यामहे ।"

प्रस्तावमिमं श्रुत्वा सा युवती पुनश्चिन्ताग्रस्ताऽभवत् । सा कुत्र गमिष्यति ? तस्यास्त्वत्र आवास एव नास्ति । वृत्त्यन्वेषणाय सा त्विमं महा-नगरमागतवती आसीत् । गृहे विमातुर्व्यवहारेण रुष्टा सा पितुरज्ञाने गृहं त्यक्त्वा स्वसञ्चितं सामान्यमर्थं गृहीत्वाऽत्र आगतवती । पर्यटका-

वासे दिनत्रयं स्थित्वा तया सर्वं धनं व्ययीकृतम् । अतः किंकर्तव्य-विमूढा सा त्रस्-स्थानके दण्डायमानासीत् । कर्फ्यू वशात् महानगरम् अवरुद्धमासीत् । पद्भ्यामपि कुत्र गन्तुं न शक्यते । सौभाग्यात् तत्र आगतवतः विश्वम्भरस्य गृहे स्थानं प्राप्तुं तया मिथ्या उक्तम् । परन्तु साम्प्रतं कथं विश्वम्भरः प्रबोधनीयः ? तस्य विश्वासः कथं खण्डनीयः ? किं सर्वं तथ्यं विज्ञाय विश्वम्भरस्तस्यै सम्वेदनां प्रदर्शयिष्यति ? अथवा मिथ्यावादिनी काचिद् विश्वासघातिनीति मत्वा गृहान्निष्काषयिष्यति ? अथवा एतन्मिथ्या गोपायितुं सा अपरमपि मिथ्या वदिष्यति ? परन्तु तेन को लाभः ? अनन्तरं तस्यापि रहस्योन्मोचनं भविष्यति । परन्तु तदा सा विश्वम्भरस्य क्षमायोग्यैव न स्थास्यति । अतः, इदानीं क्षमां याचित्वा सत्यं विज्ञापयिष्यति चेत् कदाचिद् उदारमना अयं विश्वम्भर-स्तस्यां विश्वस्य सहायतां विधास्यति । परन्तु शतं यतमानाया अपि तस्याः मुखात् सत्यं न निःसरति स्म । बह्वायासेन साहसं सञ्चित्य सा वक्तुं प्रारभत—

—"महाशय ! भवन्तः चिकित्सालयं गच्छन्तु । अहं तु महानगरे-ऽस्मिन् भ्रमन्ती वृत्तिम् अन्विष्यामि । मत्कृते भवता य उपकारः कृतः, तमहमाजीवनं न विस्मरिष्यामि । वस्तुतः मया अपराधः समाचरितः भवत्सविधे । मम न कश्चिदावासोऽस्ति महानगरेऽस्मिन् । भवतः गृहे रात्रौ आश्रयं प्राप्तुं मयैषोऽभिनयः कृतः । अहं जानामि यदेषोऽपराधः क्षमायोग्यो नास्ति । परन्तु अबलां माम् असहायां ज्ञात्वा भवान् क्षमां प्रदास्यतीत्यपि विश्वसिमि ।"

एवं स्वदुरवस्थां वर्णयन्त्यास्तस्याश्चक्षुषोर्श्रूणि आगतानि । तस्या एतादृशीमवस्थां दृष्ट्वा दयार्द्रौ तौ दम्पती तद्विषये सर्वं तथ्यं जिज्ञासितवन्तौ । ताभ्यामाश्वस्ता सा स्वकरुणकथां निवेदितवती । एतत् सर्वं श्रुत्वा सुधा तस्याः सहायतामाचरितुं विश्वम्भरस्य समक्षं प्रस्तावः समुपस्थापितः—

—"अयि भोः ! आवां स्वपुत्रौ पाठयितुं कस्यचिद् गृहशिक्षकस्य अन्वेषणे तत्परौ स्तः । एषा तु स्नातकोत्तीर्णा वर्तते । अस्मद्गृहे तिष्ठतु ।

तौ चास्मद्बालौ पाठयतु। यदा समुचितां वृत्तिं प्राप्स्यति तदा गमिष्यति। महानगरेऽस्मिन् सहजतया वृत्तिः कुत्र उपलभ्यते? तदर्थं समयोऽपेक्षते किल" ?

सुधायाः प्रस्तावं श्रुत्वा सा युवती प्रसन्नाऽभवत्। त्वरितमेव सुधायै कृतज्ञतां निवेदितवती। विश्वम्भरः किं वदतीति ज्ञातुं कुत्रास्ति तस्या अवसरः? तस्याः चिन्ता तु सुधायाः कृते एवासीत्। विश्वम्भरविषये तु सा स्वल्पं बहु वा जानात्येव। तादृशः सरलविश्वासी, उदारचेता च प्रस्तावस्यास्य तिरस्कारं न करिष्यति। तच्चक्षुषोऽपि सावगन्तुमशक्नोत् यत् सः तस्याः सहायतार्थम् उपायमन्विष्यन् आसीत्।


एवं सा युवती विश्वम्भरस्य गृहे स्थित्वा तस्य पुत्रौ पाठितवती। विश्वम्भरः, सुधा च पुत्रयोः पठनदायित्वान्मुक्तौ भूत्वा प्रसन्नौ अन्वभवताम्। क्रमशः सा युवती तस्य परिवारस्य काचित् सदस्यैव संजाता। बालकयोः पठनसमस्या समाप्तिमागात्। अतः तावपि बालकौ प्रसन्नावास्ताम्। सुधाविश्वम्भरौ च तस्याः व्यवहारे अतीव सन्तुष्टावास्ताम्। सा युवत्यपि स्वगृहाद् बहिः, महानगरेऽस्मिन् स्वानुकूलं सुरक्षितञ्चावासं प्राप्य प्रसन्नतराऽभवत्। एवं सुखेन व्यतीतः कियान् कालः।

× × × × × ×

एवं खलूच्यते लोके—पूरिते चोदरे आरभ्यन्ते बहुविधानि नाट्यानि। अथवा अङ्गुलिप्रवेशाद् बाहुप्रवेश इत्यपि प्रसिद्ध्यति आभाणकोऽस्मत्समाजे। विश्वम्भरस्य चरित्रेण, व्यवहारेण च सन्तुष्टा सा युवती क्रमशः तस्मिन् आकृष्टाऽभवत्। विश्वम्भरोऽपि स्वस्मिन्नाकृष्टायां तस्यां नवयुवत्यां कदाऽप्रीणादिति स्वयमपि ज्ञातुं न प्राभवत्। सुधायाश्चक्षुषोरन्तराले तौ परस्परं मिलितुमपि प्रारभताम्। रहसि तयोः सरसं वार्तालापं श्रुत्वा सुधायाः मनसि सन्देहस्तु भवत्येव। परन्तु स सच्चरित्रे तस्याः पतौ एतादृशं निम्नस्तरीयं दोषारोपं कर्तुं बिभेति स्म। निष्प्रमाणं यदि सा तमाक्षेपिष्यति तर्हि आजीवनं तस्यास्थां, विश्वासं च हारिष्यति। परन्तु किञ्चिन्न वदिष्यति चेत् तर्हि तयोः सम्पर्कोऽपि मधुरात् मधुरतरो भविष्यति। करतलस्थितं गुडं बाहुपर्यन्तमागमिष्यति चेद्रग्रे

स्थितिरनियन्त्रिता भविष्यति। सरलां, व्यवहारकुशलां तां युवतीमपि सा किमपि वक्तुं न शक्नोति स्म। यतश्च तया सह सा स्वकनिष्ठा-भगिनीव व्यवहरति स्म। परन्तु अनुदिनं सुधायाश्चिन्ता व्यवर्द्धत एव तयोः सम्पर्कमधिकृत्य ।गच्छता कालेन तयोः सम्पर्कः कम् रूपं ग्रहिष्यतीति चिन्तिता सा क्षीणात् क्षीणतरा भवति स्म।

एवं खलूच्यते—कामासक्तायाः युवत्याः प्रेम, कस्तुरीमृगस्य गन्धश्च शतचेष्टयाऽपि गोपायितुं न शक्यते । घृताग्न्योः सम्पर्कः अपरिवर्तितावस्थायां बहुकालं स्थातुं न शक्नोति। तत्र परिवर्तनमवश्यम्भावि। एकदा सुधा स्वशयनकक्षे तां युवतीं स्वपत्या सहासंयतावस्थायां दृष्ट्वा अग्निशिखेवाभवत् ।स्वपतिमभिक्रुध्य सा तस्मिन्नेव क्षणे तां युवतीं गृहान्निष्कासितुमादिष्टवती। विश्वम्भरस्तां प्रबोधयितुं व्यर्थं चेष्टमान आसीत्। तेन तु केवलं सुधायाः क्रोधो द्विगुणीभूतः। सा गृहं त्यक्त्वा पितृगृहं गन्तुमुद्यताऽभवत्। विश्वम्भरस्य समक्षं महती समस्या। किमत्र तस्याचरणीयम् ? सुधा तु न कथमपि परित्यज्याऽस्ति। परन्तु सः किं शरणागतां तां युवतीमसहायावस्थायां महानगरस्य असामाजिकतत्वानां व्याघ्रमुखे निक्षेपयितुं शक्ष्यति ? कथं भेत्तव्योऽयं चक्रव्यूह इति विचिन्त्य विचलित आसीत् कश्चिदपरोऽभिमन्युः।



भाटक-गृहम्

नगरस्योपकण्ठम् उद्यानकाराणां वसतिः। तत्रैकस्मिन् भाटक-गृहेऽहं विगतषण्मासेभ्यः वसन्नासम्। महाविद्यालये राजनीतिविज्ञानस्या-ध्यापकरूपेण मम नियुक्तिः अष्टमासेभ्यः प्रागेव अभवत्। नियुक्तेर्मास-द्वयानन्तरं विंशतिसहस्ररूप्यकाणि सुरक्षाशुल्करूपेण गृहस्वामिनो दत्वा बह्वायासेन लब्धमिदं भाटकगृहम्। तदपि कस्यचित् सुहृदः अक्लान्त-सहयोगबलेन। ततः प्राक् तस्यैव सुहृदः भाटकप्रकोष्ठे तिष्ठन्नासम्। अतः गृहान्वेषणरूपिणी शिरोव्यथा तस्य मदपेक्षया काचिदधिकतरासीत्। साऽपि स्वाभाविकी। स तु एकस्मिन्नेव प्रकोष्ठे सकलत्रं तिष्ठन्नासीत्। नूतनतया परिचितः कश्चिद् बन्धुः इतः किमधिकं सहयोगं कुर्यात्?

आदौ मम एतादृशी धारणासीत् यत् सप्ताहाभ्यन्तरे यथाकथमपि भाटकगृहस्यान्वेषणे सफलो भविष्यामि। परन्तु अविवाहितस्य मम को वा दद्याद् भाटकगृहम्:? वस्तुतः अस्यां नगरसभ्यतायां गृहस्वामिनोऽविवा-हितानां कृते सशङ्कितास्तिष्ठन्ति। ते तु विवशाः सन्तः तद्जनितामार्थिक-क्षतिं सोढुं प्रस्तुताः भवन्ति परन्तु अविवाहितानां कृते गृहं दातुं सर्वथैव पश्चात्पदाः दृश्यन्ते। गृहस्थाः कन्याः, वध्वश्च अविवाहितस्य भाटक-निवासिनः समुपस्थितौ सुरक्षिताः न भवन्तीति तेषां युक्तिः। कदाचित्तेषां मन्तव्यानि तथ्यसमर्थितान्यपि भवेयुः। यद्यपि दुष्टजनैः सह ममापि गणना क्रियते इति मत्कृते महान् हि अरुन्तुदो विषय आसीत् तथापि मौनमाश्रित्य सहनादतिरिक्तं मत्सविधे किं वा उपायान्तरं स्यात्।

निरुपायेण तेन सुहृदा परामृष्टोऽहं मिथ्या भाषितुं यदहं विवाहितो-ऽस्मीति। पत्नी तु साम्प्रतं गृहे पितृभ्यां सह तिष्ठति। लब्धे च भाटकगृहे सऽचिरादेवागमिष्यति। मिथ्याभाषणं तु मम स्वभावाद् विपरीत-मासीत्। परन्तु कोऽत्रास्ति मे विकल्पः?

एवं कल्पितं तथ्यमेतद् गृहस्वामिने न्यवेदयम् । आगामिनि पूजावकाशे गृहं गत्वा तामानयिष्यामीति प्रतिश्रुतोऽप्यभवम् । अन्ततो गत्वा दयापरवशेन तेन गृहस्वामिना, प्रतिज्ञातस्य मम कृते स्वकीयावासपरिसरे द्विप्रकोष्ठात्मकः कश्चिदावासः प्रतिमासं द्विसहस्ररूप्यकविनिमयेन प्रदत्तः । स्वमासिकवेतनस्योल्लेख्यमंशं आवासभाटकार्थं व्ययीकृत्यापि गृहस्वामिनः कृपापात्रतां भजामीति महान् हि खेदश्चेतसि मे । इदमेव भवेत् महानगरसभ्यताया अत्याधुनिकत्वपराकाष्ठाया निदर्शनम् ।

यावत् समीपायते दुर्गापूजावसरः तावच्चानुवर्द्धते स्म मे चेतश्चिन्ता । 'किं करवाणी'ति दरिद्रपञ्चाक्षरमन्त्रमेवासीन्मे शरणं तदानीम् । अविवाहितस्य मम पत्नी भवितुं का, किमर्थं वा दास्यति स्वकीयां स्वीकृतिम् ? एतादृशश्चमत्कारास्तु केवलं चलच्चित्रेषु यदा, कदा दृष्टिगोचराः भवन्ति । परन्तु वास्तविकजीवने तादृशी कल्पना सर्वथानुचिता प्रतिभाति ।

पत्रमाध्यमेन सर्वाः मे विवशताः पितृभ्यां निवेदिताः । तावपि वार्तामिमां श्रुत्वा मद्विवाहविषये तत्परौ वर्तेते । परन्तु इयत्या त्वरया कथं सम्पादनीयः जीवनस्यैतावान् महत्त्वपूर्णप्रसङ्गः ? अस्तु यद् भावि तद् भविष्यत्येव । पूजावसरे गृहं गत्वा पितृभ्यां परामृश्य यत् किमपि सम्भविष्यति तद् विधास्यते इति विचिन्त्य पूजावकाशप्रतीक्षायां दिनानि गणयन्नतिष्ठम् ।

× ×　　　　× ×　　　　× ×

स्वपूजावकाशमुपभोक्तुं, जीवनस्य कमपि महत्त्वपूर्णं निर्णयञ्च नेतुमहं गृहमागतोऽस्मि । ग्रीष्मावकाशान्न्यूनतरोऽपि अपरेभ्योऽवकाशेभ्यो दीर्घतमोऽस्त्ययं पूजावकाशः । अहं किन्तु अवकाशेऽपि कार्यव्यस्त एवासम् । तथा चासन् मम गृहस्यान्येऽपि सदस्याः । प्रचलति स्म मदनुरूपायाः योग्यकन्याया अन्वेषणम् । यद्यपि तदानीं विवाहलग्नानि नासन् तथापि उत्कलीयानामस्माकं सर्वेष्वनियमेषु जगन्नाथ एव नियमः । पुरीं गत्वा जगन्नाथक्षेत्रे असमयेऽपि विवाहस्यायोजनं कर्तुं शक्यते । इदृशी च वर्ततेऽस्माकं परम्परा ।

बह्वायासेन इतिश्री-नाम्नी काचिद् युवती मया विचिता विवाहार्थम्। सा तु युवती यद्यपि मम कल्पनानुरूपा नासीत् तथापि तामहं कार्यनिर्वाहपरम्परामनुरुध्य अचिन्वम्। तरुणमनसः मम स्वप्नानुसारं तस्यै अङ्काः प्रदास्यन्ते चेत् सा पञ्चाशत्तोऽधिकान् अङ्कान् प्राप्य द्वितीयश्रेण्यामुत्तीर्णा भविष्यति। अस्तु, जगति न कोऽपि पुरुषः स्वप्नानुसारिणीं पत्नीं प्राप्नोतीति विचिन्त्य दार्शनिकपद्धत्या स्वान्तं असान्त्वयम्।

यद्यपि विवाहो मे पुरुषोत्तमक्षेत्रे कयाचित् त्वरया सम्पन्नस्तथापि सुचारुरूपेण सम्पन्न इति तत्र भागं ग्रहीतारः सर्वे ज्ञातयः बान्धवाश्च प्रमाणयन्ति। परन्तु माता मे विवाहानन्तरं सहसैव पुत्रवध्वाः पुत्रेण सह नगरगमनं नानुमनुते। तथापि परिस्थित्याः जटिलतामवगत्य मे पिता तामपि येन केन प्रकारेण सान्त्वयामास। अन्ततो गत्वा पूजावकाशानन्तरमहं नवविवाहितया पत्न्या सह महानगरं प्राप्तवान्। आवश्यकतानुरोधात् प्रागुक्तं मेऽनृतं मन्तव्यं सत्येन परिवर्तितम्।

इतिश्री यद्यपि उच्चशिक्षिता तथापि ग्राम्यसभ्यतायां पालिता, वर्द्धिता च सा महानगरसभ्यतया अपरिचितेव आसीत्। स्थानं नूतनम्। अपरिचिता अपि प्रतिवेशिनः। अतः, एकाकिनी बहिर्गमनाद् बिभेति स्म। न जाने किमर्थमपरिचितेऽस्मिन् नगरे आत्मानं सा असुरक्षितामिवानुभवति स्म। विपणिं शाकतण्डुलादिकमानेतुं सा मामेव प्रेषयति स्म अथवा मया सहैव गत्वा तत्सर्वमाचरति स्म। परन्तु तथापि नगरस्य कामचराणां कटूक्तिभ्यः अश्लीलेङ्गितेभ्यश्चात्मानं पृथक्कर्तुं नाशक्नोत्।

एतादृशी मे तिक्तानुभूतिः मां वारम्वारं स्मारयति स्म यदियं वसतिः भद्रजनानां निवासार्थम् अनुकूला नास्ति। इयं तु वसतिः बहुकालाद् आपराधिकानां मद्यपानां च 'आड्डा'-स्थली वर्तते। परन्तु यावदपरं भाटकगृहं नोपलभ्यते तावद् अत्रैव यथाकथञ्चित् कालो यापनीयः। गृहस्वामी तु विषयेऽस्मिन् औदासीन्यं वहति। ततोऽधिकं किञ्चित् कर्तुमपि स न शक्नोति। उन्मोचिते च मुखे स स्वयमेव सङ्कटापन्नो भविष्यति।

सुहृदां सहकर्मिणां सहायताबलेनापरः कश्चिदावासोऽन्यस्यां वसत्यामन्विष्टः। विवाहितत्वाद् गृहान्वेषणे न तथायासो जातः। परन्तु नूतनतया निर्मिते तस्मिन्नावासे गन्तुं न्यूनान्न्यूनाः पञ्चदशदिवसा अपेक्ष्यन्ते। विद्युज्जलादिनां व्यवस्था करणीयाऽवशिष्यते। अतः, अपरस्य मासस्य मासारम्भे गन्तुं शक्यते। तेन च गृहस्वामिनो भाटकप्रदाने सौकर्यं भवति।

×× ×× ××

अक्टोबर्-मासस्य कश्चिद् रविवासरः। शारदीये तस्मिन् सायंकाले पत्न्या सह बहुचर्चितं किमपि चलच्चित्रं द्रष्टुं गतवानासम्। चलच्चित्रं दृष्ट्वा बहिरेव भुङ्क्त्वा रात्रौ दशवादनसमये गृहं प्रतिन्यवर्तावहि। गृहे प्रविश्य यावदावाभ्यां मुख्यद्वारं पिहितं तावत् कपाटे तीव्रकराघातं श्रुत्वा चकितावभवाव। इयत्याम् रात्रौ कस्तत्र भवितुमर्हति ? कपाटोन्मोचनात्पूर्वं वातायनद्वारा बहिर्दर्शनं मे उचितं प्रत्यभात्। परन्तु तत्र किमेतत् पश्यामि ? द्वित्राः मद्यपाः यथाकथमपि स्वाव्यवस्थितपादान् संयमयन्तः पुनः पुनः कपाटे कराघातं कुर्वन्त आसन्। सम्भवतस्ते प्रत्यावर्तनसमये आवां दृष्ट्वा, आवयोः पन्थानमनुसृत्यात्रोपगताः वर्तन्ते। अत्रावयोः मौनमाचरणीयमिति श्रीमत्या परामृष्टः आत्मनः क्रोधं यथाकथञ्चित् शमयित्वा, एतदेवेदानीमावयोः कृते श्रेयस्करमिति धिया मौनमुपाविशम्। परन्तु ते पशवः किमवबुध्येयुरेतस्य गूढार्थम्। ते तु स्वकर्मणि व्यापृताः आसन्। यावद् द्वारं नोन्मोचयिष्यते तावत् स्वकार्यान्निवृत्ताः न भविष्यन्तीति यथा प्रतिज्ञातास्ते। विरक्त्याऽतिष्ठोऽहं द्वारमुन्मोचयितुं सज्जोऽभवम्। परन्तु इतिश्री मां पुनः निवारितवती तदाचरितुम्। अहमपि तया सहैकमतोऽभवम् यद् मध्येवनं पुत्रं प्रसूय व्याघ्रभल्लुकादिभिः वन्यैः हिंस्रपशुभिः शत्रुता नाचरणीया इति।

—अरे भोः मातृहारि ! भगिनीहारि !! द्वारमपावृणु। अध्यापको भूत्वा अपकर्मीण्याचरसि। कां शिक्षां ग्रहीष्यति समाजस्त्वत्सकाशात् ? अर्द्धरात्रे कस्यचित् कन्यामपहृत्य अवैधयौनव्यभिचारे लिप्तोऽसि। द्वारमुन्मोच्य तामस्मभ्यमर्पय। अन्यथा त्वां "पोलिस्"-हस्ते दापयित्वा दण्डयिष्यामः। एतादृग्भिरश्राव्यगालिभिस्ते मां वारम्वारं व्याघातयन्त आसम्। तेषामेतादृगाचरणं दृष्ट्वा इतिश्री भीता, त्रस्ता चाभवत्।

एवम्विधामुत्तेजकां गालिं श्रुत्वा मन्मनस्यागतं कोपं मनस्येवोपशाम्य, इतिश्रीं च सान्त्वयित्वाऽहं मौनं चिन्तयन्नासम् यत् कथमेते सम्बोधनीया: ? कथञ्चैतान् वास्तविकतथ्येनावगतान् करिष्यामि यत् इतिश्री मे धर्मपत्नी नत्वपहृता काचिद् युवती यथा तेऽनुमन्वते । अथवा त्यज्यतामेषां चिन्ता । एवं प्रलपन्त: श्रान्ता: भविष्यन्ति चेत् स्वयमेव पलायिष्यन्ते ।

तावत् लोष्टद्वयं काचनिर्मितं वातायनं सम्भिद्य आवयो: शयन-कक्षेऽपतत् यत्र इतिश्री उपविष्टासीत् । केशमात्रव्यवधानेन सा सुरक्षिताऽभवत् ! अन्यथा शिरस्यलगिष्यत् चेत् चिकित्सालयगमनस्यावश्य-कतापतिष्यत् ।

त्वरया मया वातायनमवरुद्धम् । सद्य: निर्मितेन छिद्रेण द्विकं, त्रिकं वा लोष्टं तथापि गृहे इतस्तत: पतदासीत् । अवरुद्धेऽपि प्रकोष्ठद्वारेऽहं तेषां मद्यपानामजस्रवर्षिता: गाली: श्रोतुं प्रभवामि स्म । इतिश्रीं मया सह दृष्ट्वाद्य तेषामेतद् दुराचरणमिति स्पष्टं जानामि । यतो ह्येतेषामेता-दृग्भिर्दुर्व्यवहारैश्चाहं पूर्वपरिचत आसम् । विवाहात् प्रागपि एते यदा, कदा मामुत्पीडयितुं नवां नवां योजनां विधायागच्छन्ति स्म । परन्तु तदानीमेकाकिनो मे नासीत् तथा भ्रूक्षेप: एतेषां दुर्व्यवहारमुद्दिश्य ।

अद्य किन्तु स्थिति:, परिस्थितिश्च काचिद् भिन्नैव वर्तते । भीरो: भीरुरपि पुरुष: स्वपत्न्या: समीपे स्वपौरुषस्य तिरस्कारं सोढुं न शक्नोति । अहं तु मम छात्रजीवने कदाचित् वार्षिकक्रीडा-प्रतियोगितायां महाविद्यालयस्य सर्वश्रेष्ठ-क्रीडक आसम् । तस्मिन् वर्षे छात्रैरहं महा-विद्यालयस्य क्रीडासचिवत्वेनापि निर्वाचित: ।

एतादृशी अपराऽपि काचिद् घटनाऽत्र षण्मासेभ्य: प्राक् संघटितासीद् यदाऽहं नूतनतया वसत्यामस्यामागतवानासम् । अर्द्धरात्रे केचन मद्यपा: काञ्चन युवतीमानीय अत्रागतवन्त: । कस्यचिन्निरापदस्थानस्यान्वेषणे इतस्तत आहिण्ड्यमानास्ते मदावासमेव समुचितस्थानं मत्वा मामाहूत-वन्त: । मया यदा ज्ञातं यत् तेऽत्र तया सह बलात्कारमाचरितुं सन्नद्धा: सन्ति तदाहं द्वारं नोद्घाटितवान् । निरुपायास्ते मामश्राव्यां गालिं श्रावयित्वा मृत्युना दण्डयितुं च सावधानवाणीं श्रावयित्वाऽन्यत्र पलायितवन्त: ।

अद्य किन्तु ते पलायनस्य नामापि न धरन्ति। मम पत्नीं चोद्दिश्य अश्लीलवचनानि श्रावयन्ति। तेषामेतादृशं दुःसाहसिकं प्रलापं श्रुत्वा यथा सर्पाः 'वीण'-वादनं श्रुत्वा स्थिराः स्थातुं न शक्नुवन्ति तथाहमपि कपाटमुन्मोच्य गृहाद् बहिरागतवान्। अप्रत्याशितरूपेण तत्र मां दृष्ट्वा ते कियत्क्षणं मौनमतिष्ठन्। ततः कश्चिदभाषत—"अरे ओ मातृहारी! एकाकी किमर्थमागतोऽसि? तामपि श्यालीं बहिरानय। सर्वे मिलित्वा तस्याः सतीत्वेन खेलिष्यामः। अथवा त्वमत्र बहिस्तिष्ठ, वयं सर्वे गृहाभ्यन्तरं गत्वा···············"।

तेषाममानवीयां वाणीं श्रुत्वा रक्ततण्डुलं चर्वयन्नहं एकस्य शिरसि मुष्ट्याघातमकरवम्। अनुभूतं च मया यदेते पदाघातस्य योग्याः भूताः वार्ताभिः न शिक्षिष्यन्ति। अतः, एतान् उत्तममध्यमानि दत्त्वैवास्मात् स्थानाद् दूरीकरिष्यामि चेत् समीचीनं भवेत्। एकेनैव मुष्ट्याघातेन स वराको नीचैरपतत्। ततः द्वारसमीपे उपविष्टमपरमर्द्धचन्द्राकारेण करेणाघातमहं प्रापितवान्। सोऽपि तस्य सहचर इव नगरनिगमस्य नलायाम् अपतत्। मद्यपाश्चैतावन्तः दुर्बलाः सन्तीति मम धारणैव नासीत्। तं युवकं नलायां पतितं दृष्ट्वा अपरौ द्वौ मां मारितुमागतवन्तौ। तयोः कश्चिन्मम पादावाकृष्य मां भूमौ पातितवान्। अहं च भूमौ छिन्नो वृक्ष इवापतम्। अनन्तरं ते सर्वे मद्यपाः सम्मील्य ममोपरि उपविष्टवन्तः। हस्ताभ्यां, पद्भ्यां च मारितवन्तः। मद्यपानकारणात् ते आत्मन्येव नासन्। अप्येते मां पञ्चत्वं प्रापयिष्यन्ति? इष्टदेवं स्मरन्नहं पार्श्वं परिवर्तितवान्। तेन ते सर्वे कथं भूमावपतन्निति साश्चर्यमहमद्यापि स्मरामि। यदि मद्यपानेन जना एतावन्तः दुर्बलाः भवन्ति तर्हि नारीधर्षण-हत्यादीनपराधांस्ते कथं समाचरन्ति? अथवा स्वसामर्थ्यादधिकं पीत्वैव कदाचित् तेऽनियन्त्रिताः सन्तः दुर्बलाः भवेयुः। तेषां कृते कीदृशो दण्डो विधेय इत्यहं चिन्तयन्नासम्। तावत् 'वन्दुक'-धारी कश्चिद् भटस्तत्रागतवान्। तं दृष्ट्वा ते सर्वे तत् स्थानं परित्यज्य पलायितवन्तः। अहमपि एकस्याः महत्याः विपदः रक्षां प्राप्तवान्।

तस्मिन्नेव मुहूर्ते मया स्थिरीकृतं यत् श्वः येन केन प्रकारेण भाटक-गृहमिदं परित्यज्य नूतनं भाटकगृहं गमिष्यावः। विद्युज्जलयोरभावेऽपि तत्र कार्यं निर्वक्ष्यावः, परन्त्वत्र स्वजीवनेन सह न खेलिष्यावः।

रक्षासूत्रम्

सान्ध्यभ्रमणार्थं विपणिं गतवानासम्। तत्रापेक्षाकृतमधिकं संमर्दं दृष्ट्वाऽमन्वि यत् श्वः किञ्चिद् विशिष्टपर्व स्यात्। अत एव क्रयविक्रयेषु जनानामेतादृशी तत्परता। तत्र च नियमितापणेभ्योऽतिरिक्तान्यपि कानिचन पटनिर्मितानि नूतनानि सामयिकापणानि इतस्ततः दृश्यन्ते स्म। संमर्दोऽपि तेष्वेवापणेषु अधिक आसीत्। अतः विपणीयं वस्तु मम दृष्टिपथे सर्वथा नायाति स्म। ग्राहकेष्वपि महिलानां संख्या अधिकासीत्। अतः, अवलोकनार्थं सत्यामपीच्छायां सङ्कोचवशात् द्रष्टुं नाशक्नुवम्। कदाचित् बलयापणं भवेत्। ममाभिरुचिं दृष्ट्वा स्त्रियोऽन्यथा न मन्येयुः। परन्तु यदि बलयापणं स्यात् तर्हि तत्रैतादृक् संमर्दः किमर्थं भवेत्? किमस्य नगरस्य सर्वा अनूढाः युवतयः श्व एव परिणेष्यन्ति, अथवा विवाहितमहिलानां पुनर्विवाहार्थमेषा पूर्वप्रस्तुतिः।

अग्रे गच्छन् कस्मिंश्चिदापणे किञ्चिन्न्यूनं संमर्दं दृष्ट्वाहं निकटं गत्वाऽपश्यं यद् रङ्गविरङ्गानि वहूनि क्षुद्राणि, वृहन्ति च मनोहराणि वस्तूनि तत्र शोभन्ते। तानि च दृष्ट्वा ममावबोधने न किञ्चिदसौविध्यं जातं यदापणेषु सज्जितानि तानि रक्षासूत्राणि सन्ति। अतः, श्वः पवित्रं रक्षाबन्धनमिति सहजतया ज्ञातुं प्राभवम्। अत एव कार्यालयेऽत्रकाशः। अद्याप्यविवाहितोऽहं भाटकगृहे एकाकी तिष्ठामि। अतः पर्वणां विषये सम्यक् न जानामि। आगामिनि दिवसे राजपत्रितावकाशोऽस्तीति सूचना मत्कृते पर्याप्ता भवति। किमर्थमस्तीति यदि न जानामि तर्ह्यपि मत्कृते न कापि हानिः। अत एव विषयेऽस्मिन् मम औदासीन्यम्।

तदानीं मम मनसि एका जिज्ञासाऽनायासं प्रादुरभूत्—रक्षाबन्धन-दिवसे भगिनीभिः भ्रातॄणां हस्ते रक्षासूत्र-वन्धनस्य परम्परा कियती प्राचीना भवेत्? एषा परम्परा मूलतया हिन्दूभिः प्रवर्तिता, अथवा

यवनैः (मुस्लिमैः) ? यद्येषा परम्परा हिन्दूनां तर्हि साऽतीव प्राचीना भवेत् । तर्हि ग्रामेषु ये हिन्दवः सन्ति ते कथं रक्षासूत्रबन्धने शिथिलाः दृश्यन्ते ? अद्य ग्रामेषु किं भवतीत्यहं सम्यक्तया वक्तुं न शक्नोमि । परन्तु पञ्चदशवर्षेभ्यः प्राग् यदा मम ग्रामेषु नित्यसम्बन्ध आसीत्तदानीं किं जनाः रक्षासूत्रबन्धनविषये न जानन्ति स्म ? ते तु पर्वमिदं भिन्नया शैल्या पालयन्ति स्म । तदा भगिन्यः भ्रातॄणां हस्ते रक्षासूत्राणि न बध्नन्ति स्म । कदाचित् धनाढ्यजनानां गृहे एतादृशी परम्परा भवेत् । परन्तु मादृशानां मध्यवित्त-जनानां गृहेषु एषा परम्परा नासीदित्यहं शतप्रतिशतं स्पष्टं वक्तुं शक्नोमि । कृष्युपजीव्यानामस्माकं गृहे त्वस्यां पूर्णिमायां बलदेवपूजा-या एव महत्त्वमासीत् । अतः, बलीवर्दस्य पूजा अस्मिन्नेव दिने क्रियते स्म । तांश्च बलीवर्दान् पुष्पहारैः भूषयित्वा सुस्वादुशष्कुल्यः भोक्तुं दीयन्ते स्म । बालकानामस्माकं कृते नूतनयज्ञोपवीतधारणार्थमासीदेषः सुवर्णावसरः । अस्मिन् दिवसे तेऽपि बालकाः यज्ञोपवीतं धारयन्ति स्म येषां यज्ञोपवीत-संस्कारोऽपि न विहितोऽस्ति । अपरं च, अस्मिन् दिने त्रैवर्णिकाः (ब्राह्मण-क्षत्रिय-वैश्याः) आबालवृद्धाः सर्वे यज्ञोपवीतं धारयन्ति स्म । परन्तु तदानीं रक्षासूत्र-बन्धनविषये मम धारणैव नासीत् । नगरमागत्याहमनया परम्परया शनैः परिचि-तोऽभवम् ।

विपणितः प्रत्यावर्तनसमये मनसि मे काचित् सुप्तेच्छा जागरिता यदेकं रक्षासूत्रमहमपि श्वः धारयिष्ये । परन्त्वत्र भगिनी मे कुत्रास्ति या मम हस्ते रक्षासूत्रं बध्नीयात् । अस्तु, तत्तु श्व एव द्रक्ष्यामः । अद्य तु केवलमेकं रक्षासूत्रं क्रेतव्यं वर्तते । श्वः यां कामपि महिलाम् अनुरुध्य एतत् पवित्रकार्यं कारयिष्यामि । एवं विचिन्त्य पञ्चरूप्यकविनिमयेन एकं रक्षासूत्रं क्रीत्वा गृहं प्रत्यावर्ते ।

परेद्युः प्रातरेव मम कश्चिदन्तरङ्गो बन्धुः ममावासमागत्य मां जागरितुं किञ्चिदुच्चैराहूतवान्—

—"अरे ! अद्यापि स्वपिषि ? उत्तिष्ठ, उत्तिष्ठ । आश्रमं गच्छावः । एकसप्ताहात् प्रागेव त्वामुक्तवान् खलु किं न स्मरसि ? रक्षा-बन्धनदिवसे एतावत्कालं यावत् स्वपिषि" !

सुहृदः प्रकाशस्य आश्रमगमनाय आह्वानं श्रुत्वा मया स्मृतं यदह सप्ताहात् प्राक् तेन सह प्रजापिता-ब्रह्माकुमारी-ईश्वरीय-विश्वविद्यालयस्य स्थानीयशाखां गन्तुं प्रतिश्रुत आसम्। प्रकाशस्तु तस्या आध्यात्मिक-संस्थायाः पुरातनसदस्योऽस्ति। परन्तु मम तत्र किं कार्यमिति पृष्टे सति स उक्तवान् यदद्याश्रमे भगिन्यः प्रत्येकस्य हस्ते रक्षासूत्राणि बन्धिष्यन्ति। मिष्टान्नमपि खादितुं मिलिष्यति। मन्मनसि अनायासं काचिद् दुश्चिन्ताऽपि आगता यत् तत्र यदि ताः मां तस्याः संस्थायाः स्थायिसदस्यत्वमङ्गीकर्तुं प्रवर्तयिष्यन्ति तर्हि किं करवाणि ? एतदेवाहं जानामि यत् एवमाचरिते सति आजीवनं कुमारो भूत्वा 'शिवबाबा स्मरणीया' इति मन्त्रं जपन्, तद् गोलकाकारं रक्तवर्णं प्रकाशस्वरूपं च काल्पनिकं परब्रह्म ध्यायं ध्यायं जीवनं यापयितुं विवशो भविष्यामि। परन्तु मनस्यागतामेतां शङ्कां प्रकाशस्य सम्मुखे न प्रकाशितवान्। पूर्वस्मिन् दिने सायंकाले क्रीतस्य तस्य रक्षासूत्रस्य सदुपयोगार्थम् अयमेवास्ति कश्चित् समुचितोऽवसर इति विचिन्त्य त्वरया स्नानादिकं नित्यकर्म सम्पाद्य प्रकाशेन सह गन्तुं प्रस्तुतोऽभवम्।

×× ×× ××

प्रजापिता-ब्रह्माकुमारी-ईश्वरीय-विश्वविद्यालयीय-नगरशाखायाः शान्तमयः कश्चिद् वृहत्प्रकोष्ठः। सम्मुखे भित्त्यां गोलाकारविशिष्टः रेखाङ्कितः रक्तवर्णः कश्चित् प्रकाशः। तत्रत्याः धवलवस्त्रधारिणः सर्वे भक्ताः तमेव प्रकाशं पश्यन्तः, अथवा ध्यायन्तः भूतले एवोपविष्टाः सन्ति। प्रकोष्ठमध्यात् मृदु-सुवास आगच्छन्नस्ति। स च सुवासः सम्भवतः प्रज्वालितमहार्घ-गन्धवर्तिकाभ्य आगच्छेत् कदाचित्। अथवैषः सुवासो भक्तैः प्रयुक्तस्य महार्घसुवासकस्यापि सुरभिर्भवेत्।

आवयोरागमने सामान्यकालविलम्ब आसीत्। अतः, आवां त्वरया गन्धामोदमये तस्मिन् प्रकोष्ठे प्रविश्य आसनग्रहणपूर्वकं चक्षुष्युन्मील्य ध्यानमग्नावभवताम्। अनभ्यासात् मम चक्षुषोरुन्मीलनमपि सायासं भवति स्म। कियत्कालानन्तरं प्रकोष्ठमालोकितमनुभूय चक्षुष्युदमोचयम्। ततः कञ्चिदवसरं प्राप्य मत्परितोऽपश्यम्। तावत् सर्वेषां चक्षूंषि उन्मुक्तान्यासन्। संपूर्णं प्रकोष्ठं श्वेतमयं दृष्ट्वात्मानमहं वकमध्ये काक

इवामन्वि। तत्र सर्वे पुरुषाः, स्त्रियश्च अथवा कुमाराः, कुमार्यश्च धवल-वस्त्रधारिण्य आसन् । अहं किन्तु सर्वथा विपरीतेन कृष्णवस्त्रेणाच्छादित आसम्। वस्तुतः, तत्रत्यमहिलानां पूर्णहस्तकञ्चुकीं दृष्ट्वाहमतीव प्रीतोऽभवम् । यतश्चात्याधुनिकेऽप्यस्मिन् युगेऽहं कश्चित् पुरातन-चिन्ताशीलोऽस्मि । अन्ततः, आसां भगिनीनां नूतनभूषाप्रकाराङ्गी-कारछलेन अङ्गप्रदर्शनरूपा कुप्रवृत्तिर्नास्ति। अतः, समवेताश्च ताः भगिनीरूपेण स्वीकारे मम काप्यापत्तिर्नाभवत् ।

तावत् प्रकोष्ठे रक्षासूत्रबन्धन-कार्यक्रमः प्रवर्तते स्म। यदा एका भगिनी प्रकाशस्य हस्ते रक्षासूत्रबन्धने तत्परासीत् तदा मया चिन्तितं यदहं तां स्वकीयं रक्षासूत्रं बद्धुं दास्यामि। परन्तु सा यदा मम मस्तके तिलकं कुर्वन्ती आसीत्तदाहमपश्यं यत्तस्याः सविधे स्थितानि सर्वाणि रक्षासूत्राण्यपि धवलवर्णानि सन्ति। अतोऽहं बहुवर्णयुक्तं तं मदीयम् रक्षा-सूत्रं निष्कासयितुं सङ्कोचमन्वभवम्। कश्चिदमायिक शिशुरिव स्वहस्तं प्रदर्शितवान् केवलम् । भगिनी किन्तु मां सङ्केतेन दक्षिणहस्तं प्रदर्शयितुं निर्देशितवती। अहं त्वरया वामहस्तं प्रदर्शयन्नस्मीति ज्ञात्वा किञ्चिल्ल-ज्जितोऽप्यभवम्। एवं यथाकथमप्यवसितः रक्षाबन्धनकार्यक्रमः। आवां च मिष्टान्नं खादित्वा यथासमयम् आश्रमात् प्रतिन्यवर्तावहि।

प्रत्यावर्तनसमये मार्गेऽपश्यम् यत् प्रायशः सर्वेषां पुरुषाणां हस्ते एकाधिकानि रक्षासूत्राणि शोभन्ते। केषांचित् पुरुषाणां हस्ते तु बाहुपर्यन्तं रक्षासूत्राणि शोभन्ते स्म। नगरेऽस्मिन् भगिनीनां संख्या भ्रातॄणां संख्यातः काचिदधिकास्तीति धारणा दृढीभूता मे चेतसि । तत्र सर्वकारः परिवार-नियोजन-योजनां सफलीकर्तुं बहुविधं प्रयासं विदधाति । परन्त्वत्राहं पश्यामि यदेकस्यैव भ्रातुः तिस्रः, चतस्रो वा भगिन्यो वर्तन्ते। इदृश्यां च वस्तुस्थितौ कथं सफलीभविष्यतीयं सर्वकारीया योजना इति चिन्तयन्नासम्।

गृहप्रत्यावर्तनसमये न जाने किमर्थं मनसि अपूर्वोल्लासमनुभव-न्नासम्। सम्भवतः, कदाचित् जीवने प्रथमतया रक्षासूत्रं धारयन्नस्मीत्यतः एतावान् हर्षः स्यात्। ह्यः विपणितः साग्रहं क्रीतं तद् रक्षासूत्रम् अद्यापि मम उरुकस्य गोहे वर्तते । यदि ममापि काचिद् भगिनी, धर्मभगिनी

वाऽभविष्यदस्मिन्नगरे तर्हि अस्य रक्षासूत्रस्यापि समुद्धारोऽभविष्यत् । अस्तु, अहमपि किञ्चिन्द् रक्षासूत्रं धारयामि किल ? तावदकस्मात् मम दृष्टिः पद्यायां कस्यचित् करुण-दृश्यस्योपरि गतवती । तद् दृश्यं दृष्ट्वा क्षणं यावन्मे पादौ तत्र 'न ययौ न तस्थौ' इत्यवस्थायां स्थगितवन्तौ ।

सप्तवर्षीया अष्टवर्षीया वा काचिद् बालिका त्रिवर्षीयं चतुर्वर्षीयं वा कञ्चिन्द् बालकं कक्षे गृहीत्वा करुणदृष्ट्या एकवारं विविधवर्णयुक्तं रक्षासूत्रापणं पश्यति । परस्मिंश्च मुहूर्त्ते लोभासक्ता सा रसमयं तत्तन्मिष्टान्नापणमप्येकवारं पश्यति । तच्च दृश्यं दृष्ट्वा व्यथितेन मया एवं निर्णीतं यन्नूनमेषा बालिका, बालकस्यास्य भगिनी वर्तते । भ्रातुः हस्ते रक्षासूत्रं बद्धुमिच्छन्ती, मिष्टान्नं च खादितुमिच्छन्ती सा अर्थाभावात् करुणनेत्राभ्यां केवलमापणानि पश्यन्ती तिष्ठति । तथ्यमेतदनुभूय मम हृदये किञ्चिदपूर्वकम्पनमहमन्वभवम् । चक्षुषोश्च स्वत एव कति लोतविन्दवः भूमौ अपतन् । दयाभिभूतोऽहं तस्याः सम्मुखमागत्य पृष्टवान्—"किं भ्रातुः हस्ते रक्षासूत्रं बद्धुमिच्छति" ?

मम मुखमदृष्ट्वैव साग्रहं सा शिरश्चालनपूर्वकं स्वस्वीकृतिमददात् । अनुमानं मे सत्यं जातमिति विज्ञाय तस्याः हस्ते पूर्वस्मिन् दिवसे क्रीतं तद् रक्षासूत्रं दशरूप्यकाणि च प्रदायोक्तवान्—

—"एतद् रक्षासूत्रं स्वभ्रातुः हस्ते बध्नातु । रूप्यकविनिमयेन आपणाच्च मिष्टान्नं गृहीत्वा खादतु, भ्रातरं च खादयतु ।"

दशरूप्यकाणि, रक्षासूत्रं च प्राप्य सा बालिका ईयती प्रसन्नाऽभवत् यत् मन्ये सा मां कृतज्ञतामपि ज्ञापयितुं विस्मृतवती । स्मितं हसन्ती एकमुखा सती मिष्टान्नापणं गतवती । तस्याश्चैतादृशीमदृष्टपूर्वां प्रसन्नतां दृष्ट्वा आत्मतृप्त्या पुनरेकवारं मन्नेत्रयोरश्रुविन्दवः गलिताः । तांश्च प्रोञ्छन्नहं चिन्तयन्नासं यत् केवलं पञ्चरूप्यकविनिमयेन क्रीतस्य तस्य रक्षासूत्रस्य किमितोऽप्यधिकं सदुपयोगमभविष्यत् कदाचित् ?

आस्थायाः आस्था

संसारेऽस्मिन् सहस्राधिकानामपि युवतीनां नामानि आस्था भवितुमर्हन्ति । न मम तत्र कोऽपि विरोधः, का वापत्तिः । अहं किन्तु तस्या आस्थाया विषये वर्णयन्नस्मि यस्यां मम आस्था बलवती वर्तते । स्वल्पकालात्मके परिचयेऽप्यहं तामधिकृत्य बहूनि तथ्यानि ज्ञातुं प्राभवम् । सा युवती तु वावदूका, बहुभाषिणी, जल्पनशीला तथा हसमुखी । सत्यपि महति दुःखे सा हसितुं शक्नोति । सांसारिक-व्यस्तता तां चालयितुं, व्यथयितुं वा न शक्नोति । सा हसति अन्यान् सुखिनो द्रष्टुम् । सा तथाकथितामात्मनिन्दां, मानहानिं, दुर्यशो वा न तथा गणयति यथाऽस्य संसारस्यान्ये जनाः येषां जीवनं तु केवलमभिनयमयम् । यदि कश्चित् तां दृष्ट्वा, स्पृष्ट्वाथवा तया सह वार्तालापं कृत्वा सुखी भवति तर्हि सा किमर्थं वञ्चयिष्यति तं तादृशोऽवसरात् । यदि कश्चित् तां दृष्ट्वा हसति तर्हि सा किमर्थं न हसिष्यति ? यदि कश्चित् तां किञ्चित् प्रक्ष्यति तर्हि सा किमर्थं नोत्तरयिष्यति । अवश्यं हि तस्या एतादृशः निर्विकारः स्वभावः अनेकधा बहून् भावुकान् मनश्चलांश्च नवयूनः भ्रमे पातयति । ते वास्तविकं तथ्यं सहसा ज्ञातुं न प्रभवन्ति यत् आस्था उपरि, उपरि स्व-स्वभाववशात् एतत् सर्वम् आचरति न तु प्रेमवशाद् अथवा भावुकतावशात् ।

उपरि, उपरि सा यूनः प्रेम प्रदर्शयति । स्वमनोरञ्जनार्थं तान् चक्षुर्भ्यामिङ्गयति । इङ्गितेनैव न जाने सा तान् किं किं वदति येन ते तदुपरि म्रियन्ते । परन्तु आस्था केवलमभ्यासवशादेव एतदाचरति । एवं कुर्वाणा सा कदापि भावविह्वला न भवति यथा भवन्ति तस्याः प्रतिपक्षिणः नवयुवानः । कदाचिद् वार्तायां, वार्तायां कस्य पत्रसङ्केतं जिज्ञासते । प्रसङ्गान्तरे कञ्चापरं स्वपत्रसङ्केतं प्रयच्छति । तत्रैव किन्तु अवसीयते तस्याः सम्पर्कः । भविष्यति संयोगाद् यदि कुत्र तेन सह पुनर्दर्शनं भवति तर्हि वरम्, यदि वा न सम्भवति तर्ह्यपि वरम् ।

आस्थायाः एतादृग् व्यवहारः कदाचित् तां सामयिकलाभं प्रददाति इति तु सत्यम्। परन्तु कदाचित् तां क्षुद्रायां, महत्यां वा समस्यायां न पातयतीत्यपि न। वस्तुतः, सा न तादृशे लाभे प्रसन्ना भवति न वा तादृश्यां समस्यायां विचलिता। सा तु तादृशीं समस्यां सहजतया सुचारुरूपेण च स्वमार्गाद् दूरीकर्तुं प्रभवति। उदाहरणार्थमहं किञ्चित् संस्मरणं श्रावयामि यस्मात् पाठकाः स्वबुद्धिव्यायामेन आस्थायाः जीवनदर्शनविषये किञ्चिद् ज्ञातुं प्रभविष्यन्ति—

एकदा वयं नूतनतया लोकार्पितं किमपि चलच्चित्रं द्रष्टुं कस्यचित् प्रेक्षागृहस्य सम्मुखे उपस्थिता आस्म। आस्थाऽपि अस्माकं समूहस्यान्यतमा सदस्या आसीत्। प्रेक्षागृहाद् बहिरुपस्थितमकथनीयसंमर्दं दृष्ट्वा यः कोऽपि तस्य चलच्चित्रस्य सफलताविषयेऽनुमातुं शक्नोति। परन्तु वयं तत्र निर्दिष्टसमयात् यथेष्टं प्रागेवोपस्थिता आस्म। प्रवेशपत्रं क्रेतुमहं निर्दिष्टपङ्क्तौ दण्डायमान आसम्। तत्र च पङ्क्तौ मम संख्या पञ्चम आसीत्। अतः, अनायासेन अस्मान् प्रवेशपत्राणि मिलिष्यन्तीति वयं निश्चिन्ता एवासम्। परन्तु सा चास्माकं धारणा कियत्क्षणेन मिथ्या प्रमाणिताऽभूत्। मत्सम्मुखे ये चत्वारः दण्डायमाना आसन् ते सर्वे अवैधव्यवसायिन एवासन्। यथासमयं यदा प्रवेशपत्रविक्रयं प्रारभत तदा ते अन्यान् चतुरः, पञ्चजनान् पङ्क्तौ अन्तः प्रवेशयित्वा सर्वाणि प्रवेशपत्राणि दशनिमेषाभ्यन्तरे क्रीतवन्तः। अहं यावत् पङ्क्तौ प्रथमसंख्यां प्राप्तवान् तावत् प्रवेशपत्रविक्रयद्वारम् अवरुद्धमासीत्। अस्माकं सम्मुखे तेऽवैधव्यापारिणः प्रत्येकं दशरूप्यकैः क्रीतानि प्रवेशपत्राणि पञ्चदशरूप्यकैः विक्रीणन्ति स्म। निराशया वयमपि तावन्मूल्यं दातुं प्रस्तुता अभवाम। आस्था किन्तु अवैधोपायेन प्रवेशपत्राणि क्रेतुम् अस्मान् निवारितवती। तेनैव मूल्येनास्मान् प्रवेशपत्राणि दास्यतीति प्रतिज्ञातवती। वयं तु साश्चर्यं तां दृष्टवन्तः केवलम्। तावत् सा प्रेक्षागृहस्य पार्श्वप्रकोष्ठे उपविष्टं कञ्चिद् युवकं पश्यन्ती आसीत्। मन्ये वातायनेन पश्यन् सः युवकः आस्थां सङ्केतेन किञ्चिदुक्तवान्। आस्थाऽपि तं सङ्केतेनैव स्वकीयां नकारोक्तिं श्रावितवती। सः तिस्रः अङ्गुलीः प्रदर्शितवान्। आस्था च चतस्रः। ततः सः युवक आस्थां वातायनसमीपमाहूतवान्। अस्मान् प्रवेशपत्राणि क्रेतुं

निवारयित्वा सा तत्र गतवती । वयं किमप्यवबोध्दुं न प्राभवाम । आस्था तत्र पञ्चनिमेषान् यावत् तेन सह वार्तालापे मग्ना आसीत् । पञ्चनिमेषानन्तरं ततः प्रतिनिवृत्य सा अस्मान् प्रवेशपत्रविषये आश्वासयित्वा तस्य युवकस्य विषये एवं सूचितवती— "एषोऽस्ति कश्चित् सामलबाबुः । तस्य नाम विस्मरामि । वयं यदा ताम्बूलापणे मिष्टिकाः (टफी) खादन्त आस्म तदाऽसौ दूरभाषप्रकोष्ठात् अस्मान् प्रदर्श्य पयोहिमं खादन्नासीत् । असौ भद्रजनः कटकनिवासी वर्तते । कटकादत्र चलच्चित्रकोषिकां (रील) गृहीत्वा आगतोऽस्ति । तस्याप्यन्यदेकं वैशिष्ट्यमिदमस्ति यत् सोऽस्य चलच्चित्रस्य अभिनेताऽपि वर्तते । परन्तु मन्येऽस्मिन् चलच्चित्रे तस्य भूमिका अतीव नगण्या वर्तते ।"

'हाबिलदार'-भूमिकायाम् एकवारं द्विवारं वा रौप्यपटे सः दृष्टिपथमायातीति चलच्चित्रदर्शनात्परम् अस्माभिः ज्ञातम् । वस्तुतः, सामलबाबुः तस्यां भूमिकायामेकवारमपि मुखं नोद्घाटितवान् । परन्तु प्रत्येकस्मिन् प्रदर्शने यदा तस्य भूमिकायाति स्म तदा स एकवारमवश्यमेवागत्य आत्मानं द्रष्टुं न विस्मरतीत्यपि तथ्यं चलच्चित्रदर्शनकालेऽस्माभिरनुभूतम् ।

यावत् तस्य संक्षिप्तपरिचयः आस्थया अस्माकं पुरतः उपस्थापितः तावत् तस्य प्रेक्षागृहस्यारक्षिकः अस्मान् समयात्पूर्वमेव अन्तः प्रवेष्टुमाहूतवान् । एतदपि सामलबाबोरहेतुक्याः कृपायाः फलमासीदिति ज्ञातुं विलम्बो नाभवत् । परन्तु यदा वयं सर्वे अन्तः प्रवेष्टुं प्रारभामहि तदा स आरक्षिकोऽवदत्—"सामलबाबुः केवलं युवतीद्वयमेव स्वप्रकोष्ठे उपवेष्टुमाह्वयति । भवन्तौ अत्रैव तिष्ठताम् । सर्वेषामुपवेशनार्थं तत्र उपधयो न सन्ति" । एतादृशं प्रस्तावं श्रुत्वाऽहं किञ्चित् शङ्कितः सामलबाबोः प्रकोष्ठमपश्यम् । एतावता उन्मुक्तं तद् वातायनं पिहितमासीत् । सामलबाबुस्तत्रान्धकारे शीतलपेयानि गृहीत्वैतयोर्युवत्योः प्रतीक्षायां वर्तते । अर्द्धवयस्कः सः ताम्बुलापणिकोऽपि स्वापणमर्द्धोन्मुक्तं त्यक्त्वा कुत्र गतोऽस्ति । एतस्य रहस्यं मम बुद्धौ किञ्चिदन्यथा स्फुरितम् । प्रस्तावस्यास्य आस्था किमुत्तरमदास्यत् इत्यहं न जानामि । परन्तु "वयमत्र सहजाः, सुखदाश्च स्म" इति आरक्षिकं सूचयित्वाहं पञ्चदशरूप्यकविनिमयेन प्रवेशपत्राणि क्रेतुं तत्परोऽभवम् ।

स्वप्रकोष्ठे उपविश्य मन्ये एतद् दृश्यं स्पष्टं पश्यन्नासीत् सामलबाबुः। अतः झटित्येव बहिरागत्य मामाकारयित्वा प्रावोचत्—"किं मदुपरि भवतः विश्वासो न भवति ? प्रेक्षागृहस्य प्रबन्धकमनुरुध्य मया भवतां कृते चत्वारि प्रवेशपत्राणि संरक्षितानि। यदा परवर्ति प्रदर्शनं प्रारप्स्यते तदा सः तानि मत्सविधे प्रेषयिष्यति। भवन्तस्तानि प्रवेशपत्राणि प्रत्येकं दशरूप्यकविनिमयेन प्राप्स्यन्ति। अत्र किमर्थं प्रत्येकस्य कृते पञ्चदशरूप्यकाणि व्ययीकुर्वन्ति ? भवतां कृते तु मया वी० आई० पी०-पङ्क्तौ स्थानानि संरक्षितानि। भवन्तः यदि मम प्रकोष्ठे उपवेष्टुं सङ्कोचमनुभवन्ति तर्हि उपरि गत्वा उपविशन्तु। तत्रापि केचन उपधयः सन्ति। अहमुचितसमये भवद्भ्यः प्रवेशपत्राणि प्रापयिष्यामि। अत्र सर्वेषां कृते स्थानानि न सन्ति। अत एवाहं युवतीद्वयमाहूतवान्। मन्ये भवान् अन्यथा चिन्तयन्नस्ति।

सामलबाबोरेतादृशं भद्रजनव्यवहारं दृष्ट्वा ममापि शनैस्तस्मिन् विश्वासो दृढीभूतः। अतः, प्रवेशपत्राणि क्रेतुं पञ्चाशद्रूप्यकाणि तस्य हस्ते अददाम्। परन्तु सः तन्न गृहीतवान्। प्रवेशपत्रप्रदानसमये मूल्यं नेष्यतीति श्रावयित्वाऽन्तः प्रविष्टवान्। वयमपि उपरि गत्वा तन्निर्दिष्टेषु उपधिषु उपविष्टवन्तः। प्रदर्शनस्यारम्भसमये स स्वयमागत्य अस्मान् प्रवेशपत्राणि प्रदत्तवान्। मत् पञ्चाशद्रूप्यकाणि गृहीत्वा दशरूप्यकाणि च परावर्तितवान्। सा एवासीत् तस्य साधुत्वस्य पराकाष्ठा। एवम् आस्थायाः आस्थावशात्, तस्याः व्यक्तित्वस्याकर्षणाच्चास्माभिः सुखेनोपभुक्तं तच्चलच्चित्रम्। सामलबाबुःआस्थायां, आस्थाया व्यवहारे च किमपश्यदिति वयं न जानीमः। परन्तु आस्थाया आस्थायां सोऽपि आस्थावानभवदिति विश्वसिमः। वार्तालापप्रसङ्गे सः आस्थायाः पत्रसङ्केतं स्वदैनन्दिन्यां लिखित्वैव नीतवान्। प्राप्ते चावसरे स तां मिलिष्यतीति प्रतिश्रुतवान्। चलच्चित्रं दृष्ट्वा प्रत्यावर्तनसमये सामलबाबुः प्रेक्षागृहाद् बहिः दूरभाषप्रकोष्ठेऽस्माकं प्रतीक्षायामस्तीति आस्था ज्ञातवती। तस्मै विदायसम्वर्द्धनां ज्ञापयितुं तस्या इच्छासीदिति अस्माभिरनुभूतम्। परन्तु अहं तथाचरितुं तां निवारितवान्। सापि न जाने किमर्थं कश्चिद् बाध्यशिशुरिव मद्वचसः प्रतिवादं न कृतवती। एतस्मिन् प्रसङ्गे तस्या युक्तिरपि उल्लेखयोग्या वर्तते—जीवने एवंविधाः कतिचन सामलबाब्वः,

जेनाबाब्वः, पण्डाबाब्वश्चागताः, आगच्छन्ति, आगमिष्यन्ति च। तान् सर्वान् स्मरिष्यामश्चेत् एकः इतिहासग्रन्थो भविष्यति।

एतत्त्वासीत् केवलं घण्टात्रयस्य संस्मरणम्। तस्या एकोनविंशति-वर्षात्मिकां जीवनीमधिकृत्य मन्ये काचित् सुरुचिरा आत्मकथाऽपि लिखितुं शक्यते। वयोऽनुपातेन अभिज्ञता तस्याः काचिदधिका प्रतीयते स्म। जीवनाद् वीतस्पृहा सा एषु दिवसेषु प्रजापिता-ब्रह्माकुमारी-ईश्वरीय-विश्वविद्यालयं प्रति किञ्चिदाकृष्टा भवतीति अनुभूतमस्माभिः। परन्तु अस्माभिः परामृष्टा सती सा सहजतया तत्र योगदानाद् विरताऽप्यभवत्। मन्ये सा न कस्मिन्नपि विषये दृढा भवति स्म। सम्भवतः सा कस्यचिन्महानुभावस्य गुरोः सकाशाद् जीवनं सहजतया जीवितुं काञ्चिद् दीक्षां गृहीतवती स्यात्। अन्यथा अद्यतनीयं संघर्ष-मयजीवनं लीलया हासपरिहासेन सा कथं जीवितुं शक्नुयात्?

कस्यचिद् बान्धवस्य गृहे यदा तया सह प्रथमवारम् अमिलम् तदा न जाने अपरिचिताऽपि सा मया सह परिचितेव व्यवहर्तुं प्रारभत। द्वित्रेषु दिवसेषु आस्थाया मदुपरि कथमीयती आस्थाऽभवदित्यहं न जानामि। सम्भवतस्तस्याः सर्वेषु एतादृशी आस्था भवेत्। अत एव तस्या 'आस्था' इति नामकरणं सार्थकतां वहति। अथवा मामिव कमपि अभिज्ञजनं सा अन्विष्यन्ती आसीत्। मम कृते तस्याः 'भ्रातः!' इति सम्बोधनमासीत्, परन्तु व्यवहारः अन्तरङ्गसुहृदवत्। न छलः, न गोपनस्य प्रयासः। स्वच्छतमेऽपि तस्याः शरीरे तस्याः आत्मा प्रतिफलति स्म। अतः, यः कोऽपि तस्याः उन्मुक्तमात्मानं पठितुं शक्नोति स्म। सापि रहसि कदाचित् तस्याः विफलां प्रेमकथां मां श्रावयति स्म। मध्ये, मध्ये ममाभिज्ञतायाः लाभमर्जयितुमिव तदुपरि टीकां टीप्पणीं च कर्तुं मां प्रेरयति स्म। तत्प्रसङ्गे प्रदत्तं मम परामर्शमपि सा गम्भीरतया शृणोति स्म। अहमपि तस्याः समक्षं स्वविचारान् प्रकटयितुं न कदाचित् सङ्कोचमन्वभवम्। चर्चाकाले अश्लीलदोषयुक्तां गोपनीयां वार्तामपि आवामनायासेन मुक्तकण्ठेन वर्णयितुं प्राभवाव।

यथा मया पूर्वं प्रतिपादितम्—वस्तुतः, आस्था काचित् सार्थक-नाम्नी। तस्याः सर्वेषु आस्था, सर्वेषां च तस्यामास्था। यः कोऽपि-तस्याः समक्षं यां कामपि गोपनीयां वार्तां प्रकाशयतु सा किन्तु तस्मै

पश्चात्तापस्यावसरं न ददाति। व्यावहारिकक्षेत्रे सा स्वयंसम्पूर्णासीत्। परन्तु अध्ययने साक्षाद् गर्दभी। 'हाईस्कूल्'-परीक्षां-येन केन प्रकारेण परीक्षकाणामनुग्रहबलाद् उत्तीर्णा। न केवलं परीक्षकाणां, निरीक्षकाणामपि तत्र योगदानं वर्तते। परीक्षाभवने निरीक्षणं कुर्वन् शिक्षकमहाशय आस्थायाः स्कन्धे वारद्वयं, वारत्रयं वा हस्तं स्थापितवान्। अवैधानुकरणाय तस्यै सुयोगं प्रयच्छन् सः प्रतिलेखपत्रके च स्वसङ्केतं तस्यै अददात्। आस्थायाः सख्यश्च तां विषयेऽस्मिन् परीक्षाप्रबन्धकमहाशयं सूचयितुं प्रेरयन्त्य आसन्। परन्तु आस्था तथा नाचरितवती। निजोपरि तस्याः महती आस्था। सा स्पष्टं जानाति यत् निरीक्षकमहाशयेन सह तस्याः दर्शनमपि न सम्भविष्यति। तत् प्रदत्तेन संकेतेन आस्था पत्रं न लिखिष्यतीति सा स्वयं जानाति। तेन तु केवलं स्कन्धोपरि वारद्वयं हस्तं स्थापितम्। परन्तु तेन किं महाभारतमशुद्धं भवति? निरीक्षकमहाशयः युवक आसीत्। कदाचित् युवसुलभस्वभावाद् एवमाचरितवान् भवेत्। तस्याः दृष्टौ न त्वयं कश्चित् चारित्रिको दोषः। विरोधं कुर्वन्ती यदि सा परीक्षायामनुत्तीर्णा भविष्यति तर्हि किमेताः सख्य आगत्य तस्याः पृष्ठे पतिष्यन्ति। दौर्भाग्यात् 'इण्टर्'-कक्षायां सा एतादृशं सुयोगं न लब्धवती। अतः, वारत्रयं यावत् अकृतकार्याऽभवत्। चतुर्थे प्रयासे तु येन केन प्रकारेण सफला जाता।

आस्था युवती। श्यामलवर्णा। तथापि आकर्षिका। सुपुष्टा तनुवल्ली। यदा हसति तदा द्वात्रिंशद् रदानि स्पष्टं दृग्गोचरीभवन्ति। वार्तालापप्रसंगे हसति सा सुमधुरं मुखरञ्च हसम्। सम्भवतः एतदेवासीत् तस्याः स्वास्थ्यस्य रहस्यम्। बह्व्यः ग्राम्याः लोकोक्तयस्तया कण्ठस्थीकृताः। परन्तु पदविपर्ययपूर्वकं तासां प्रस्तुतौ नीरसाद् नीरसा अपि जनाः हसितुं विवशाः भवन्ति। जीवने यदि स्वयं हसित्वा अपरानपि हासयितुं शक्यते तर्हि ततोऽप्यधिका अन्या का सफलता भवितुमर्हति? मन्ये आस्था ईश्वरस्य काचित् सफला सृष्टिः।

अग्निपरीक्षा

प्रातरष्टवादनं यावदहं शय्यां न त्यक्तवान् । रविवासरे विलम्बेन शय्यात्यागो मे पुरातनोऽभ्यासः । परन्तु अस्माकं श्रीमत्यै कथमपि न रोचते एष मे कदभ्यासः । ममैतादृशमभ्यासं दृष्ट्वा लक्ष्मी अस्मद्गृहं त्यक्त्वाऽन्यत्र गमिष्यति । बाला अपि मामनुकृत्य अमनुष्या भविष्यन्तीति तस्याः युक्तिः । तस्या एतादृश्यां युक्त्यां ममापि सहमतिरासीत् । अतोऽहं तूष्णीमास्थाय सर्वं शृणोमि स्म केवलम् । श्रीमत्याः तृतीयाह्वानेन प्रतिदिनं मे निद्राभङ्गः जायते स्म । अतः द्वितीयाह्वानानन्तरं तृतीयाह्वानस्य प्रतीक्षायामहं शय्यायां केवलं कालातिपातं कुर्वन्नासम् । परन्त्वद्य सा तृतीयाह्वानात् प्रागपि वर्षितुं प्रारभत—

—"अद्य यदि विलम्बेन उत्थास्यति तर्हि कलुमिआँ-मांसापणे गमनस्यावश्यकता नास्ति । पूर्णमूल्यं दत्वा अस्थिभक्षणे अस्माकं तथा रुचिर्नास्ति । भवांस्तु सर्वभक्षी । अस्थि, मांसं यन्मिलिष्यति तद् गिलिष्यति । मम बालास्तु अस्थिभक्षणे अभ्यस्ताः न सन्ति"। वस्तुतः अस्थिमिश्रितं मांसमस्माकं श्रीमत्यै न रोचते । अतः सा बालानां व्याजेन मां छागस्य हृदयभागमानेतुमादिशति स्म प्रतिरविवासरम् ।

श्रुते च श्रीमत्या एतादृशे नियमे स्वत एव ममाक्षिणी उन्मुक्तेऽभवताम् । कलुमिआँ-मांसापणं न गमिष्यामि चेत् मम रविवासरीयव्रतमशुद्धं भविष्यति । रविवासरे आमिष-भक्षणं न भवति चेत् उपवासे फलाहारस्याभावमहममन्वि । त्वरया अत्यावश्यकानि नित्यकर्माणि सम्पाद्य कलुमिआँ-मांसापणे उपस्थितोऽभवम् । तत्र ग्राहकपङ्क्तिः तथा दीर्घा नासीत् यथा प्रतिरविवासरं भवति स्म । पङ्क्तौ मम संख्या त्रयोदशः, चतुर्दशो वासीत् । अतः किञ्चित् प्रसन्नोऽप्यभवम् । अन्यस्मिन् दिने तु त्रिंशत्पञ्चत्रिंशज्जनानां पश्चान्मम संख्या आयाति स्म । द्वित्रायां धूमवर्तिकायां ध्मातायां सत्यां मम संख्या आगता । सौभाग्यात् द्वित्राः तरुणछागाः कर्तिता आसन् । अतः, श्रीमत्याः रुचिमनुरुध्य हृदयभाग-

समेतं एक 'किलो'—परिमितं छागमांसं गृहीत्वा गृहमागतवान् । स्वाभिरुच्यनुरूपं मांसं दृष्ट्वा प्रसन्नाऽस्माकं श्रीमती अनुरोधं विनाऽपि त्वरयैकं चायचषकं मम हस्ते स्थापयित्वा पाकशालां गतवती । मन्ये सा दूरदर्शने 'श्रीकृष्ण'–धारावाहिकं द्रष्टुं त्वरायामासीत् । अतः धारावाहिकस्यारम्भात् प्राक् कामपि पाकप्रस्तुतिं सम्पादयितुं गतवती स्यात् ।

आस्थान-कक्षे बालौ दूरदर्शने विज्ञापनदर्शने मग्नावास्ताम् । रविवासरे तौ दूरदर्शनात् मुखं नापसारयतः । तावपि विज्ञापनस्य गीतं सस्वरं गायन्तावास्ताम् । विज्ञापनगीतं तयोः कण्ठस्थमस्ति । पाकशालात् 'टुं-टां'-शब्दः आगच्छन् आसीत् । श्रीमती सम्भवतः पाकस्यानुषङ्गिककर्मणां सम्पादने तत्परासीत् । अहं पुनः पर्यङ्के शयानः 'टाइम्स् आफ इण्डिया' तः राशिफलं पश्यन् विज्ञापनदातॄणां सप्तपुरुषाणामुद्धारं कुर्वन्नासम् ।

श्रीकृष्ण-धारावाहिकस्य शीर्षकगीतमारब्धम् । तावत् अस्मत्परिवारस्य सर्वे सदस्याः वयं दूरदर्शनसम्मुखे उपविष्टाः । यथाऽस्माकमनुपस्थितौ धारावाहिकं नारप्स्यते । यावत् समाप्तं शीर्षकगीतम्, तावदाह्वानघण्टिकाऽवदत्—"क्रि·········क्रि ······ ··"। सर्वे परस्परस्य मुखमपश्यन् । कः प्रथममुत्थास्यति द्वारमुन्मोचयितुम् ? अन्ततो गत्वा ममैव पराजयः । द्वारमुन्मोच्य—

—"अरे दीपक ! न पत्रं, न तारः, न दूरध्वनिः ! हठादत्र ?"

—"आम् एवं त्वां विस्मापयितुम् ।"

—"अपि अनुभूतं किञ्चिदसौविध्यं गृहान्वेषणे ?"

—"नहि-नहि, न तथा । अरे ! अत्रैव सर्वं प्रक्ष्यसि ? अथवा गृहाभ्यन्तरमासन्त्रयिष्यसि ?"

—अरे ! त्वदर्थं किमनुमत्या आवश्यकता वर्तते ? सहर्षं प्रविशतु । स्वागतम् ।"

मम स्वागतोक्तेः पूर्वमेव स आस्थानकक्षे प्रविश्य शोभां (श्रीमतीं) नमस्कृत्य दूरदर्शनस्य समीपे निषद्यामेवोपविष्टवान् । शोभाऽपि तं प्रतिनमस्कृत्य श्रीकृष्ण-धारावाहिकं पश्यन्ती अतिष्ठत् ।

सा वस्तुतः दीपकेन सह प्रथमवारं मिलति स्म । अतोऽभिज्ञानमपि न भवेत् । परिचयार्थम् प्रवर्तमानः समयस्तथानुकूलो नास्तीति धिया अहमपि दूरदर्शनदर्शने दत्तचित्तोऽभवम् ।

दशवादनं यावत् सर्वे नीरवा एवासन् । यथा वकाः जलाशये मत्स्यानि मारयितुं स्पन्दहीनाः तूष्णीमास्थायोपविशन्ति, येन मत्स्यानि न पलायेरन् तथैवास्थानकक्षे उपस्थिताः सर्वे स्पन्दहीना आसन् । सति समाप्ते श्रीकृष्णधारावाहिके प्रकोष्ठ आलोकितोऽभवत् । ततः सर्वे आगन्तुकस्य परिचयं प्राप्तुं जिज्ञासादृष्ट्या मामपश्यन् । मया दीपकस्य परिचयः प्रस्तुतः—

—"अयं दीपकः । मम स्नातककक्षायाः सहपाठी । महाविद्यालये सहपाठी, अथ च छात्रावासे सहवासी अपि ।"

दीपकस्य कृते इतोऽप्यधिकस्य परिचयस्यावश्यकतैव नासीत् । यद्यपि न नियमितरूपेण तथापि स मध्ये, मध्ये मत्समीपे पत्रं लिखति स्म । अतः तं शोभा, बालकौ च स्वल्पं बहु वा जानन्ति स्म ।

अहमप्यद्य दीपकेन सह अष्टवर्षानन्तरं मिलामि । स तु विद्याभवने साक्षात्कारार्थं मुम्बइनगरमागतवानासीत् । पूना (पुणे) स्थानकं तस्य मार्गे एवापतति । अत एव अस्मान् मिलितुमत्रोपस्थितोऽस्ति । तस्यैतादृशं सहृदयभावम् आवां प्रशंसितवन्तौ । इतः प्राक् आवयोर्दर्शनमप्रत्याशितरूपेण सम्बलपुरे ज्योतिबिहारस्य परिसरेऽभवत् । स तत्र संस्कृतविषये स्नातकोत्तरकक्षाया अन्तिमवर्षीयश्छात्र आसीत् । एम० ए० परीक्षामुत्तीर्य एम० फील० कुर्वाणोऽहं तु कस्यचिदध्यापकपदस्य कृते साक्षात्कारे भागं ग्रहीतुं तत्र गतवानासम् । यद्यपि स्नातककक्षायामावां सहपाठिनावेवास्व तथापि उत्कले परीक्षासत्राणि विलम्बेन चलन्तीत्यतः सः क्रमशः शिक्षागतयोग्यतायां ममानुध्यायी अभवत् । ततः वर्षचतुष्टयानन्तरं एम० फील०, पी-एच० डी० च समाप्याहमत्राध्यापकोऽभवम् । सोऽपि वर्षचतुष्टयेन यथा कथञ्चित् एम० फील० समाप्य अपरान् चतुरः वर्षान् यावद् वृत्तिमन्विष्यन् अस्ति । वृत्तिहीनत्वादद्यापि अविवाहितः भ्रमति जीवनस्य द्वात्रिंशद्वसन्तमतिक्रम्यापि ।

संस्कृतछात्रत्वाद् दीपकस्य स्वभावे काचिद्रसिकता स्फुटमनुभूयते। स यद्यपि न तथा सुदर्शनस्तथापि गम्यः। परतु युवती-वशीकरणे दक्षः। चाटूक्तिकलायामतिपटुः। अतः वयं सर्वे तं 'कलियुगस्य कृष्ण' इत्याख्यया व्यभूषयाम। अस्माकं कक्षायाः सुन्दरीषु श्रेष्ठा मनीषाऽपि तस्य प्रेम्णि बद्धा आसीत्। "दीपक-भ्रातः! दीपक-भ्रातः!" इति वदन्ती सा तमदृष्ट्वा जलमपि न पिबति स्म। केवलं मनीषार्थं दीपकोऽपि ज्योतिविहारेऽपठत्। अष्टवर्षेभ्यः प्राग् यदाऽहं तत्राकस्मात् तेन सहामिलम् तदा स वदन्नासीत् यत् मनीषां जीवनसङ्गिनीत्वेन स्वीकरिष्यतीति। अतः मन्मनसि मनीषाविषये स्वाभाविकी जिज्ञासा जागरिता—

—"अरे! मनीषा साम्प्रतं किं करोति? किं सा तव प्रतीक्षायां चिरकुमारी स्थास्यति वा? अथवा केनापि सह तस्य विवाहः सम्पन्नोऽस्ति इत्यवसरे"?

—"तस्याः नामापि मम सम्मुखे नोच्चारय। सा तु काचिद् विश्वासघातिनी। मां वञ्चयित्वा ममाज्ञाने कमपि अधिकोषाधिकारिं परिणीतवती। तस्याः पित्रोः समक्षं मया स्वविषये प्रस्ताव उपस्थापितः। परन्तु तौ वृत्तिहीनाय कस्मैचित् संस्कृतच्छात्राय कन्यां दातुं प्रस्तुतौ नास्ताम्। मनीषापि तत्प्रस्तावस्य विरोधं नाचरितवती। एवं श्रूयते यत् सा इदानीं सन्तानद्वयस्य जननी"।

तावद् उपाहारमादाय श्रीमती आस्थानकक्षे प्रविष्टवती। दीपकस्य अन्तिमवाक्यं श्रुत्वा परिहासस्वरेणावदत्—

—"सन्तानद्वयस्य जनन्याः तस्याः पश्चात् किमर्थं धावति भवान्? मया काचित् कन्या दृष्टा भवतोऽनुरूपा। तां परिणेष्यति चेत् सुखी भविष्यत्याजीवनम्।"

अहमविलम्बेन ज्ञातुं प्राभवं यत् शोभा तस्याः मातुलकन्याम् आख्यायिकामुद्दिश्येमं प्रस्तावम् उपस्थापयन्त्यस्ति। सा तु समये, समये तस्याः कृते कमपि योग्यं वरम् अन्वेष्टुं मां प्रवर्तयन्त्यासीत्। आख्यायिकाऽद्य षड्विंशवर्षीयाऽस्ति। ओडिआभाषायाम् एम० ए० कृत्वा सा गृहे एवोपविशति। श्यामाङ्ग्यास्तस्या रूपमपि न तथाकर्षणीयमस्ति।

सा तु तस्याः पित्रोरेकैव कन्या। अतस्तौ तस्याः कृते कस्यचिदुत्तम-पात्रस्यान्वेषणे तत्परौ वर्तेते। मया कदाचित् ममान्तरङ्गसुहृदः सदा-नन्दस्य प्रस्तावः तदर्थमुपस्थापितः, यः कस्मिंश्चित् सर्वकारीय-उच्च-इंराजी-विद्यालये शिक्षकोऽस्ति। परन्तु तावस्य प्रस्तावस्योपरि नासिका-कुञ्चनमनाटयताम्। तम्माद् दिवसादहं तस्याः विवाहविषये औदासीन्यं वहामि। दीपकोऽपि हठादेतादृशस्य प्रश्नस्य कृते प्रस्तुतो नासीत्। अतः समुचितस्योत्तरस्याभावे 'था-था, मा-मा' कुर्वन्नासीत्। अहं तस्यैतादृशी-मवस्थां दृष्ट्वा तस्य सहायतामाचरितुमवदम्—

—"अस्तु, अस्तु। प्रथमतः तस्य साक्षात्कारस्य फलमागच्छेत्। ततः विवाहप्रस्तावोपरि चिन्तयिष्यामः। सः चैतावता क्षुत्पी-डितोऽपि भवेत्। आदौ तस्य क्षुधां शमयतु।"

दीपक एवमाश्वस्तोऽभवत्। आवामुपाहारग्रहणे यावद् व्यस्तावास्व तावत् पाकशालातः 'प्रेसर्कुकर्' इत्यस्य सी-सी'-शब्दं श्रुत्वा शोभा तत्र गतवती। पुत्रौ च स्वसखाभिः स्थानीयोद्याने फालकां क्रीडितुं गतवन्तौ। उपाहारं समाप्य आवां धूमवर्तिकायामग्निसंयोगं कृतवन्तौ।

एवं हर्षोल्लासेन व्यतीतः सः रविवासरः। शोभा दीपकस्यातिथ्ये मनागपि कार्पण्यं न प्रदर्शितवती। नवं, नवं व्यञ्जनं, मिष्टान्नं च प्रस्तूय परिवेषितवती। मन्ये परिवारस्य सर्वे सदस्याः 'अतिथिर्देवो भव' इत्यु-क्त्या अनुपालने दत्तावधाना आसन्।

दीपकं दिनद्वयं, दिनत्रयं वाऽस्मद्गृहेऽवस्थातुमनुरोद्धुं शोभा मां प्रेरितवती। परन्तु दीपकेन तादृशोऽवसर एव न दत्तः मत्कृते। स तु स्वगमनविषयिणीं चर्चामपि न कृतवान् मत्सम्मुखे। अतः, तत्प्रसङ्गे ममानुरोधस्यावश्यकतैव नासीत्। मन्येऽस्मिन् दिनत्रये दिनचतुष्टये वा शोभा तया ज्ञातानि सर्वाणि भोजनविधानि निर्माय परिवेषितवती। मयापि सोत्साहं तस्य कृते पुनाभ्रमणस्यायोजनं कृतम्। रक्तालोक-(redlight) क्षेत्रादारभ्य चतुश्शृङ्गी-मन्दिरं यावत्। बहुवर्षेभ्यः प्रेक्षागृहेऽहं चलच्चित्रं न दृष्टवान्। परन्तु दीपकस्याग्रहमनुरुध्य द्वे हिन्दीचलचित्रेऽपि दृष्टवान्। एकं सपरिवारः। एकं च दीपकेन सह।

पञ्चमेऽपि दिवसे दीपकः गृहगमनस्य चर्चां न कृतवान्। मयापि निर्णीतं यत् अस्य कृते इतोऽधिकः आकस्मिकावकाशव्ययः व्यर्थ एव। अतोऽहं नियमितरूपेण कार्यालयगमनं प्रारब्धवान्।

सायंकाले यदाऽहं कार्यालयात्प्रत्यनिवर्ते तदा दीपकः विपणिगमनाय प्रस्तुत आसीत्। शिरोव्यथाच्छलेनाहं दीपकमेकाकीं विपणिं गन्तुं प्रेरितवान्। किन्तु सः कथमपि मां विहाय गन्तुं प्रस्तुतो नासीत्। अन्ततो गत्वा ममैव पराजयः। चायं पीत्वा तेन सहानिच्छया विपणिं गतवान्।

बस्यानादवतीर्य विपण्यां भ्रमन् दीपकः कस्मिंश्चिद् पद्यापणे स्थगितवान्। तस्माच्चापणात् सार्द्धैकशतरूप्यकविनिमयेन युतक (टीसार्ट)-द्वयं क्रीतवान्। मामपि एकं क्रेतुं प्रेरितवानासीत्। परन्तु मया तदर्थं नाभिरुचिः दर्शिता। पूनामुम्बय्यादिषु नगरेषु 'टीसार्टः' स्वल्पमूल्येन मिलन्तीति स्वाभिमतं प्रकटयन् क्रीतवस्तुनः क्रयणोचित्यं युक्त्या समर्थितवान्। एवं पुनः कियद्दूरमग्रे गत्वा दीपकः पद्यायां कस्मिंश्चिद् विविधापणे किमपि द्रष्टुं स्थगितवान्। तत्र किञ्चिद् वृहदाकारं 'आलवम्' क्रेतुं दशनिमेषं यावत् मूल्यनिर्द्धारणे तत्परोऽभवत्। क्रयविक्रयमूल्यसमन्वयात् परं एकशतरूप्यकपरिवर्त्ते पञ्चसप्ततिरूप्यकैः तद् विक्रेतुं स आपणिकः स्वसहमतिं प्रकटितवान्। परन्तु दीपकः स्वपर्समध्ये केवलं पञ्चाशद्रूप्यकाणि दृष्ट्वा माम् अवशिष्टमूल्यं दातुं सङ्केतितवान्। मत्सविधे तु केवलं शतरूप्यकात्मिकाःकाश्चन मुद्रा आसन्। अगत्या तास्वेकामेव मुद्रां निष्कासितवान्। दीपकः स्वपञ्चाशद्रूप्यकाणि पर्स-मध्ये स्थापयित्वा मत्प्रदत्तां मुद्रामेव आपणिकमददात्। तस्माच्च अवशिष्टं परिवर्तं गृहीत्वा सः स्वपर्समध्ये स्थापितवान्। गृहमागत्य माम् रूप्यकाणि प्रत्यावर्तयितुं प्रतिश्रुतवान्। ततः गृहप्रत्यावर्तनसमये दीपकः भोजनालये भुङ्क्त्वैव गच्छाव इति प्रस्तावं प्रस्तुतवान्। अहं किन्तु विलम्बो भविष्यतीति च्छलेन तस्य प्रस्तावस्योपेक्षां कर्तुं प्रायतम्। परन्तु दीपकः तस्य पक्षतः व्ययीकर्तुं प्रस्तावितवान्। कदाचिन्मे दुर्बलता बहिः पतिष्यतीत्यनुभूय प्रस्तावस्य समर्थनं कृतवान्। पथि किञ्चिन्मांसाहारी-भोजनालयं दृष्ट्वा तत्र प्रविष्टवान् दीपकः। खाद्यसूचिकां दृष्ट्वा कुक्कुटमांसयूषमानेतुं परिचारकायादिष्टवान्। भोजनानन्तरं यदा परिचारकः बीजकमानीय स्थापितवान् तदा मम चिन्ता द्विगुणीभूता। एकशतरूप्यकाधिकं

व्ययविवरणं तत्र निर्दिष्टमस्ति। दीपकस्य पर्समध्ये तु केवलं पञ्चसप्तति-रूप्यकाणि वर्तन्ते इत्यहं जानामि। तदपि मत्प्रदत्तपञ्चविंशतिरूप्यकयो-गेन। अतः पुनः मामेव व्ययीकर्तुं सङ्केतितवान् सः। गृहमागत्य सर्वं प्रत्यर्पयिष्यतीति धिया अहं तत्रापि मुक्तहस्तेन व्ययीकृतवान्। ताम्बूला-पणमागत्य ताम्बूलद्वयं, धूमवर्तिकाद्वयं च क्रीतवान् दीपकः। ततः बस्-यानेनावां गृहं प्रत्यागतवन्तौ।

षष्ठे दिवसे प्रातरुत्थाय दीपकः यदा स्ववस्त्राणि प्रक्षालयितुं रजकस्य प्रदत्तवान् तदावयोः दम्पत्योर्मध्ये कियत्क्षणं यावत् शीतयुद्धं प्रावर्तत। तर्हि महाशयाः दिनद्वयं यावदत्रैव अस्माभिः सह स्थास्यन्ति। दीपकमुद्दिश्य शोभाया आक्षेपं श्रोतुमहं प्रकारान्तरेण विवश आसम्। दीपकस्य भोजनव्ययात् धूमवर्तिकाव्ययं तामधिकमुद्-वेजयति स्म। तदुपरि भारस्योपरि शाकगुच्छ इव दीपकः अस्मद्भ्यः यद् धारयति स्म तन्न प्रत्यावर्तयति स्म। शोभाम् रहसि यथाकथमपि सान्त्व-यित्वा मनसि दीपकमभिक्रुध्यामि स्म केवलम्। ततोऽधिकं किं कर्तुं शक्नुयाम् ? पक्षे पत्नी शोभा पक्षान्तरे बन्धुः दीपकः। मत्कृते तु पक्षे गोहत्या, पक्षान्तरे च ब्रह्महत्या इव स्थितिः।

अष्टमे दिवसे रजकः दीपकस्य वस्त्राणि आनीय प्रदत्तवान्। परन्तु तथापि दीपकः स्वगमनविषये अस्मान् न सूचयति स्म। स यदा स्वकेशान् कर्तयितुं केशकर्तनालयं गतवान् तदा तस्यानुपस्थित्याः सुयोगं प्राप्य शोभा मदुपरि यथेच्छमवर्षत्। मन्ये महाभारतस्य कस्यचिद् दिवसस्य युद्धमस्माकं गृहे साक्षात् अवतीर्णमासीत्। तावद् दीपकः प्रतिन्यवर्तत। अतः पूर्णविरामोऽपतद् आवयोः वाग्युद्धे। शोभा पाकशालां प्रविष्टवती। अहं पुनः आस्थानकक्षे निषद्याम् उपविश्य सम्बादपत्रं पश्यन्नतिष्ठम्। दीपकः स्नानार्थं स्नानगृहं प्रविष्टवान्। अद्य यद्यपि रविवासर एवासीत् किन्तु तथापि शोभा मां मांसापणं गन्तुं न प्रेरितवती। सत्यामपीच्छायाम् अहमपि तस्याः भयेन स्वतः न गतवान्। गृहे शाकोऽस्ति न वेति न जिज्ञासितवान्। उदासीना सापि मां किमप्यानेतुं न परामृष्टवती। मध्याह्नभोजनसमये तया यदा कृशरा परिवेषिता तदाऽहं लज्जितः किञ्चित् सङ्कोचमन्वभवं बन्धुसमक्षम्। परन्तु पारिवारिकरहस्यं गोपायितुं कमप्युपायमन्विष्यन् अवदम्—

—"अद्य शोभायाः कश्चिद् व्रतः उपवासो वा वर्तते। अतः सर्वेषां कृते इयं कृशराव्यवस्था। सा तु त्वत्कृते कामपि विशेषव्यवस्थां कर्तुमुत्सुका आसीत्। परन्तु मया निवारिता सा तथाचरितुम्"।

—"त्वया सम्यगाचरितम्। मध्ये, मध्ये परिवर्तनमपेक्षते सर्वेषां कृते। अपरं च, मम भ्रातृजाया कृशरामपि सम्यक् पचति। उपरि किञ्चिद् देशीघृतं प्रदास्यते चेदस्य स्वादे गुणात्मकपरिवर्तनमायास्यति।"

कुपिताऽपि स्वमिथ्याप्रशंसया उत्साहिता शोभा घृतमानीय कृशरोपरि परिवेषितवती। "घृतं वै प्राणाः, घृतहीनं कुभोजनम्" इत्यादीनां केषांचिदुक्तिविशेषाणामंशमुद्धृत्य दीपकः घृतयुक्तभोजनस्य वैशिष्ट्यं वर्णयन्नासीत्। तावदहं "ऋणं कृत्वा घृतं पिबेत्" इति चार्वाकमतानुयायिनः दीपकस्य विषये चिन्तयन्नासम्।

तद्दिने न जाने किमर्थम् रात्रौ मां सुनिद्रा नागता। एवं मौनोपवेशने नास्ति कश्चिल्लाभः। केवलं पारिवारिककलह एव फलम्। अतः परेद्युः प्रातरुत्थाय सर्वप्रथमं दीपकं तस्य प्रत्यावर्तनविषये पृष्टवान्। तस्मात् यदुत्तरं प्राप्तं तेन मे चिन्तायां लाघवपरिवर्ते वृद्धिरेवाभवत्।

—"साक्षात्कारस्य फलं ज्ञातुमहं मुम्बइं गन्तुमिच्छामि। फलं मम सपक्षे एव गमिष्यतीति विश्वसिमि। आगमनकाले कर्तृपक्षैरहं किञ्चिद् आश्वस्त आसम्। अत एव पूनातः तत्रैव गमिष्यामि। यदि परिणामः मम सपक्षे स्यात् तर्हि तत्र योगदानं कृत्वानन्तरमवकाशं गृहीत्वा गृहं गमिष्यामि। अन्यथा परिणामः यदि विपक्षे भवेत्तर्हि मुम्बइतोऽपि गृहं गन्तुं शक्यते। अत एव श्वः मुम्बइं गन्तुमिच्छामि। किन्तु……"

दीपकस्य 'किन्तु' इति शब्दः मां भीषयन्नासीत्। न जाने का नूतना समस्यायास्यति किन्तुना सह। अतः, दीपकस्य वाक्यार्द्धस्य पूर्त्यै प्रतीक्षमाण आसम्। दीपकः प्रारभत—

—"मुम्बइ-यात्रासमये मया यावन्ति रूप्यकाणि गृहीतानि तानि सर्वाणि व्ययीकृतानि इत्यवसरे। रेलभाटकमपि नावशिष्यते। अतः

त्वत्सकाशात् एकसहस्ररूप्यकाणि धारयितुमिच्छामि । वेतनं प्राप्य, अथवा गृहं प्रतिनिवृत्त्य त्वद्रूप्यकाणि प्रेषयिष्यामि ।"

वस्तुतः अहं दीपकस्य सहायतामपि कर्तुमिच्छन्नासम् । परन्तु किं शोभा रूप्यकाणि दातुमनुमंस्यते । यदि तां सूचयिष्यामि सा किम् रूप्यकाणि दास्यति ? न सूचयिष्यामि चेत् तर्हि रूप्यकाणि कः दास्यति ? अहं तु मासारम्भे एव वेतनस्य पूर्णराशिं शोभायै समर्प्य निश्चिन्तस्तिष्ठामि । अस्तु, यथा दीपकेनोक्तं—"स्त्रीजने धृष्टता" इति तथैवाचरिष्यामि । एकसहस्ररूप्यकाणि कस्माद् धारयित्वा दीपकस्य सहायतामाचरिष्यामि । अनन्तरं यथाकथमपि समन्वयं साधयिष्यामि । एवं सर्पः मरिष्यति किन्तु दण्डभग्नोऽपि न भविष्यति ।

एवं दशमे दिवसे प्रातः दीपकस्य एकसहस्ररूप्यकाणि दत्त्वा, रेलस्थानके च तस्मै सुविदायं ज्ञापयित्वा गृहं प्रतिन्यवर्ते । तावत् शोभा निद्रातो जागरिता नासीत् । सम्भवतः सा दशदिवसानां निद्रां पूरयितुं कटिबद्धासीत् । अतः स्वयं चषकमात्रं चायं निर्माय वरण्डे उपधौ उपविश्य पिबन् चिन्तयन्नासम्—कीदृशे युगे वयं जीवामः । पुरा-काले तु अतिथीनामागमने जनाः प्रसन्नाः भवन्ति स्म । परन्तु वयमतिथिभ्यः विदायं ज्ञापयित्वैवं मन्यामहे यथा पादविद्धं कण्टकं बह्वायासेन निष्कासितम् । न जाने अद्यत्वे एतत् महत्परिवर्तनं अतिथिषु सञ्जातम् अथवा आतिथेयेषु ? सौभाग्यात् सफलतयोत्तीर्णा मयैषा कठिनाग्निपरीक्षा । अतोऽहं किञ्चिदाश्वस्तः सन् ईश्वराय भूयो भूयः कार्तज्ञ्यं ज्ञापयितुं न विस्मृतवान् ।



उदरनिमित्तम्……

फेब्रुआरीमासस्याष्टाविंशतिर्दिनाङ्कः। रात्रेः दशवादनम्। मासस्यास्य केवलं घण्टाद्वयमवशिष्यते। घण्टाद्वयञ्चावशिष्यते छात्रावासे मम मासिकखाद्यपरिचालकत्वाधिकारस्य। मम परिचालकत्वे प्रस्तूयमाणमन्तिमभोजनमत्तुं प्रतीक्षन्ते पञ्चाशत्तोऽधिकाः छात्राः। ते च सर्वे क्षुधातुराः छात्रावासस्य खाद्यघण्टां तथा प्रतीक्षन्ते यथा चातका आसन्नप्रायं वर्षाजलम्। छात्रावासस्य पाचकौ रन्धनकार्ये एवं तत्परौ वर्तेते यथा उद्घोषिते युद्धस्थले सेनान्यः।

मासस्यान्तिमो दिनाङ्कः। अतः, कस्यचिद् विशेषभोजस्यायोजनं प्रवर्तते। प्रत्येकमासस्य अन्तिमे दिनाङ्के छात्रावासे एवंविधः भोजः आयोज्यते। केचन छात्राः क्षुधाकष्टमसहमाना आगत्य वारम्वारं पाकशालायाः निरीक्षणं कुर्वन्तः सन्ति। कियान् कालोऽपेक्षते इति च जिज्ञासन्ति पाचकावुद्दिश्य। अद्य बहूविधानि सुस्वादुखाद्यानि प्रस्तोतव्यानि सन्ति। विशिष्य बहुविधानि व्यञ्जनानि यथा—पूरीका, मिश्रान्नं, पायसम्, आलुक-भूचणकम्, कपिशाकवृन्ताकम्, रक्तवृन्ताक-खर्जूरलेह्यम्, वृन्ताकभर्जः, शाकमिश्रिता दालिः आदि। पञ्चाशत्तोऽधिकसंख्याकानां छात्राणां कृते यथोक्त-बहुविधखाद्यसामग्रीणां प्रस्तुतिः न तथा सहजसाध्याऽस्ति। तासां संपादने पाचकभ्रातरौ क्लान्तावपि स्वकर्मणि तत्परौ वर्तेते। अन्येषु मासान्तभोजेषु सामिषखाद्यस्य व्यवस्था भवति स्म। अतः पाचकभ्रात्रोः कृते न तथा काठिन्यं भवति स्म। अद्य तु संयोगात् शिवचतुर्दशी वर्तते। अतोऽगत्या निरामिषभोजस्यायोजनं क्रियते। अन्यथा भक्तेन सह केवलं छागमांसयूषेण, शकलादेन च कार्यमचलिष्यत्। व्ययस्तु, समानो भवति। परन्तु सामिषभोजनेनैव छात्राः सन्तुष्टाः। पाचकयोः श्रमलाघवमपि भवति तेन।

अस्माकं छात्रावासे तु वरिष्ठछात्रा एव परिचालका भूत्वा संम्पूर्णछात्रावासस्य सामूहिकभोजनव्यवस्थां चालयन्ति। अतः, स्नातक-कक्षाया अन्तिमवर्षीयस्य मम फेब्रुआरीमासे परिचालकत्वेन नियुक्ति-रभवत्। मम सहयोगीरूपेण स्नातकोत्तरकक्षाया प्रथमवर्षीयस्य प्रशान्त-पुरोहितस्य नाम चितम्। परन्तु कक्षादृष्ट्या यद्यपि स मम वरीयान् आसीत् तथापि व्यावहारिकज्ञाने स मम सर्वथा कनीयान् सेत्स्यति। अत एव नूतनतयागतस्य तस्य नाम सहयोगीरूपेणैव विचितं वर्तते। परन्तु मम दौर्भाग्यात् तस्मिन्नेव मासे तस्य स्वसुर्विवाह आपतितः। सोऽपि गृहं गतवान्। अतोऽहमेकाकी समग्रछात्रावासस्य खाद्य-व्यवस्थां परिचालयन्नासम्। सार्द्धदशवादनं यावद् बुभुक्षिता एते छात्राः धैर्यहरा अभवन्। तेषु केचन आगत्य पाचकभ्रात्रोरुपरि वर्षितुमपि प्रारभत—

—"अरे ओ भ्रातरौ! अरे ओ बुढाभाइना (मुख्यपाचकः)!! अद्य एतावान् विलम्बः किमर्थम्? किं हस्तिनः पचथ अथवा अश्वान्? किम् अस्मिन् मासे निर्वेतनौ कार्यं कुरुथ वा? न जानीमः एतौ खाद्यं पचतः अथवा 'पालां' कुर्वन्तौ तिष्ठतः। परिचालकः कुत्रास्ति? अस्य परिचालनायां तु प्रतिदिनं विलम्बो भवति। दिवसे, रात्रावपि। एवं कतिवारं वयं कक्षायां विलम्बेनोपस्थिता भवामः एतयोरसावधान-वशात्।

छात्राणामेतादृशं मिथ्याक्षेपं श्रुत्वा बुढाभाइना किञ्चित् क्रोधि-तोऽभवत्। तदपि स्वाभाविकम्। घण्टाचतुष्टयं यावत् पाकशालाया-मग्निसमीपे स्थित्वाऽद्य तस्य सहनशक्तिस्तु क्षीणात् क्षीणतरा वर्तते। कोप-मिश्रितस्वरेण विलम्बस्य कारणं निर्दिशन्नवदत्—

—"किं किं वदथ बान्धवः! वयं किमत्रोपविशावः? शिरसः स्वेदान् तुण्डे गृहीत्वावां रन्धनकार्ये व्यापृतौ स्व। सर्वं पश्यन्तोऽपि भवन्तः नौ एवमभिक्रुध्यन्ति यथावां कर्मचौरौ। न्यूनान्न्यूनाः दशप्रकाराः खाद्य-सामग्र्यः प्रस्तूयन्ते। "प्रसङ्गस्तु अग्न्युदकयोः"। आवां किं कर्तुं शक्ष्यावः?

प्रसङ्गस्तु अग्न्युदकयोरित्येतदेवासीद् बुढाभाइनाया स्थायि उत्तरम् । यदि खाद्ये लवणाधिक्यं भवति एतदुत्तरं, यदि जलाधिक्यं भवति एतदुत्तरं, यदि ओदनं, व्यञ्जनं वाऽसावधानवशाद् ज्वलति तर्हि एतदुत्तरं, यदि ओदनव्यञ्जनयोः जलन्यूनता, लवणन्यूनता वा भवति तर्ह्यपि एतदेवोत्तरम् । सर्वासां पाकगतसमस्यानां कृते कथमेकमेवोत्तरं भवतीति कदाचित् स एव जानीयात् अथवा तस्य सहयोगी । अतः, छात्रेषु यदि कश्चिदाक्षेपं करोति तर्हि तेष्वेवापरः कश्चित् परिहासेन समाधानमपि निर्दिशति—"वार्ता तु अग्न्युदकयोरिति" ।

—"महाशयाः ! अस्य मासस्य कोऽस्ति परिचालकः छात्रावासे" ? प्रकोष्ठाद् बहिः कश्चिदपरिचितस्वरः मामेवान्विष्यतीति विज्ञायाहं बहिरागतवान् । यथासम्भवं तमभिज्ञातुमपि प्रायतम् । किन्तु सः मम सर्वथापरिचित एवासीत् । पञ्चाशद्वर्षीयः द्विपञ्चाशद्वर्षीयो वा कश्चित् पुरुषः । मुखे तस्य धवलश्मश्रूणि । परिहितं धौतं, युतकं च जीर्णं वर्तते । शिरसि अर्द्धपक्वाः केशाः । उभावपि हस्तौ पट्टिकावृतौ । मुखेऽपि कानिचन कृष्णमयानि गोलाकाराणि चिह्नानि । परन्त्वसौ किमर्थं मामन्विष्यन्नस्ति ? मत्कृते त्वयमदृष्टपूर्वः । तत्र मां सम्मुखे दृष्ट्वा उपस्थितेषु केनचित् छात्रेण मम परिचयः कारितः—"असावस्ति प्रवर्तमानमासस्य परिचालकः । भवतां यन्निवेदनीयमस्ति तत् निवेदयतु । छात्रावासस्य सर्वविधां व्यवस्थामिदानीमयमेव पश्यन्नस्ति । केवलं सार्द्धैकघण्टा अवशिष्यते अस्य कार्यकालः । यत् किञ्चित् करणीयं तत्त्वरया सम्पादयतु अनेन" ।

एतस्यापि इदानीमेवागन्तव्यमासीत् । न जानेऽवसरकामयतः मदुपरि अन्तिमे समये का विपत्तिरापतिष्यति । सत्यं खलूच्यते स्म पूर्ववर्त्तिभिः परिचालकैः—परिचालकत्वं नाम दूरे गच्छतः कीलस्य मारयितुं स्वसमीपे आमन्त्रणम् ।

—"महाशय ! भवानस्य मासस्य परिचालकः" ? भद्रमन्दस्वरेणापृच्छत् स आगन्तुकः ।

—"आम् । प्रयोजनमुच्यताम्" । आसन्नप्रायं दायित्वं निर्वोढुं मनसा प्रस्तुतोऽभवम् । आगन्तुकस्य मुखे काचित् प्रसन्नता स्फुटतराऽभवत् ।

—"महाशय ! मम नाम सौगतपट्टनायकः । चन्दनपुर-सर्वकारीयोच्च-इंराजी-विद्यालये शिक्षक आसम् । भवता अवश्यं श्रुतं स्यात् विगतमासस्य शिक्षकान्दोलनविषये । पञ्चमवेतनायोगस्य कार्यान्वयने काश्चन समस्या अधिकृत्य प्रवर्तिते तस्मिन्नान्दोलने भागं ग्रहीतारः वयं कस्याञ्चन गणधारणायां योगदानार्थं भुवनेश्वरं गतवन्त आस्म । तत्र भटानां रज्जु-बन्धभग्नप्रसङ्गे वयं बन्दिनो जाताः । तेषां यष्टिचालनेन मम हस्तपादौ भग्नौ । आन्दोलनकारिणामस्माकं वृत्तिरपि छिन्ना वर्तते सर्वकारेण । उच्चन्यायालये तदर्थमावेदनं कृतमस्माभिः । यावन्न्यायालयस्यान्तिमो विचारः नायास्यति तावद् वयं वृत्तिहीनाः । मम कृते चिकित्सार्थमपि धनमपेक्ष्यते । परिवारस्तु यथाकथमपि जीविकां चालयन्नस्ति । अहं यद्यपि याचितुं सङ्कोचमनुभवामि तथापि मत्सविधे उपायान्तरमपि न वर्तते । अतः नगरस्थ-शिक्षानुष्ठानेषु भ्रमन् साहाय्यम् कामयमानोऽस्मि ।"

एवं मत्सम्मुखे स्वविवशतां दुरवस्थां च वर्णयतस्तस्य नयनयोरश्रूणि गलितानि । तस्य दयनीयां स्थितिं विलोक्य मयि स्वाभाविकी दया आगता । अहमपि तदानीं कस्यचन वामपन्थि-राजनैतिकदल-परिचालितछात्रसंघस्य सदस्य आसम् । अतः सर्वकारीयमत्याचारं वयं कथमपि न सहामहे । देशस्य भविष्यन्नागरिकाणां निर्मातार एते शिक्षकाः । ते यदि न्याय्याय स्वाधिकाराय संघर्षं कुर्वाणाः स्थास्यन्ति । यदि चायं सर्वकारस्तेषामुपरि पशुवद् व्यवहरन् स्थास्यति तर्हि को लाभोऽस्माकं स्वतन्त्रतार्जने ? विप्लविनः मम शिराप्रशिरासु प्रवाहमानम् रुधिरम् उष्मात् उष्मतरं सञ्जातम् । अहं तमागन्तुकं स्वप्रकोष्ठमाहूय उपवेष्टुं प्रार्थितवान् । ततः केनचिन्मम सहपाठिना सह प्रतिप्रकोष्ठं गत्वा तस्य कृते साहाय्यमयाचम् । कश्चिद् रूप्यकद्वयं, कश्चिद् रूप्यकत्रयं, कश्चिद् वा पञ्चरूप्यकाणि ददाति स्म । केचन च नकारात्मकं मन्तव्यं प्रस्तूय प्रतिवदति स्म—

—"असौ कश्चित् प्रवञ्चकोऽस्ति । बहुवारमस्माभिः विपणिषु दृष्टोऽयं जनः । एवं बहुविधम् रूपं गृहीत्वासौ जनान् वञ्चयति । तेन चास्य जीविका प्रचलति ।"

केचन पुनः भिन्नंमन्तव्यं प्रस्तुतवन्तः—

—"अयं कश्चित् कुष्ठरोगी वर्तते । तदर्थमस्य हस्तपादौ पट्टिकावृतौ वर्तेते । अत्रागत्य वदति 'शिक्षक' इति । अप्यस्य चतुर्दशपुरुषेषु कश्चित् शिक्षक आसीत्" ?

तेषामीदृशं दायित्वविरहितं मन्तव्यं श्रुत्वाऽहं क्षुब्धोऽभवम् । अस्माकं परम्परायां शिक्षायाः किं महत्त्वमस्तीति विषये तानुद्दिश्य कञ्चिदुपदेश-मप्यददाम् । एवमावयोः सत्प्रयासेन सर्वमाहृत्य सार्द्धैकशतरूप्यकाणि संगृहीतानि । स्वपक्षतः पञ्चाशद्रूप्यकाणि संयोज्याहं द्विशतरूप्यकाणि तस्मै अददाम् । तावत् समाप्तासीत् पाकक्रिया । बुढाभाइना घण्टां वादयितुं मदनुमतेः प्रतीक्षायामासीत् । अतः त्वरयागत्य घण्टां नादितवान् । परन्तु अधिसंख्याकाः छात्राः घण्टानादात् प्रागेव भोजनार्थम् आसनग्रहणं कृतवन्त आसन् ।

स्वपात्रग्रहणार्थं प्रकोष्ठमागत्य पश्यामि यद् भद्रव्यक्तिस्तथापि मम प्रतीक्षायाम् उपविशति । सम्भवतः, सोऽत्रैव रात्रिभोजनं ग्रहीष्यति । रात्रौ सार्द्धैकादशवादने कुत्र वा तस्य कृते भोजनं मिलिष्यति ? स्वयं परिचालक आसम् । अतः, तस्य कृते भोजनव्यवस्थायां नासीत् मनागपि काठिन्यम् ।

भोजनमतीव सुस्वादु निर्मितमासीत् । सर्वेऽन्तेवासिनः बुभुक्षिता अपि आसन् । अतस्ते सर्वे नीरवतया भुञ्जाना आसन् । खाद्यं सुस्वादु निर्मितमिति ज्ञात्वा पाचकभ्रातरौ आत्मसन्तोषमनुभवन्तौ बहिः शीतल-पवनेन स्वेदान् शोषयन्तौ आस्ताम् । तदानीं तौ "क्लेशः फलेन हि पुनर्नवतां विधत्ते" इति कालिदासीयोक्तेः साक्षादुदाहरणे चास्ताम् ।

आगन्तुकः स शिक्षकमहाशयोऽपि अस्माभिः सह महता सन्तोषेण नैशभोजनं गृहीतवान् । परन्तु भोजनानन्तरमपि सः गमनस्य नाम न गृहीतवान् । वस्तुस्थित्याऽवगतोऽहं पुनर्महति द्वन्द्वेऽपतम् । रात्रौ द्वादशवादने सः कुत्र गमिष्यति ? को जानाति नगरेऽस्मिन् तस्य परिचितः कश्चिद् भवेत् न वा भवेदिति । पक्षान्तरेऽत्रापि छात्रास्तस्य छात्रावासे वसतिं न कामयन्ते स्म । तेषु केचन अद्यापि तं कुष्ठरोगाक्रान्त-

मेवामनन्ति स्म अतस्ते सर्वे रात्रावेव तं छात्रावासाद् बहिर्निष्कासयितुं मां प्रेरयन्त आसन् ।

परन्तु शतं यतमानोऽप्यहं तं भद्रजनं किमपि वक्तुं न प्राभवम् । न जाने किमर्थं तस्य मुखस्य भावे तस्यासहायता स्पष्टं दृग्गोचरीभूता । मनोविवेकयो: प्रचलिते संघर्षे विवेकस्य विजय: । इच्छन्नपि तं नापभाषितवान् । परिचितस्य कस्यचिदतिथेर्यथा आतिथ्यं क्रियते तेन सह तथैवाचरितं मया । तमागन्तुकं स्वलौहपर्यङ्के स्वापयित्वा स्वयमेकं शयनच्छदं गृहीत्वा मम सहयोगिन: परिचालकस्य प्रकोष्ठं गतवान् अनुपस्थितस्य तस्य पर्यङ्के रात्रिं यापयितुम् । अधिकृतोऽपि य: मम परिचालकत्वे सहयोगी नाभवत् स: मम परिचालनासमये आतिथ्यनिर्वाहे सहयोगी ऽभवदिति वदन्त: केचन सहपाठिन: मम परिहासं कृतवन्त: ।

परेद्यु: प्रातरष्टवादने एव क्लान्तस्य ममाक्षिणी उन्मुक्तेऽभवताम् । स्वप्रकोष्ठमागत्य पश्यामि यत् तदपि संपूर्णम् उन्मुक्तं वर्तते । सम्भवत: अतिथिमहाशय: नित्यकर्माणि संपादयितुं स्नानगृहं गतवान् भवेदिति विचिन्त्य अपूर्णां निद्रां पूरयितुं पुन: स्वपर्यङ्के किञ्चिदलुठम् । परन्त्वत्र किं पश्यामि ? मम काष्ठमञ्जूषाया: तालकं किमर्थमुन्मुक्तं वर्तते ? तत्र स्थितानि पुस्तकान्यपि इतस्तत: विक्षिप्तानि सन्ति । एतदस्वाभाविकं दृश्यं दृष्ट्वा मम मनसि सन्देह: प्रादुरभूत् । अपि मेऽतिथि: स्नानार्थं गतोऽस्ति उत मम बहुमूल्यवस्तूनि चोरयित्वा पलायित: ? किञ्चिद् विचलितोऽहं मञ्जूषामुद्घाट्यापश्यं यत् अनुपस्थितछात्राणां परिशोधार्थं यान्यवशिष्टान्यव्ययानि पञ्चशतरूप्यकाणि तत्र स्थापितान्यासन् तानि तु न सन्ति । तावत् काष्ठपटलोपरि मम दृष्टिरगच्छत् । तत्रापि या सतर्कघटिका-(Alarm) सीत् सापि तत्र न वर्तते । परन्तु स्वहस्तमन्विष्यकिञ्चिदाश्वस्तोऽभवम् यत् तत्र स्थिता मणिबन्ध-घटिका यथास्थानं वर्तते । सौभाग्यात् सा तु मम हस्ते एवासीत् । अन्यथा साऽपि अपहृताऽभविष्यत् । अद्यास्मिन् संसारे क: विश्वसनीय: को वाऽविश्वसनीय इति निर्णेतुं को भवेत् मानदण्ड इति विषयेऽहं विचिन्तयन्नासम् । तावदपर: कश्चिदागत्य सूचितवान् यत् तस्य मणिबन्ध-घटिका चोरिता वर्तते ।

कश्चापर आगत्य निवेदितवान् यत् तस्य प्रकोष्ठे ध्वनिवादित्रं नास्ति। अपरश्च कश्चित् सूचितवान् यत् तस्य चलद्वदद् सम्प्रथकम् (walki talki transistor) केनापहृतम्। शनैः-शनैः यावत्यः एतादृश्यः सूचनाः मिलन्ति स्म तावद् वर्द्धन्ते स्म मम हृत्स्पन्दनानि। एतत् सर्वं मम सकाशाद् अभूदिति केचन मां दोषिणमपि घोषयन्ति स्म। तदानीं श्रवणादतिरिक्तं उपायान्तरं किं वा भवितुमर्हति मत्सविधे ? अद्यत्वे चौराः नवं, नवं रूपं गृहीत्वागच्छन्तीति न चित्रम्। परन्तु भविष्यज्जीवनेऽहं साधून् अपि सन्देहचक्षुषा द्रष्टुं विवशो भविष्यामीति विचिन्त्य भृशं चेखिद्यते स्म मे चेतः। "उदरनिमित्तं बहुकृतवेश" इत्यस्य स्मरणमेवासीन्मे शरणं तदानीम्।



नीरवस्वनः

तस्याः बालिकायाः वयः दश, एकादश वा भवेत्। न जाने तस्याः कृते प्रकृत्याः किदृशीयं विडम्वनाऽस्ति। न सा वक्तुं शक्नोति, न वा श्रोतुम्। अथवा प्रसङ्गेऽस्मिन् कदाचिद् एवं वक्तव्यं सुकरं भवेत् यत् आजन्मतः सा वधिरा आसीत्। अत एव मूकाऽपि। तस्याः नाम किमासीदिति ज्ञातुं नाहं चेष्टितवान्। यतो हि वधिरायास्तस्याः बालिकायाः नामग्रहण-पूर्वकमाह्वानं सर्वथा निरर्थकमेव। सम्भवतस्तस्याः रूपानुसारं तत्रत्याः सर्वे तां 'काली'ति नाम्नाऽभिजानन्ति। यद्यपि तस्याः वर्णे तथा कृष्णता नास्ति तथापि तस्याः कनिष्ठा भगिनी किञ्चिद् गौरवर्णाऽस्तीत्यतः सर्वे तां कालीत्याख्ययाह्वयन्ति।

काली किन्तु मूकाऽपि बुद्धिमती। तस्मिन् ग्रामे तद्वयसि स्थितानां सामान्यबालानामपेक्षया तस्याः बुद्धिरुन्नतासीत् न तु न्यूना। सामान्य-बालानां तुलनया हसत्यपि सा अधिकम्। चपलतायां, चञ्चलतायामपि सा अन्यान् बालान् अतिक्रामति।

ग्रीष्मावकाशं यापयितुमहं सपरिवारः ग्राममागतवानासम्। एवं प्रतिवर्षमेकवारं वयं ग्राममागछामः। अस्मत्कन्यका उर्वी किंचित् चञ्चलासीत्। सार्द्धैकवर्षवयस्यपि सा स्वचपलस्वभावेन अस्मान् व्यथयति स्म। सा तु ग्रामे इतस्ततः भ्रमितुमिच्छति स्म। परन्तु वयं तथा कर्तुं किञ्चित् सङ्कोचमनुभवन्त आस्म। यद्यपि वयं सर्वे ग्रामे एव जाताः, पालिताः, वर्धिताश्च तथापि बहुदिवसेभ्यः नगरे स्थित्वा ग्राम्यसभ्यताम् आत्मनि पुनर्नवीकर्तुं काठिन्यमनुभवन्त आस्म। काली समये, समये अपरिचितानस्मान् द्रष्टुमस्मदावासमागच्छति स्म। शनैस्तस्याः उर्व्या सह मित्रताऽभवत्। सा मित्रता तु स्वाभाविक्यासीत्। विकलाङ्ग्याः काल्याः तस्मिन् ग्रामे मित्राणि नासन्। उर्वी तु तस्मिन् ग्रामे कस्यचिद-ध्वदर्शिनोऽन्वेषणे आसीत्। सा यद्यपि अपरिचितस्य कस्यचन पार्श्वे न याति

स्म तथापि न जाने काल्यां सा किमपश्यत् ! तस्याः सविधे गन्तुं सा अग्रेसरा भवति स्म । यदि कश्चिद् बालः उर्वीम् अङ्गुल्याऽपि स्पृशति स्म तदा साऽकस्मात् हिंस्रा भवति स्म । समस्तशक्त्या च तमाक्रामति स्म । एवमाचरिते सति बहुवार सा तेषां सकाशात् ताडनान्यपि खादति स्म । उर्व्याः पितराविति धिया सा आवामपि बहु मनुते स्म । यदि कदाचित् सा स्वयम् उर्व्याः सहायतामाचरितुं न प्रभवति स्म तदा सा धावन्त्येवागत्य आवां सूचयति स्म— 'हुं······हुं······' इति तस्याः चिराचरितभाषया । एवं तस्या उपस्थितौ आवामुर्वीं सुरक्षितां मत्वा निश्चिन्तौ तिष्ठतः स्म ।

एकदा वयं कस्यचिदावश्यककार्यस्यानुरोधाद् ग्रामान्तरं गतवन्त आस्म । अस्माकमनुपस्थितौ सा बहुवारम् अस्मान् अन्विष्टवती । सा तु मूकाऽस्ति । अन्यथाऽस्मत्प्रतिवेशिनः पृष्ट्वैव अस्मद्विषये ज्ञातुं प्रायतिष्यत् । सम्भवतः सा एवं चिन्तयन्ती दुःखिताऽभवत् यद् वयं तां न सूचयित्वा नगरं प्रति गतवन्तः स्याम इति । परन्तु अस्माकं वस्त्राणि आतपे शुष्यन्ते इति ज्ञात्वाऽस्माकं प्रतीक्षायां अस्मत्प्रकोष्ठाद् बहिः वरण्डे एवास्वपत् । सायं-काले यदा वयं प्रत्यावर्तितवन्तः तदा ताम् अस्मत्प्रतीक्षायामेव शयानां दृष्ट्वा चकिता अभवाम । अस्माकमागमनीं वार्तां सम्प्राप्य सा निद्रातोऽजागः । सा उर्वीं स्वसमीपे दृष्ट्वा तामेवमालिङ्गितवती यथा सा स्वप्ने एव तया सह मिलति । यथा कश्चिद्रङ्कः अप्रत्याशितरूपेण निधिं प्राप्तवान् । "हुं······हुं······' इति कुर्वन्ती सा अस्मान् किमप्यभाषत । उर्वी अपि तां दृष्ट्वा अहसत् निष्कपटं, मुक्तहासम् ।

एकसप्ताहानन्तरम् उर्वी स्वमात्रा, भ्रात्रा च सह मातुलगृहम् अगच्छत् । यदि चाहमपि तत्र गतवानासम् तथापि दिवसद्वयानन्तरं ततः प्रतिन्यवर्त्ते । मन्ये सागमनसमये पथि मां कुत्र दृष्ट्वा धावन्त्येवास्मद्गृहमागतवती । मामेकाकिनं दृष्ट्वा उर्वीं च मया सह न दृष्ट्वा सा उन्मत्तेव कदा बहिः कदा च गृहाभ्यन्तरे तामन्विष्टवती । कुत्रापि तामप्राप्य निराशा भूत्वा सा मां तस्याः भाषया किं किमपृच्छत् । सा तु उर्वीविषये एव मां पृच्छतीति ज्ञातुं न किमपि काठिन्यमनुभूतं मया । केवलं शिरश्चालनपूर्वकं तस्यै नास्तिवाणीं श्रावितवान् । ममाशयमवबुध्य प्रफुल्लितायाः

तस्याः मनः भृशं विषादग्रस्तमभवत्। मत्सविधे मौनमभियोगं प्रस्तुतवती केवलम्। न जाने किमर्थं मम हृदयं भृशं व्यदारयत् तस्याः सः नीरवस्वनः। अहं किन्तु निरुपाय एवासम्। तस्याः नीरवस्वनस्य कृते ममापि नीरवा एवासीत् सहानुभूतिः।

घण्टाद्वयानन्तरं सा पुनरागत्य उर्वीमन्विष्टवती। गृहे, गृहाङ्गणेऽथ च बहिः कुत्रापि तामदृष्ट्वा सा पुनर्मां हुं...हुं...इति वदन्ती किमप्यपृच्छत्। अहमपि पुनस्तां शिरश्चालयित्वा नास्तिवाणीं श्रावितवान्। दुःखिता सा पुनः किमपि अनुगुञ्जन्ती स्वगृहं गतवती। एवं मध्ये, मध्ये सा निरीक्षणाय आगच्छति स्म। माञ्च भीषयति स्म तस्याः सः नीरवस्वनः। किमुत्तरं तस्यै दास्यामीति चिन्तया मम मनोऽपि खिन्नं भवति स्म।

कदाचित् सा उर्वीमन्विष्यन्ती अस्मत्प्रकोष्ठमागच्छति। तत्र तामदृष्ट्वा हतोत्साहिता सती तस्याः स्मृतिं रोमन्थयन्ती तस्याः पुरातनवासाः (frock) आनीय मां प्रदर्शयति स्म। हस्तसंकेतेन उत शिरश्चालनेन अहं केवलं तां वस्तुस्थितिमवगमयामि स्म। एतादृश्याः प्रक्रियायाः पुनरावृत्तिः सप्ताहं यावत् प्राचलत्। तस्या एतादृशीमवस्थां दृष्ट्वा दयार्द्रः सन्नहं समयात् प्रागेवोर्वीं गृहमानेतुं विचारयन्नासम्। परन्तु तेन किमस्याः समस्यायाः समाधानं भविष्यति? अवकाशानन्तरं वयं यदा नगरं गमिष्यामः तदा कः तां कथं वा सान्त्वयिष्यति? उर्वी बहुकालं यावद् ग्रामे स्थातुं न शक्नोति। काली च नगरं गन्तुं न शक्नोति। अतः, उर्वीं विना सा यथा जीवितुं शिक्षतु मया तथैवाचरणीयम्। सा तु मातुलगृहे तिष्ठतु। वयं तस्मादेव स्थानात् नगरं प्रति गमिष्यामः। अथवा अस्माकं नगरगमनस्य दिनद्वयात्प्रागेव सा अत्रागमिष्यति। तस्या आगमनविषये कालीं न सूचयिष्यामः। अथवा कदाचिदेवमपि सम्भवेत् यदुर्वी कालीं दृष्ट्वाऽपि नाभिज्ञास्यति साम्प्रतम्। एतेषु दिवसेषु सा कदाचिद् एतां विस्मृतवती स्यात्। बालास्तु विस्मरणशीलाः भवन्त्येव। अतः, पितृभ्यां ताडिताः सन्तोऽपि ते परस्मिन् मुहूर्त्ते सर्वं विस्मरन्ति। अन्यथाऽस्मिन् संसारे पितरावेव तेषां परमशत्रू अभविष्यताम्।

उर्व्या अस्तित्वादतिरिक्तं किमपि अन्यदस्तित्वं काल्याः वर्तते इति सा यथा जानीयात् तथाचरणे एव तयोरुभयोः मङ्गलम् । वयं तस्याः जीवनेन किमर्थं क्रीडिष्यामः ? एषा तु प्रथमतः विकलाङ्गी वर्तते । मस्तिष्के एतादृशं कञ्चिद् विरहभारं वक्ष्यति चेत् तस्याः चञ्चलता, चपलताऽपि अचिराद् विनङ्क्ष्यति । एवं मन्ये तस्याः बुद्धिरपि प्रभाविता भविष्यति । एतत् सर्वं चिन्तयन्नहं सहानुभूतिभारेण एवमभञ्जम् यत् तां सम्मुखीकर्तुमपि मम सत्साहसं सामर्थ्यं वा नास्तीत्यहममन्वि । मया जीवने प्रथमवारमेवमनुभूतं यत् मुखरस्वनात् नीरवस्वन एव बलीयान् भवति । कदाचित् मनुष्यः नीरवः सन्नपि अधिकं वक्तुं शक्नोति । पक्षान्तरे कदाचित् सः समस्तशक्त्या चीत्कुर्वन्नपि स्वाभिप्रायं प्रकटयितुमसमर्थो भवति ।



माणिकपुरसेतुः

पञ्चमजातीयराजपथोपरि नवनिर्मितोऽयं माणिकपुरसेतुः । सेतोरुभयपार्श्वस्थः मार्गः निम्नगामी । उभयपार्श्वे मार्गयोः विस्तारोऽपि संकीर्णः । युगपद् द्वयोः यानयोरावागमनं यथाकथमपि भवितुमर्हति । वस्तुतः, अनेन मार्गेण यानचालनं नूतनचालकानां कृते परीक्षैव भवति । अस्मिन्नेव स्थाने प्रतिवर्षं न्यूनातिन्यूनाः दश, पञ्चदश यानदुर्घटनाः भवन्त्येव । आसु दुर्घटनासु ट्रक्दुर्घटनानां संख्या काचिदधिका भवति । तत्रापि पण्यवाहकयानानामेवाधिक्यम् । चालकेषु ट्रक्चालकाः प्रायः मद्यपाः भवन्तीति अस्माकं या धारणा वर्तते सात्वनृतेति न ।

माणिकपुरसेतोरुभये पार्श्वे कतिचन ट्रक्यानानि दुर्घटनाग्रस्तान्यभवन्निति न कोऽपि याथातथ्येन वक्तुं शक्ष्यति । कदाचित् तत्र स्थितो विशालकायस्ताड़वृक्ष एतद्विषये जानीयात् । कदा चायट्रक्, कदा मत्स्यट्रक्, कदा काष्ठट्रक्, कर्गजट्रक्, तैलट्रक्, तण्डुलट्रक्, तुषट्रक्, गोबर ट्रक,कदलीट्रक् आदि,आदि। अथवा माणिकपुरग्रामस्य जना अपि किञ्चिद् किञ्चिद् जानीयुरेतद्विषये। यानदुर्घटनाप्रसङ्गे माणिकपुरसेतुः भारतप्रसिद्ध इति तत्रत्याः ग्रामवासिनः प्रमाणयन्ति। केचन तु तदर्थमेष विश्वप्रसिद्ध इत्यपि वदन्ति । परन्तु तेषां ग्रामवासिनां विश्वं कियद् व्यापकं भवतीति केवलं ते एव जानन्ति । तेष्वनेकैरद्यापि जिलामुख्यालयमपि न दृष्टं स्यात् । अतस्तेषां कृते स्वजिलाऽपि विश्वं भवितुमर्हति ।

माणिकपुरसेतोरेक–'किलोमीटर'–परिमितं दूरत्वं माणिकपुरग्रामस्य। यदि कश्चिद् सेतोरेवाह्वयति तर्हि ग्रामस्थः श्रोतुं प्रभविष्यति । रात्रौ यानस्य कालाहमपि ग्रामवासिनः श्रोतुं प्रभवन्ति । यदि अकस्मात्तत्र कस्यचिद् यानस्य चक्रं स्फुटति तर्हि तं स्फोटनशब्दं श्रुत्वा ग्रामस्य बालाः गृहाद् बहिरागत्य नृत्यन्ति यत् कुत्र कश्चित् अग्निमयः स्फोट अस्फुटदिति। कस्यचिद् विवाहावसरेऽयं स्फोटः स्यदिति ते मन्वते ।

बालास्तु बाला एव । परन्तु वयस्काः प्रौढा अपि गृहाद् बहिरागत्य सेतुमेव पश्यन्ति किं सञ्जातमिति द्रष्टुम् । सम्भवतस्तेषां दृष्टिस्तु ट्रक्दुर्घटनामन्विष्यन्ती स्यात् येन तेषां कश्चिल्लाभोऽपि सम्भवेत् ।

माणिकपुरग्रामस्तु काचित् क्षुद्राऽनुन्नता च पुरपल्लीः । ग्रामवासिनः सर्वथा अनुन्नताः । न केवलम् आर्थिकदृष्ट्या अपि तु सामाजिकदृष्ट्या, राजनैतिकदृष्ट्या, शैक्षणिकदृष्ट्या च । मानविकदृष्ट्याऽपि ते अनुन्नता एव सेत्स्यन्ति । यद्यपि ग्रामे कश्चिद् उच्च-प्राथमिकविद्यालयः वर्तते तथापि न जाने किमर्थं तस्य ग्रामस्य पितरः स्वबालान् पाठयितुं नेच्छन्ति । ग्रामादनतिदूरे ग्रामान्तरे उच्च-इंराजी-विद्यालयोऽपि वर्तते । परन्त्वभिभावकानामभिरुचिर्नास्ति । अक्षरशिक्षैव तेषां कृते पर्याप्ता भवति । किमधिकपठनेन ? भागवतगृहे पुराणं पठेयुः, कृषिक्षेत्रस्य विवरणीं रक्षेयुः, अथवा ग्राम्यनाटकेषु, रामलीलादिषु वा भागं ग्रहीतुकामाः स्वस्वाभिनयानुरूपं सम्वादं कण्ठस्थीकुर्युः । इतोऽप्यधिकं किं स्यात् प्रयोजनं पठनपाठनयोः ?

ग्रामस्याधिसंख्याकाः जनाः मत्स्यजीविनः । कृषिस्तु तेषां द्वितीया वृत्तिः । परन्त्वद्यत्वे नदीषु, तडागेषु वा कृत्रिमो मत्स्याभावः दृश्यते किल । सर्वकारेण मुख्येषु नदीबन्धस्थलेषु क्षुद्रछिद्रयुक्ताः जालाः विस्तीर्णाः । येन क्षुद्राण्यपि मत्स्यानि ग्राम्यक्षेत्रेषु नागच्छेयुः । अतः कृषिः साम्प्रतं मुख्या एव वृत्तिस्तेषाम् । यदि कदाचित् यानदुर्घटनाः भवन्ति तर्हि तदेव भवति तेषां विशेषमुपार्जनम् ।

यानस्य दुर्घटनाजनितं शब्दमेते सहजतया ज्ञातुं प्रभवन्ति । गृहे सुप्त्वापि एते वक्तुं शक्नुवन्ति यत् दुर्घटनाग्रस्तं यानं बस् वर्तते अथवा ट्रक् इति । ट्रकयानेष्वपि तत् पण्यवस्तुपूर्णमथवा रिक्तमस्तीत्यपि ते ज्ञातुं समर्थाः भवन्ति । परन्त्वद्यापि ते परावर्तितयानस्य पण्यवस्तुविषयेऽनभिज्ञाः वर्तन्ते । सौभाग्यात् प्रस्तरट्रक्विषये ते ध्वनिभेदेन ज्ञातुं प्रभवन्ति । अतः, संजातायां तादृश्यां दुर्घटनायां ते सेतुं यावत् न गच्छन्ति वस्त्वपहरणाय । एवमनावश्यकश्रमांस्ते उपेक्षितुं शक्नुवन्ति ।

रात्रौ भवतु, अथवा दिवासमये वा भवतु, ट्रक् दुर्घटना-वृत्तान्तं श्रुत्वा ग्रामस्याबालवृद्धवनिताः सर्वे जनाः माणिकपुरसेतुमभिलक्ष्य धावन्ति। तदानीं ग्रामस्य प्रातिनिध्यं तु केवलं स्तन्यपायिनो बाला एव कुर्वन्ति स्म। दुर्घटनास्थलमागत्य ते कदापि विपन्नजनानां प्राणरक्षां न कुर्वन्ति। ते तु यन्त्रणायां चीत्कुर्वतां जनानां धनान्यपहर्तुं तत्रोपगताः भवन्ति। यदि रात्रौ किञ्चिद् यानं परावर्तते स्म तर्हि प्रातः कालं यावत् तत् पूर्णतया रिक्तं भवति स्म। तदर्थं बहुवारं ते भटैः पृष्टाः, परीक्षिताश्च भवन्ति स्म। अपहृतानि वस्तूनि कदाचित् तेषां जीर्णानि भवन्ति स्म। कदाचिद् चारक्षिभिर्गृहीताः सन्तः कारावासं स्वीकुर्वन्ति स्म।

एकदैकं तीर्थयात्री-बस्-यानं माणिकपुरसेतौ परावर्तितम्। माणिकपुर-ग्रामस्य ग्रामवासिनः पञ्चाशत् यात्रीणां प्राणान्तकं चीत्कारमुपेक्ष्य भटानामागमनात्पूर्वमेव तेषां हस्तघटिकां, कुण्डल-ताटङ्क-कण्ठहार-मङ्गलसूत्रादीनि स्वर्णाभरणानि, बहुमूल्यवस्तूनि चापहृत्य पारं गताः।

अद्य यावत् अयं सेतुः कति प्राणान् गृहीतवान् इति सहजतया कथयितुं न शक्यते। सेतोः पार्श्वे दण्डायमाने ताडवृक्षे कस्यचित् मृत-पञ्जाबी-चालकस्य आत्मा निवसतीति जनाः विश्वसन्ति। रात्रौ सः एकाकिनो दृष्ट्वा जनान् भीषयति। तस्य चालकस्यापि मृत्युस्तत्र ट्रक्-दुर्घटनायामेवाभवत्।

अत्र संघटितानां दुर्घटनानां कारणं ज्ञातुं माणिकपुरस्य जनाः निष्क्रियाः न सन्ति। ते तु विषयेऽस्मिन् गवेषणां कुर्वन्तः सन्ति। तेषां मते सम्भवतः सः पञ्जाबी-ट्रक्चालकः ब्रह्मराक्षसो भूत्वा यानानि परावर्तयति। अथवा सेतुनिर्माणसमये सेत्वधिष्ठात्र्यै देव्यै रक्तबलिः न समर्पितः स्यात्। अतोऽत्रानुदिनं दुर्घटनाः भवन्ति।

एकदा रजोमहोत्सवस्य मध्यरात्रे माणिकपुरग्रामवासिनः कमपि प्रचण्डं शब्दं श्रुत्वा निद्रातः जागरिताः। कदाचित् पण्यवस्तुपूर्णं यानं परावर्तितं भवेदिति धिया तस्मिन् घनान्धकारे बालैः: समं हर्षोत्फुल्लाः सर्वे पुरुषाः, सर्वाश्च स्त्रियः माणिकपुरसेतुमभिलक्ष्य अधावन्। यस्य गृहे यावन्तोऽधिकाः जनाः सन्ति तस्य तावदधिकमुपार्जनं भवति। यः

प्रथमं तत्र प्राप्स्यति सोऽधिकं धनं संग्रहिष्यति। अतस्तेऽहमग्रेऽहमग्रे इति कुर्वन्तः धावन्त एव तत्रागतवन्तः। परन्तु तत्रागत्य सर्वास्तेषामाशाः निराशायां परिवर्तिताः। तस्य ट्रक्यानस्य पण्यवस्तु नान्यत् किमपि, परन्तु प्रस्तर एवासीत्। प्रस्तरा अपि वृहदाकारा आसन्। अतःशब्देन भ्रामितास्ते आगतवन्तः। यदि यानेऽस्मिन् केवलं प्रस्तराः सन्तीति तेऽज्ञास्यन् तर्हि रात्रौ कथमपि नागमिष्यन् सपरिवाराः। किमर्थं ते रात्रौ एतावन्ति गुरुवस्तूनि वक्ष्यन्ति। अतस्ते यथागतवन्तः तथैव रिक्तहस्ताः प्रतिन्यवर्तन्त। तत्रोपविष्टयोः चालकमार्गपरिष्कारकयोः किमभवदिति ज्ञातुमपि ते न प्रायतन्त।

तस्य ग्रामस्य शङ्करवेहेरा किन्तु किञ्चित् लोभीप्रकृतिको वर्तते परिहासेन तं सर्वेऽप्रत्यावर्तितः वाण इति वदन्ति स्म।। सः रिक्तहस्तः न प्रत्यावर्तिष्यते। अद्य किन्तु चालकस्य हस्तमन्विष्यापि निराशोऽभवत्। तत्र घटिकां न दृष्ट्वा विरक्त्या केवलं ताम्रवलयं गृहीत्वागतवान्। तस्य ग्रामस्य मथुरासाहुरपि अपरः कश्चिल्लोभी वर्तते। स तु मार्गपरिष्कारकस्य हस्तमन्विष्यैकं लौहवलयं प्राप्तवान्। सः तदपि सहर्षं गृहीतवान्। तस्य ग्रामस्य सतुराजेनायाः चिक्कणान् प्रस्तरान् दृष्ट्वा मनसि लोभोऽभवत्। अतः स तस्मिन् घनान्धकारेऽप्येकं मध्यमाकारं प्रस्तरं शिरसि स्थापयित्वा गतवान्। तच्च तडागस्य कूले स्थापितवान् येन तदुपरि वस्त्राणि स्थापयित्वा परिष्कर्तुं शक्येत। अन्ये च ग्रामीणाः तस्यैतादृशं व्यवहारं दृष्ट्वा हसितवन्तः तं समालोचितवन्तश्च।

परेद्यु, प्रातरेव केचन भटाः माणिकपुरमागतवन्तः। तान् दृष्ट्वा साश्चर्यं जनाः कारणं जिज्ञासितवन्तः। ते सर्वे स्पष्टं जानन्ति स्म यत् ते रात्रौ रिक्तहस्ताः प्रत्यावर्तितवन्तः। परन्तु तथापि भटानामत्रागमने किं प्रयोजनं स्यात्? तावद् भटैः ग्रामवासिनः तथ्येनावगता अभवन् यत् ह्यः रात्रौ यत् ट्रक् परावर्तितं तत्रातिमहार्घाः प्रस्तरा आसन्। ग्रामवासिभिरवश्यं प्रस्तरा आनीताः स्युरिति सन्देहेन ते तत्रागतवन्तः। सतुरा जेना एतादृशं सम्वादं श्रुत्वा त्वरया स्वगृहमागत्य तत् प्रस्तरं जले निक्षिप्तवान् येन सः भटैर्न गृहीतः स्यात्। ग्रामवासिनोऽपि सतुरा जेनाया सहायतामाचरितवन्तः। एतत्तु तेषां व्यापारिकरहस्यम्। अतोऽनुसन्धानानन्तरं ग्रामे एकमपि प्रस्तरं न प्राप्य भटाः आश्चर्यं प्रकटितवन्तः। एतत्तु

प्रथमवारं तैराविष्कृतं यत् परावर्तित-यानस्य महार्घाणि वस्तुनि माणिकपुरग्रामस्य ग्रामवासिनः न स्पृष्टवन्तः। प्रस्तरान् ते न चोरयन्तीति तु सत्यं, परन्तु ते एतावतः महार्घान् प्रस्तरान् न चोरितवन्तः इति तु महदाश्चर्यम्। किं ते ट्रक-यानस्य परावर्तनविषयेऽद्यापि न जानन्ति ? अथवा महार्घप्रस्तरस्यानभिज्ञानात् ते एवमाचरितवन्तः ? यद् वा भवतु सतुराजेनां विहायान्ये सर्वे पश्चात्तापं कृतवन्तः यद् रात्रौ अन्धकारेण ते भ्रामिता अभवन्निति। अन्यथा प्रस्तरपूर्णं तदपि ट्रक्यानं रात्रावेव रिक्तमकरिष्यन् माणिकपुरग्रामस्य ग्रामवासिनः। अनन्तरं भटेभ्यः उत्कोचं दत्त्वा, क्षणिकं कारावासं वा स्वीकृत्य ते मुक्ता अप्यभविष्यन्।

शब्दार्थाः

अधिकोषाधिकारी—Bank Officer
अन्तरीयमुरुकं—under Pant
अलिन्द—verandah
अलिन्दकः—gallery
अवढ़ा—the rice offered as Prasāda to lord Jagannath
आतति—tension
आपणिकः—Shop keeper
आरक्षी—Security guard
आलुकम्—Potato
आस्थानकं– Chair
आस्थानकक्ष—Drawing room
आह्वानघण्टा—Calling bell
उच्च (अंग्रेजी इराजी) विद्यालय—High School
उपधिः—Chair
उपाहारगृहम्—restaurant
उरुकम्—Shorts
ओथडा—unmarried (oriya)
कक्ष—armpit/railway compartment
कपिशाकम्—Cabbage
कूपी—Bottle
कृशरा—khichadi
क्रीडारङ्गः—Circus
खट्वा—cot
खर्जुरम्—date palm
गन्त्री—Vehicle/rail
गन्धवर्त्तिका—Scented stick
गलाबन्धः—tie
गाञ्जा—intoxicated smoking
गोलकाम्त्र—firing
गोह—Pockct
चणकम्—nut
चलच्चित्र-कोषिका—film reel
चलद्विक्रेतृ—hawker
चषकः—cup
छदिः—roof
छायाचित्रयन्त्र—camera
टोपिका—cap
डाक—Post
तमाखुनाली—Cigarette
तारः—telegram
तालकं—lock
तैलचौरः—cockroach
दालिः—Pulse/dal
दिननिरूपिका—Calendar
दैनन्दिनी—diary
दैनिकभृतिः—daily wage
द्राक्तरः—doctor
धर्ष्—to challenge
धूमनाली—Chimney
धूमवर्तिका—Cigarette
ध्वनिवादित्रम्—tape recorder
नलदीपः—tube light
निषदि—Sofa
पटलः—table
पटवेश्मन्—tent
पट्टिका—bandage

पद्या—foot path
पयोहिमम्—ice cream
पर्यङ्कः—bedstead
पूरिका—Puri
पोटलिका—Packet
प्रलेपः—Cream
प्रवेशपत्रकं—tickət
फालका—Cricket
बीजकम्—bill
भक्तम्—rice
भटः—Police
भस्त्र/भस्त्रिकाकोषः—Purse
भित्तिपञ्जिका—calendar
भूषाप्रकारः—fashion
भोजनिलयः—Hotel
मार्गपरिष्कारकः—Cleaner
मिष्टिका—tofee
युतकम्—Shirt
यूषः—Soup
रक्तवृन्ताकः—tomato
राजपत्रितावकाशः—gazatted holiday
लम्बदोपनम्—Full Pant
लेह्यम्—Chatni
लोतः—tears
लोतकवाष्पं—tear gas
वटकम्—Vadā
वरण्डः – Verandah
वसन्तरोग—small pox
वासा—frock
विहासकः—Jcster
वितन्तुकम्—Radio
विद्युद्वार्ता—Telegram
विविधापणम्—variety store
वृन्ताकः—brinjal
शकलादः—salad
शयनच्छदं—bed cover
शोभाञ्जनम्—drumstick
श्रीमतीसम्मार्जनी—the drama form of Fakir mohan senapati's oriya short story 'Patent medicine'
सम्प्रथकम्—transistor
सूपः—dal
सुवासकः—Scent
स्थानकं—Station

ERRATA

Read	For	Page	Line
विच्छिद्य	विच्छेद्य	1	2
विपणिवणिग्°	विपर्णावणिग्°	2	3
दुष्टाश्चैवं	दृष्टाश्चैवं	6	8

Read	For	Page	Line
वोढुं	बोढुं	8	25
अज्ञात°	अज्ञान°	15	19
प्रशंसन्त:	प्रशंसयन्त	18	21
समीचीन°	समीचिन°	28	8
ममैतं	ममेतं	28	12
°मप्युपकारके°	°मप्युवकारके	30	6
व्यथयितुं	व्यथयितं	37	अन्तिमपङ्क्तिः
तत्सविधे	तत्सविध	38	25
विद्युच्चुल्यां	विद्युच्युल्यां	46	24
°दृश: व्यवहार:	°दृशं व्यवहारं	48	10
विमुक्तां	विमुक्ता	50	20
ग्रामीणा:	ग्रामीण:	56	15
वृद्ध:	वृद्ध	56	28
महत्पाप°	महत्याप°	58	21
शक्नोसि	शक्क्नोति	58	27
आपादम्	आपदाम्	62	15
एतादृगतिथि:	एतादृगऽतिथि:	65	19
बोद्धं	बोद्धं	71	9
°खडिरत्नस्य	खडिरत्नस्थ	74	6
ज्ञातुं	ज्ञातं	78	21
°वर्षिणीं	वर्षीणीं	80	अन्तिमपङ्क्तिः
द्वितीयं	द्वितीयां	82	26
वार्ता	वर्ता	94	19
अपहृतं	अपहतं	95	22
उल्लसितं मुखं	उल्लसित: मुख:	107	22
चतुष्पथस्य	चचुष्पथस्य	109	1
साऽचिरादेव	सऽचिरादेव	116	22
यदहं	यदह	124	1
चक्षुषोश्च	चक्षुपोश्च	126	12

Corrigenda

Substitute	For	Page	Line
पार्श्वं	पार्श्वं	1	1
वर्द्धयितुं	बर्द्धयितुं	5	1
पूरिकां	पुरिकां	5	13
०पोषणार्थं	०पोषणार्थं	6	13
काञ्चित्	काञ्वित्	6	17
ईदृशो०	इदृशो०	7	7
भटैः/भटाः	भट्टैः/भट्टाः	7	7/8
शोभाञ्जन०	शोभञ्जन०	8	5
०ऽपश्यन्	०ऽपश्यत्	8	11
शुश्रूषां	शुश्रुषां	8	13
परोपकारश्च विहितः	परोपकारञ्च विहितं	9	10
एतावत्	एतावन्तं	12	3
प्राणबन्धु	प्राणवन्धु	12	6
ग्रहीतु०	ग्रहितु०	13	1
नियोगो	नियोगं	14	18
सुरेशस्य	सुरेशं	15	3
०राशिषं	०राशीषं	15	10
०मुग्धानिव	०मुग्धामिव	16	15
स्थापित०	स्यापित०	16	17
राजपथे	राजपथि	16	23
प्रारभन्त	प्रारभत	18	2
शय्या०	शय्य्वा०	20	3
श्रूयते	श्रुयते	21/28	16/29
अनुषङ्गिककर्मणां	आनुषङ्गिकर्मणां	22	14
परामर्शेनापि	परामर्शेणापि	23	5

Substitute	For	Page	Line
वञ्चिताः	वञ्विताः	25	7
प्रथमतो	प्रथमत	25	13
पितृव्या	भ्रातृव्या	25/29	19/1
०माकर्षति	माकर्षयति	27	20
प्रत्यङ्गं	प्रत्यङ्गस्य	29	6
केवलं	केवल	29/92	12/5
बिभर्ति	विभर्ति	31	6
ईदृग्	इदृग्	31	11
रूपि विषं तं	रूपी विषस्तं	32	22
साधुसत्प्रिय०	साधुसन्तप्रिय०	33	28
०मप्राप्नुवन्	०मप्राप्नोत्	34	21
साहसं	साहसः	36	1
०देकमेव लक्ष्यम्	०देक एव लक्ष्यः	37	10
हस्ताभ्यां गता	हस्तयोर्गता	38	25
बिभ्यति	विभ्यति	39	19
किं भयं	को भयः	39	24
आयोज्य	आयोजयित्वा	40	12
मनुष्येऽपि	मनुष्यमपि	41	9
भयं व्यपगतं	भयो व्यपगतः	42	10
उर्वशीघाटः	उर्वशीधाटः	43	1
अशरीरत्वात्	अशरीरीत्वात्	44	8
कियान् प्रभावः	कियन् प्रभावम्	44	11
अन्वभवन्	अन्वभवम्	46	1
तस्य	तस्याः	47	19
प्रेमि	प्रेमी	48	2
एतावदाक्रोशनं	एतावदाक्रोशं	48	10
एतावन्तं महाभारं	एतावन्महद्भारं	50	15
सान्ध्यपुष्पैः	सान्ध्पुष्पैः	51	13
निर्वाप्य	निर्वापयित्वा	51	22
स्वप्नः	स्वप्नं	53	5

Substitute	For	Page	Line
किम् ?	किम्	53	10
अग्रदीप:	अग्रदीपम्	53	16
अस्थिभञ्जकं	अस्थिभङ्गं	55	1
कश्चिदुल्लेखयोग्य:	किञ्चिदुल्लेखयोग्यं	55	23
धनसञ्चय:	धनसञ्चयं	55	23
ते	त	56	15
रज्जुं	रज्जं	57	14
महान् अत्याचार:	महदत्याचारं	57	23
अन्धकार आछन्न:	अन्धकारमाच्छन्नं	58	14
गले	गलायां	58/59	28/4
निरुद्दिष्ट०	निर्रुदिद्ष्ट०	60	शीर्षकं
मत्कथां	मत्कयां	61	4
सा त्ववर्ण०	सात्ववर्ण०	62	8
ईदृशी	इदृशी	62	11
तर्हि यप्यहं	तहर्यप्यहं	63	9–10
कालं	काल	63	20
रुचिकरं	रूचिकरं	63	21
बिभीयाम्	विभीयाम्	63	26
प्राणिनां	प्राणीनां	64	1
स्वमस्तकानि	स्बमस्तकानि	83	19
बद्धुं	बन्द्धुं	84	23
प्रददति	प्रददाति	84	27
निर्दोष:	निर्दोषी	87	26
समानमेव भयं	समान एव भय:	88	12
तथ्यं	तथ्य	92	19
लिखेयुरपि	लिखेयरपि	97	20
स्वान्त:	स्वान्तं	118	6
अपकर्माण्य०	अपकमीण्य०	119	24
यदहं	यदह	124	1
बद्धुमिच्छ०	बद्धुंमिच्छ	126	14

Substitute	For	Page	Line
प्रविष्टतवान्	प्रविष्टवात्	130	16
परीक्षा	परीक्षां	132	2
परन्तु	परतु	136	2
०मादाय	०मादाव	136	19
क्रयणौचित्यं	क्रयणोच्चित्यं	138	12
प्रक्षालयितुं	प्रक्षालयितं	139	7
हस्तपादं	हस्तपादौ	18/55/145	6/4/15
भग्नं	भग्नौ	145	7
बहुवारं	बहुवार	150	4
याथातथ्येन	याथातश्थ्येन	153	10
च।	। च	154	7
दुर्घटना०	टुर्घटना०	154	22

Glossary

(Oriya/Hindi/English words adopted in this collection)

स्टेशनरी—Stationery (लेखन-सामग्री)	1	9
उच्च-इंराजी विद्यालय—High School	1	8
चन्दा—Donation	2	5
हाई स्कूल परीक्षा—H. S. C. Examination	3	27
ओथडा—life long unmarried male considered as inauspicious	7	29
जीर्णाङ्गोच्छा—torn towel	9	3
अविचारः—injustice	15	14
विव्रता/विव्रतं/विव्रतः—Puzzled	20/23/32/79,	13/5/23/1
साधुसन्त—Saint & sage	33	29
एकत्रिताः/एकत्रितः—gathered	32/33/57	13/15/23
दजन—dozen	38	18
व्यतिव्यस्तः—Perplexed	41	8
अतिष्ठः—Suffocated	42/86	4/16

	Page	Line
सलामी/पगडी—Security money	43	19
उन्मना—eager	52	
सक्षमः—Capable	55	14
धोतिः—traditional male saree	59	3
गौरचन्द्रिका—lengthy introduction	61	25
निर्दोषी—innocent	87	26
लाइन्—track	99	18
ग्यास्सिलिण्डरः—LPG cylinder	99	2
ब्रेड्—Bread	99	2
रेडिओ—Radio	102	12
बस्—Bus	109	2
कर्फ्यू॰—Curfue	109/113	4/2
आण्टी – Aunt	112	7
आड्डा—meeting place of unsociable elements	118	24
पोलिस्—Police	119	26
किलो—Kilogram	134	1
तारः—telegram	134	19
टीसार्ट—T'shirt	138	9/11
पाला—a sort of folk-drama of orissa	143	16
ट्रक्—Truck	153	7/9/11/12
किलोमीटर—Kilometre	153	19

Stories at a glance

- ☐ चम्पी 1-5

Story of a mad young lady who has been sexually exploited upto the extent of being pregnant. She begets her child in an open seat of a goddess of a small rural town. When enquired about the father of the child, she promptly points out to the person who was taking the leading role in the enquiry. Thus, the rush disperses, because, no body was ready to take such responsibility of fatherhood, although she has become mother by some of the unknown inhabitants of the mini town.

- ☐ अशुभमुखः 6-9

India is a store-house of superstitions even today when we are just approaching 21st century. The central character of the present story, belonging to a non-privileged class of the society, has become the victim of such superstitions. People avoid to see his face in the morning, because, they feel that his face is inauspicious. Surprisingly the victim has taken all the precautions to cover his face even before his death.

- ☐ अभीप्सा 10-15

Pathetic story of an widow who never compromised with her ideology and fought till her last

brcath to establish his son in this selfish society. At last the son achieves his goal, no doubt, but it becomes too late. The widow-mother leaves the world before her son returns home to deliver the only good news of his life that he has finally got a job.

□ **पितृप्राणः** **16-19**

Frustrated feeling of a poor dwarf towards his unwanted life, is depicted in this story who had to change his name to पितृप्राण from मातृप्राण after his mother's death. The poor chap who is humiliated in every step of his life, finally works in a circus to smile away his sorrows by making others laugh.

□ **श्रान्ततारका** **20-23**

The story is presented through a style of rumination of past events by the central character caused mainly due to her lolnely feelings. The woman was harshly rejected by her lover for marriage some 25 years back when she became ugly due to the post-reaction of the fatal disease, namely, small Pox. For that matter, the frustrated woman remains unmarried throghout her life.

□ **रेलयात्रा तथा मे सहयात्री** **24-30**

This is an interesting story of two blind co-passaangers of opposit sex who were unaware of one other's blindness till they are separated in a certain station. Finally, the fact is revealed to the male passanger by his new co-passanger who joins him

after the girl's departure. The romantic dialogue between the blind girl and the blind young man has proved to be the main attraction and the sole theme of the story.

- हसुराबाबा 31-36

The story of a typical character who prefers to stay as a saint throughout his life even without having any spiritual interest. He fully depends on the alms for his maintenance. Avoiding work and responsibility was the main cause for his asceticism. He smiles away all his sorrows and forgets all his worldly attachment by smoking the intoxicated leaves popularly known as गाञ्जा.

- टिन्-टिन्-वृद्धः 37-41

Gory story of an idle brahmin who has become principal source of humour for the children of the village where he lived because of his annoying nature. Like हसुराबाबा he also runs away from his household responsibilities and prefers to beg alms for his own maintenance by leaving aside his wife and six children on their own. He meets the fatal end of his life in a pitiable way due to the nasty activities of the wicked children who used to trouble him throughout.

- स्वर्गे मम प्रथमः परिचितः 42-46

Two unsatisfied spirits who have met their tragic ends in unnatural ways, meet each other by chance

in the other world to pleasantly discover that they were close friends before their deaths. The personification of the ghosts and the worldly imposition on the heaven as well as the heavenly objects happened to be the central theme of the story.

☐ प्रतिश्रुतिः 47-54

A non-academic test for a student who has been assigned with a tough task of protecting the chastity of his teacher's young wife who was not at all loyal to her husband and was all prepared to gallop with her paramour. The poor student could just manage to keep his words he has given to his teacher before his departure to attend a sacrifice by playing a betrayal tricks of false love towards her.

☐ प्रायश्चित्तम् 55-59

The story depicts the suppression of a poor orphan by the rich community of the village particularly known as the land-lords or *Zamindars* who have never given him scope for making himself free from the slavery or bonded labourhood. They have played inhuman tricks with him by killing his ox which he has just purchased to start the cultivation of his own and to lead an independent life. On the contray they accused him of committing a great sin called गोहत्या and forced him to continue again as a bonded labour after performing necessary प्रायश्चित्त.

☐ निरुद्दिष्टहृदयम् 60—64

A satiric expresion on lovc at first sight. The heart is objectified in this story and depicted as lost some where. An appeal is made to trace the lost heart. The humourous style of expressing love has become the main attraction of the story.

☐ अतिथिः 65—68

The guests are becoming real headache for the hosts now-a-days in this ultra-modern society. Hosting the guests has become a costly affair. A suggestive attack is made on our tradition as well as traditional feelings like अतिथिदेवो भव etc. by criticising the exploitive nature of certain guests whose sole intention remains to manipulate the hosts. This may appear more a fine essay (ललितनिबन्ध) than a short story.

☐ आविष्कारस्य आत्महत्या 69—72

Political exploitation and ethical murder of a scientist and his scientific invention by a leading political figure just to fulfil his selfish requirements of saving his existing position, the consequence of which result in madness of an eminent revolutionary lcader and the suicide of the scientist.

☐ अग्निः 73—75

A young talent of astrology has been cursed by his astrologer uncle and has gone mad.He beats his

younger brother and leaves home by leaving all the household responsibilities to be borne by a teenager. After many years he suddenly appcars in the village only to find his brother's dead body who has just died of snake-bite. The main character gets back his normal mental state by hearing the shocking news and consoles his brother's widow and the small baby by readily accepting their responsibility of maintenance.

☐ सुमित्रा 76—80

A forced bachlor enjoys maximum with his friends in a wine party arranged in his own home in his wife's absencc. His enjoyment turns to sorrowness when he receives the telegraphic news of his wife's abrupt arrival on the same day even before the dirty room was cleaned.

☐ त्यक्तबलिः 81—85

The story is centred on an abandoned sacrificial goat who was left unslain by the wish of goddess, because, it was still fed with mother's milk. In the consequent period it becomes literally headache for the villagers who havc fed him affectionately for years. The villagers were forced to take a harsh decision of killing it before goddess in the next पूजा as a बलि, because it injured many people and hospitalised a few. But to the pleasant astonishment of all, the goat appears before the पञ्चायत—meeting and begs pardon for

its shortcomings by falling on the feet of the village head who in return blesses it with the life.

- ☐ निर्यासः नापितमुण्डे 86—88

This is a satiric story highlighting two burning major problems of 21st century, namely, pollution and population. The increasing number of vehicle spreads Pollutions but fails to subsidise the rush. The story centres around the embarassment caused to a passanger in the intolerable rush in a town bus.

- ☐ विजयी पराजयः 89—92

The story depicts the helplessness of a Doctor who fails to express the naked truth before an AIDS patient who is fighting for his last breath in the hospital. Finally the patient himself comes to the rescue of the Doctor who was surprised to find such highly spiritual enlightenment and philosophical understanding in a teenaged patient.

- ☐ पद्मराज्ञी 93—96

Gory story of an young and charming lady seeming to have good family back ground and having been forced to live in the footpath of a metropolitan city. Unfortunately she becomes the victim of a mass rape by a group of unsociable elements where coincidentally her husband himself worked as one of the members.

- ☐ प्रियतमा दैनन्दिनी तथा मे श्रीमती 97—101

A funny story where the writer husband is accused by his wife of loving the personal diary

as his beloved. The loss of the diary gives the husband enough scope to doubt his own wife to be involved in the grass root of this conspiracy. The incident takes such a serious turn that both husband and wife accuse each other. The wife criticises the literary ability of the husband while the husband tries to justify her as his greatest enemy, because, she considers his diary as her co-wife. The disputable dialogue appears interesting.

☐ अपमृत्योः पुनर्जन्म 102—108

The story tells about the pitiable condition of a pretty young lady who has been refused by her lover for marriage after knowing the fact that she has been conceived out of their premarital physical relation. Thus, she is left with no other option than going for an abortion. In spite of this, the present story can be considered as a comedy (सुखान्त), because, the lady has been promptly accepted by another young man for marriage even after knowing her past history.

☐ चक्रव्यूहः 109—115

The story informs about a generous person too simple by heart who was all prepared to take any sort of risk in helping a quite unknown troubled young lady in a curfue declared area. Since she had no room in the city to spend the night he took her to his own residence without caring for his wife's opinion. An extra-marital relation developes between them when the young

lady continued to stay there as a tutoress of their children. The man was so puzzled when such relationship threatened the peace of his family life. He was unable to keep the balance between the illegal love and the legal married life.

☐ भाटकगृहम् 116 - 121

The story draws a real picture of residential problem in the metropolitan cities. The problem multiplies for an outsider who does not have house of his own and stays in a rented room. The central character of the story undergoes such a hardship and becomes the victims of many unsociable happenings caused by drunks as well as *goondas* when he comes to stay in a new locality with his newly wed wife.

☐ रक्षासूत्रम् 122—126

The central character of the story wants to fulfil his secret desire of wearing a राक्षी for the first time in a रक्षाबन्धन day and purchases one for this purpose. On the festival day, although his desire was otherwise fulfilled, he could not utilise the राक्षी he has purchased. Finally the राक्षी had its proper utilisation since he donated it to a small girl of footpath along with a Ten Rupees Note, who was all day standing in the road side looking at the busy shops where the राक्षीs and the sweets were being sold.

☐ आस्थाया आस्था 127—132

An interesting story of an innocent girl who had faith in all and who could easily gain every body's faith. She makes friends in a single meeting and never gets frustrated in the separation. She could smile away the worldly complications with an ease but many times invited troubles through her oversmart behaviour. In fact, she never gives importance to the problems, how serious that may be and continues to live the life in her own careless style.

☐ अग्निपरीक्षा 133—141

A friend had to undergo a fire-test before his close friend to save his usual image. He had to tell lies before both his wife and friend not only to save his own image but also to save their images towards each other. He was literally sandwitched between his materialistic wife as well as careless friend of which the former was never ready to compromise with the situation and the later was firm on exploiting his polite nature.

☐ उदरनिमित्तम् 142—148

An unbelievable story of a group of students of a boarding, being cheated by a fraud appearing as a teacher who used to adopt different forms in different occasions. He plays with their delicate sentiments and steals away their valuable possessions. The good behaviour and helping nature of the students also failed to change his attitude.

☐ नीरवस्वनः 149—152

The love, affection and inclination of a dumb as well as hearing impaired girl towards a small baby, is depicted in this story in an imotional way, leaving the parents of the baby highly sentimental over this development. The silent voice is suggested in this story as more powerful and effective than the spoken sound.

☐ माणिकपुरसेतुः 153—157

This is a story of an inauspicious bridge proving fortunate for the nearby villagers. The bridge witnesses a number of fatal truck accidents and the villagers used to get the maximum benefit out of it. The accidents occurred mainly due to the wrongly planned construction of the bridge leaving the roads of both the sides narrow and uneven. On the contrary, the villagers felt that they were caused by the spirit of the Punjabi driver who died in a truck accident in the same spot. The villagers never cared for the lives of the drivers or passengers, because, they only believed in stealing away the loaded goods.

सुकवेः श्री वनमालिनो बिश्वालस्य संस्कृतकथासंग्रहोऽयं 'नीरवस्वनो' नाम मया सतृणमास्वादितः। सङ्ग्रहेणानेन विश्वालो विरचयति समकालिकसंस्कृतसाहित्यस्य नवीनां प्रतिष्ठासरणिमिति प्रत्यैमि। तत्कृताः कथाः सर्वथा आधुनिकसाहित्ये प्रचलिताया लघुकथाया मानदण्डमङ्गीकृत्य प्रवर्तिताः। लक्ष्यते चात्र नूतनः कश्चनार्थप्ररोहः ....। वस्तुवैविध्यमासां कथानां सर्वथा श्लाघनीयम्। बिश्वालो विशदयतीह विस्तारं वर्ण्यविषयाणां, निरूपयति च निरुपमं कथासंसारम् । .... कथास्वासु सर्वत्र प्राञ्जलं प्रासादिकं प्रकृष्टं गद्यं हृद्यं निरवद्यं च लसति। कथाकथनभङ्गी बलादाकृष्य चेतः कथाजगति नयति । मनोभावानां शीलने बिश्वालस्य लेखनी प्रकटयति कामपि पटुताम्, विच्छित्तिं च वर्णनायाः।...............

प्रो० राधावल्लभ त्रिपाठी

लघुकथाकारस्य वनमालिनो बिश्वालस्य नवीनो लघुकथासंग्रहः 'नीरवस्वनः' इत्याख्यः प्रकाश्यमानोस्तीति प्रमोदस्य विषयः।............... सङ्ग्रहेऽस्मिन् निवद्धासु कथासु सर्वास्वेव वैविध्यकलिता काचिदभिनवेव कथोपस्थापनकला स्फुरतीति कथामर्मज्ञा अनुभविष्यन्तीत्यस्माकं विश्वासः। ....स स्वदृष्टान्येव पात्राणि स्वानुभूतांश्च जीवनव्यापारान् स्वीयासु लघुकथासु निवध्नाति।

विश्वालस्य प्रायः सर्वासु कथास्वस्माकं सुपरिचितान्येव पात्राणि चित्रितानि लभ्यन्ते। बिश्वालनाम्ना दर्पणेनैकेन मन्ये ग्रामेषु नगरेषु वा भ्रमता स्वकथाविषया आत्मसात्कृताः ....मन्ये प्रायः सङ्ग्रहगताः सर्वा अपि लघुकथाः प्रवर्तमानस्य जगतो, जीवनस्य च जागरुकतयाऽऽकलने समर्थस्य लेखकस्य लेखनीतो निर्गताः सन्तीति । संस्कृतस्य लघुकथाकारत्वेन सर्वथा नवीनोऽपि श्री वनमाली बिश्वालः स्वीयाभिराभिर्लघुकथाभिः स्वीयं विशिष्टस्थानं परिचय चार्जयितुं क्षमो भवेत् ।...............

प्रो० जगन्नाथ पाठकः